MSS No. 262 Subject Philosophy

Name of MSS तर्क भाषा आचार्य दीपिका

Author केशव मिश्र

Period Folios 59-107

Script Sanskrit Source Prithi Pal Singh, Amritsar

Missing Folios 0-58

262.

18

262

तर्कभाषा भावार्थ दीपिका ; केशव मिश्र कृत ॥ केवलराम द्वारा लिपित ॥ १८६६ वि०
ई० – १०८ पत्रक ॥ लं०अं० १८ पं०
प्र० पू०

ह० ले०

तर्कभाषाभावार्थदीपिका

ترک بھاکھا بھاورتھ دیپکا

262

13½ x 7

~~Leaf~~ 908
LEAV

1899

59A

अन्वेत्वेति अत्र स्यणत्वमविवक्षितम् यथापेक्षाबुद्धिनाशात्तत्रैवाश्रये द्वित्वपृथक्त्वादिनाशः पाकेनेति तेजःसंयोगरूपपाकएववि
रोधिगुणोवाच्यःप्रकृतेमिति असरेणःपदः तस्यचानन्याश्रयत्वात् प्रसक्तस्यनाशयुक्त्यालेप्यादि त्वाणोति स्वपरिमाणापेक्षया
अल्पपरिमाणोयस्यतादृग्द्रव्यसमवायिकारणत्वंसाध्यम् अत्रच द्व्यणुकपदेसाद्दृश्यरूपेणसाध्यसिद्धर्थ्यापक्षेत्यर्थे विशेषणा
सद्दोषाभावात् धर्मेसाद्धेव्यभिचारवारणायद्रव्यपदम् तेचेति उक्तानुमानसिद्धेद्व्यणुकस्वरूपमित्यर्थः कार्यमेवत्येवका
रणेनित्यवकारेणनित्यत्वव्यवच्छेदाय तथाच साध्यद्वये नास्यद्र्शम् तद्व्यणुकारम्भकंद्रव्यंकार्यत्ववत् नित्यत्वाभाववद्वा महत्त्वाधिक
रणसमवायिकारणत्वात् कपालवदितिप्रयोगः परमाणौव्यभिचारवारणाय महदिति महद्द्रव्येव्यत्रद्रव्यपदस्यचसमवा
येन महत्त्वाधिकरणत्वसूचनायहेतौतच्च प्रयोजकम् वैयर्थ्यात् तदपि सालेति पूर्ववद्व्याख्येयम् सचानारब्धएवेति आ

4\. अन्यत्रसत्येवाश्रयेविरोधिगुणप्रादुर्भावेननाशः यथापाकेनघटादेरूपादिनाशः किंपुनः परमाणुसद्भावेप्रमाणं
उच्यते यदिदंजालसूर्यमरीचिस्थंरजः सर्वतःसूक्ष्मतममुपलभ्यतेतत्स्वाल्पपरिमाणद्रव्यारब्धंकार्यद्रव्यत्वात् घट
वत् नच द्व्यणुकंकार्यमेवमहद्द्रव्यारम्भकस्यकार्यत्वनियमात् तदेवंद्व्यणुकाख्यद्रव्यान्तरसिद्धौतदपिस्वाल्पपरिमा
णसमवायिकारणारब्धंकार्यद्रव्यत्वात् घटवत्यस्तुद्व्यणुकारम्भकःसएवपरमाणुःसचानारब्धएव ननु का
र्यद्रव्यारम्भकस्यकार्यत्वाव्यभिचारात्कथमनारब्ध इत्युच्यते अनन्तकार्यपरंपरादोषप्रसंगात् तथाच सत्य
नन्तद्रव्यारब्धत्वाविशेषेणमेरुसर्षपयोरपितुल्यपरिमाणत्वप्रसंगात् तस्मादनारब्धएवपरमाणुः द्व्यणुकंत

रब्धेतेप्रमाणाभाव इतिशेषः ननु परमाणुःकार्यंकार्यद्रव्यसमवायित्वात् इदमेवप्रमाणंसंभवति माशङ्क्यते नन्विति का
र्यद्रव्येत्यत्रद्रव्यपदंगगनादौव्यभिचारवारणाय प्रतिकूलतर्केनेतदनुमानस्याप्रयोजकत्वमितिदर्शयति अनन्तेति एवं
क्रमेणतदवयवानामपिसावयवत्वेनवस्थास्यादित्यर्थः नचात्रानवस्थापात्तबीजांकुरादिस्थलवत् किंचित्प्रमाणमस्ति
प्रत्युतविरुद्धत्वमेवास्तीति दर्शयति तथाचेति अनन्तेतिमन् यथा कपालद्वयारब्धत्वाविशेषेपितल्लघुकपालद्वयारब्धा
द्वदातस्थूलकपालद्वयारब्धस्यघटस्यपरिमाणाधिक्यम् तथानामनन्तद्रव्यारब्धत्वाविशेषेपि तेषांद्रव्याणांसूक्ष्मत

द्व्यणुकारंभविधिं दर्शयति द्व्यणुकं द्वित्वादिना द्वाभ्यामेवेति अनेकावयवारब्धमित्यर्थः कार्यद्रव्यत्वादिति हेतुर्बोध्यः त
त्र विपक्षे बाधकमाह एकस्येति हेतुपरत्वे पञ्चम्यन्तता तद्दोषापत्तेः परमाणुद्वयसंयोगरूपासमवायिकारणविरहादिति
भावः एकस्य जनकत्वे द्व्यणुकं प्रति परमाणुद्वयस्यैव तद्धेतुत्वेन हेतुत्वात् सहकारिविरहात् द्व्यणुकस्य परमाणावप
रमाणुपरमाण्वथिकानुपपत्तिः कल्प्यमानस्यापि वदन्ति ननु नैकारब्धत्वं वक्तुमिरारब्धत्वेऽपि संभवति तत्कार्यं द्वाभ्यामेव परमा
णुभ्यामिति निश्चितमित्यत आह त्रिचतुरादीति अवयवानां बहुत्वे द्व्यणुके महत्परिमाणप्रसंगोऽपि बोध्यः महत्त्वका
रणाभावेन महत्त्वाभावं कार्ये दर्शयितुं महत्त्वकारणानि दर्शयति कार्यगतेति कारणमहत्त्वादिति यथा कपालमहत्त्वा
द्घटमहत्त्वमिति कारणबहुत्वादिति यथा तुल्यपरिमाणकपालद्वयारब्धघटपरिमाणापेक्षया तादृशकपालत्रया
रब्धघटे प्रकृष्टमहत्त्वं प्रचयः कारणप्रचयादित्यपि बोध्यम् यथा तूलकावयवानां प्रचयाख्यसंयोगात् तस्यावयवतूलकात

द्व्यणुकं तु द्वाभ्यां परमाणुभ्यामेवारब्धम् एकस्यानारंभकत्वात् त्रिचतुरादिकल्पनायां प्रमाणाभावात् द्व्यणुकारब्धं
च त्र्यणुकं त्रिभिरेव द्व्यणुकैरारभ्यते एकस्यानारंभकत्वात् द्वाभ्यामारंभे कार्यगुणमहत्त्वानुपपत्तिः प्रसंगः
कार्यमहत्त्वे कारणमहत्त्वात् कारणबहुत्वाद्वा तत्र प्रथमस्याभावात् चरमोऽपि तथ्यम् नच चतुरादिकस्य तन्ना
याप्रमाणमस्ति त्रिभिरेव महत्त्वारंभोपपत्तेरिति शब्दगुणमाकाशं तच्च संख्यापरिमाणपृथक्त्वसंयो

गपरिमाणप्रकृष्टं तूलकमहत्त्वं तत्र त्रसरेणुपरिमाणस्य परिशेषे कारणबहुत्वजन्यतां दर्शयति प्रथमस्येति कारणेद्व्य
णुके महत्त्वस्यासंभवात् इत्यर्थः एवं प्रचयस्याप्यभावो बोध्यः चरमं कारणबहुत्वमित्यर्थः ननु बहुत्वापेक्षायां कथं त्रि
भिरेवेति निर्णीतम् चतुरादेरपि संभवादत आह नचेति क्रमप्राप्तमाकाशं लक्षयति शब्देति शब्दो गुणो यस्य तत्त
म् गुणपदं समवेतपरम् तेन शब्दसमवायित्वमित्यर्थः तद्गुणमाह संख्येति एकमिति स्वप्रतियोगिकभेदासमा
नाधिकरणमाकाशं तत्त्वादित्यर्थः अन्यथैकमित्यस्यैकत्वसंख्यायोगित्वमर्थे घटादेरपि तद्वत् द्वित्वाद्यभाववदित्यर्थे अ
संभवः आकाशे गगनाकाशं शब्दत्ति द्वित्वादिसत्त्वात् सजातीयमात्रवृत्तिद्वित्वाभाववदित्यर्थे प्रतियोग्यप्रसिद्धिः आका
शद्वयवृत्तिद्वित्वाद्यप्रसिद्धेरित्यादिदोषसत्त्वात् विभुत्वनिमित्ते पूर्वनिरुक्तेः तत्र प्रमाणं दर्शयति तदाह शब्दलिंग

परिशेषपदस्येतरवाधसहकृतानुमितिपरत्वमिति दर्शयति प्रसक्तपदंभिन्ने प्रसिद्धस्य साध्यस्य प्रतिषेधे वाधे सति
अन्यत्रापक्षधर्मतावलभ्यसाध्यसिद्धेरप्रसंगात् विषयतयानुमितेरसंभवाच्छिष्यमाणे वाधितप्रसिद्धसाध्या
वच्छिन्ने पक्षधर्मताबललभ्ये अप्रसक्तसाध्ये संप्रत्ययः सम्यक्प्रमारूपः प्रत्ययोऽनुमितिरित्यर्थः सन्नम्बधो विषय
तो तथाचेतरबाधवशात्सामान्यव्याप्त्या विशेषसाध्यसिद्धिः परिशेषः परिशेष्यतेऽनेनेति करणसाधने नाह
शानुमानप्रमाणमपि परिशेषः प्रकृते च गुणत्वेन द्रव्याश्रितत्वे साध्ये प्रसक्तस्य पृथिव्याद्याश्रितत्वस्य बाधा
न्नहि विषयानुमितेरसंभवात् शिष्यमाणमाकाशाश्रितत्वमेवानुमितिविषयीभवतीति भावः प्रदर्शयिष्यमाण
स्पर्शादिवृत्तित्वाभावस्य साधनोपयुक्तं शब्दस्य विशेषगुणत्वं साधयति शब्द इति अत्र विशेषगुणत्वं यावद्द्रव्यवृत्ति
संख्यादिरूपसाधारणभिन्नगुणत्वमेतावतैव दिगादिवृत्तित्वाभावसिद्धेः ननु पारिभाषिकगुरुत्वादिभेदघटि
तविशेषगुणत्वे विवक्षितेऽप्रयोजनाभावात् अत्र रूपत्वादिजातौ व्यभिचारवारणाय हेतौ सामान्यवत्त्वे सती

प्रसक्तप्रतिषेधेऽन्यत्राप्रसंगाच्छिष्यमाणे संप्रत्ययः परिशेषः तथाहि शब्दस्तावद्विशेषगुणः सामान्यवत्वे
सत्यस्मदादिबाह्यैकेन्द्रियग्राह्यत्वात् रूपादिवत् गुणश्च गुणाश्रित एव न चास्य पृथिव्यादिचतुष्टयमा
त्मा च गुणी भवितुमर्हति श्रोत्रेन्द्रियग्राह्यत्वात् पृथिव्यादिगुणानां श्रोत्रेणाग्रह्यते यथा रूपाद
यः शब्दस्तु श्रोत्रेण गृह्यते न च दिक्कालमनसां गुणो विशेषगुणत्वात् अतएभ्योऽतिरिक्तः शब्दस्य

तिविशेषणम् एकेन्द्रियग्राह्यत्वमेकेन्द्रियमात्रग्राह्यत्वम् सत्तागुणत्वान्यद्वीन्द्रियग्राह्यजातिशून्यत्वमित्यर्थः अतो दैवादे
केन्द्रियग्राह्ये चुटादौ कर्मणि च न व्यभिचारः तत्र चलत्वस्य संख्यात्वस्य कर्मत्वस्य च तादृशजातेः सत्त्वात् रूपत्वादेर
पि मनसा सह द्वीन्द्रियग्राह्यत्वाद्बाह्येति यगजचमोदिरूपत्वादेरपि द्वीन्द्रियग्राह्यत्वमतोऽस्मदादीति तदर्थश्च
ग्रहणस्य लौकिकप्रत्यक्षरूपता तथाच शब्दगुणः सामान्यवत्वे सति बहिरिन्द्रियद्वयजन्यलौकिकसाक्षात्का
रविषयसत्तागुणत्वान्यजातिशून्यत्वात् रूपादिवदनुमानं वोध्यम् विशेषवारणाय सत्तागुणत्वान्येति
रूपत्वादावपि निरुक्तसाध्यस्य सत्त्वान्न व्यभिचारः शब्दस्पर्शान्यतरत्वादिसत्त्वाद्विशेषवारणाय जातीति परि
शेषानुमानमाह गुणश्चेति शब्दो द्रव्याश्रितः गुणत्वाद्रूपादिवदित्यनुमानादिति भावः अत्र सामान्यतः प्रस
क्तस्य पृथिव्यादिवृत्तित्वस्य प्रतिषेधं दर्शयति नचेति शब्दो न पृथिव्यादिगुणः श्रोत्रग्राह्यत्वाद्रूपादिरिति केवले

८१

61

सचलात्रवादेकएवसिद्धातीमार्हि सचैकइतिनतुनानादेशेषुशब्दोपलंभानुपपत्तिरेवभेदप्रमाणंभविष्यतीत्यतआह एक
त्वेनचेति विभुत्वादेवसर्वत्रशब्दोपलंभसंभवात् इतिभावः सामान्यस्येति अनेकसमवेतत्वेसतिनित्यत्वमेवसामा
न्यत्वमितिभावः परमाण्वादीनदेकत्वादौचातिव्याप्तिवारणायसत्यन्तम् संयोगादावतिव्याप्तिवारणायनित्यमि
ति एकत्वेपिसर्वत्रशब्दाद्युपलंभसमर्थनायाह विभुत्वेति अनवच्छिन्नपरिमाणवत्त्वमित्यभिप्रायः पर
ममहदिति सर्वमूर्त्तद्रव्यसंयोगित्वंविभुत्वमवबोध्यम् विभुत्वसाधकमाह सर्वत्रेति कार्यस्यशब्दस्यसर्वत्रोपल
ब्धेः सर्वत्रैवकारणस्याकाशस्यानुमितेरेकस्यविभुत्वमायातीतिभावः नित्यत्वेसाधकमाह अतएवेति अतएवा
व्यहितप्रतिपादनादेवविभुत्वादिति सामानाधिकरण्येनान्वयः अत्रदर्पयवलमाकाशमितिप्रतीतिःपार्थिव
वलप्रभामण्डलसंवध्याल्लोहितस्फटिकइतिप्रतीतिवत् निर्मलेनभसिनीलरूपप्रतीतिः किमीपार्थिवीरत्न
भगवान्पतञ्जलिः भगोलमध्यवर्तिनःसुमेरोःपूर्वादिक्रमेणपद्मरागेन्द्रनीलरजतसुवर्णमयानिचत्वारिशृ

सचैकोभेदप्रमाणाभावात् एकत्वेनचोपपत्तेःएकत्वेनचाकाशत्वंनामसामान्यमाकाशेनविद्यते सामा
न्यस्यानेकवृत्तित्वात् विभुचाकाशपरममहत्परिमाणवदित्यर्थः सर्वत्रकार्योपलब्धेःअतएवविभुत्वा
न्नित्यत्वमितिकालोदिग्विपरीतपरत्वानमेयःसंख्यापरिमाणपृथक्त्वसंयोगविभागवान् एकोनि

ङ्गाणिरहितेषुशिखरस्येन्द्रनीलस्यप्रभयात्रनीलमाकाशमुपलभ्यते अन्यत्रसितपीतादीनि केचित्तु यथानयनगत
पित्तपीतिमाशंखेआरोप्यते तथा नयनगतश्यामिकापिगगने इतिवदंति तत्रकपिलाद्याःसांख्याःकाशमनुचिता
इतिगुणकिरणावल्यामाचार्याः तदाकपिलादैःप्रभायतानभसिनमहद्वितस्पर्शःकालंलक्षयति कालोदिग्विप
रीतेतिदिग्विपरीतेत्यनेनदिक्कृतपरत्वापरत्वविलक्षणयोःकालिकपरत्वापरत्वयोर्ग्रहणम् तयोश्चप्रत्येकम
नुमापकत्वमभिप्रेतमितिनान्यतरवैयर्थ्यम् इदंचप्रमाणदर्शनापनतुलक्षणम् तेनताहृशपरत्वाद्यनुमेयत्व
स्यतदाश्रयेज्ञत्वाद्वेअन्यत्रचसत्वेपिनातिव्याप्तिःलक्षणंतुपरत्वानाश्रयत्वेसतिविजातीयपरत्वासमवायिकार
णसंयोगाश्रयत्वम् एवमपरत्वघटितलक्षणांतरंबोध्यम् घटादावतिव्याप्तिवारणायसत्यन्तम् दिशितदर्थं
विजातीयेति तस्यपंचमगुणानाह संख्येति एवाद्वित्वाद्यवान्तमानाभावाच्चितिशेषः अतएवनित्यःसजाती
यद्वितीयाभावेनकारणाभावात् विजातीयस्यारंभकत्वाभावाद्विभुत्वनित्यत्वयोरपिमिथोगमकताविभुत्वंचत

कार्यस्यपरत्वादेःसर्वत्रोपलब्धिरितिभावः दैशिकपरत्वाभ्यांविजा
तीयपरत्वापरत्वयोः किंप्रमाणंकथंवाताभ्यांकालस्यानुमानमिति
८१

विपरीतमिति दैशिकपरत्वभिन्नं कालिकपरत्वमित्यर्थः एवमग्रेपि व्याख्येयम् संनिधानादिति संयुक्तसंयोगाल्पीयस्त्वाद्दैशिकपरत्वयोरपरत्वयोरित्यर्थः ॥ ॥

तत्रादौ कालिकयोः परत्वापरत्वयोर्दैशिकवैपरीत्यं दर्शयति सन्निहितइति सन्निहितदेशस्थे दैशिकापरत्वं व्यवहितदेशस्थे च दैशिकपरत्वं अपरकालीने कालिकापरत्वम् चिरकालीने कालिकपरत्वम् इतिहि परत्वापरत्वयोर्व्यवस्थानात्र सन्निहिते दृष्टे व्यवहितेऽपि च सन्निमेव वृद्धे स्वल्पवयस्के तद्व्यपेक्षयायः परत्वव्यवहारः सःकालिकपरत्वेपि बोध्यम् सन्निधानादितिसंयुक्तसंयोगाल्पीयस्त्वाद्दैशिकपरत्वयोरपरत्वयोरित्यर्थः दिग्विपरीतपरत्वे उपसंहरति तदिदमिति ताभ्यांयथाकालानुमानेत दूर्शयति कार्यस्येति अनुमापयतीत्यनेनान्वितम् कारणस्येति भावप्रधानत्निर्देशः दिगादेः कारणत्वस्यासंभवादित्यर्थः अयमाशयः योयेवज्ञतरतपनपरिस्पंदान्तरितजन्मा सन्निहितदेशस्थपरोपमितिप्रत्ययःस्तन्दिक्कृतपरत्वाधीनःतस्यसन्निहितदेशस्थतयादिक्कृतमपरत्वमेव तस्य अपि चदिक्कृत

सन्निहितेवृद्धेसन्निधानादपरत्वार्हे विपरीतंपरत्वंप्रतीयते व्यवहितेयूनिव्यवधानात्परत्वार्हेविपरीतम तदिदंकालिकृतेदिग्विपरीतेपरत्वापरत्वे कार्यसत्कारणस्यदिगादेरसंभवात्कालमेवकारणमनुमापयतिसचैकोपि ॥

तमपरत्वादिसापेक्षे यथा एकस्येदंपरमिदमपरंचेतिकालकृतेतत्रिययेदसर्वस्यैववृद्धःपरोबालोऽपरःयथावर्तमानत्वादिकंसर्वसाधारणत्तद्वत् तथाचनतस्यदिग्जन्यत्वानपृथिव्यादिजन्यत्वंबालेपिपरत्वोत्पत्तिप्रसंगात्नचतपनपरिस्पंदानामेवहेतुत्वमस्त्विति वाच्यम् तेषांतपनसमवेततयाशरीरेसंबंधाभावेनतद्विशिष्टपरत्वादिजनकत्वानुपपत्तेःतस्मात्स्वज्ञतरतपनपरिस्पंदवान्नित्यादिनियामकस्यकालिकसामानाधिकरण्यस्यसिद्धयेकालएकःकल्पनीयः तथाचवृद्धशरीरनिष्ठपरत्वमसमवायिकारणजन्यंजन्यगुणत्वाद्रूपवदितिअनुमानादितरबाधादसमवायिकारणंकालसंयोगएवायातितत्रकालिकसामानाधिकरण्येनवज्ञतरतपनक्रियावत्त्वज्ञानंचापरत्वोत्पत्तौनिमित्तं अल्पतरतपनक्रियावत्त्वज्ञानंचापरत्वोत्पत्तौ विशिष्टबीजत्वादेककालस्यैक

त्वेवर्त्तमानातीतत्वादिभेदप्रमयानुपपत्तेरिति सचैको पीति ॥

गो॰
८२
62

वर्तमानेति स्वध्वंसप्रागभावानधिकरणकालवृत्तित्वं क्रियाया वर्त्तमानत्वं एवं वर्त्तमानध्वंसप्रतियोगित्वमतीतत्वम्
तथा वर्त्तमानप्रागभावप्रतियोगित्वं भविष्यत्वम् तथा च वर्त्तमानरूपया क्रियया सैवोपाधिविशेषणम् तद्रूपादेको
पि कालः संज्ञाभेदं लभते वर्तमानादिक्रियाविशिष्टः कालो वर्तमानइत्युच्यते एवमतीतादिरपि क्रिया च सूर्यादेः जन्य
मात्रमेव कालोपाधिरिति नवीनाः इदमवधेयम् इदानीं घटो नेदानीं घट इत्यादिप्रतीतीनां महाकालविषयत्वानु
पपत्तेः कालोपाधिविषयिताकल्प्यते इति एकस्याप्युपाधिभेदात्संज्ञाभेदे दृष्टान्तमाह पुरुषइवेति एवं क्षणा
दिभेदोपि बोध्यः विभागप्रागभावविशिष्टस्य कर्मणः क्षणरूपकालोपाधित्वात्पूर्वसंयोगविशिष्टस्य द्विक्षण

वर्तमानातीतभविष्यत् क्रियोपाधिवशाद्वर्त्तमानादिव्यपदेशं लभते पुरुषइव पचनादिक्रियोपाधिवशात्पाचकपाठ
कादिव्यपदेशं लभते नित्यत्वविभुत्वे चास्य पूर्ववत् दिक्कालौ नित्यौ विभ्वौ इति संख्यापरिमाणपृथक्त्वसंयोगविभाग
वन्तौ पूर्वपरादिप्रत्ययैरनुमेयौ तेषामन्यनिमित्तत्वासंभवात् ॥

त्वादिक्रमेण पलदण्डमुहूर्ताहोरात्रपक्षभेदा ऊहनीयाः नित्यत्वासाधकत्वाशङ्कायामाह नित्याविति पूर्ववदिति नित्याख्याता
र्थम् दिक्कालत्वयतिदिगेकेति एकत्वादिहेतवः पूर्ववत्बोध्याः अस्याः पञ्चगुणवत्त्वमाह संख्येति तत्र प्रमाणमाह पूर्वा
दीति पूर्वा दिक् दक्षिणा दिगित्यादिप्रतीतीनां यन्निमित्तं तदेव दिगित्यर्थः तत्र यद्दीयवर्षे यस्यां दिशि सूर्योदयः सा पूर्वा त
द्भिन्नाभिमुखस्य पुरुषस्य दक्षिणा दिग्वामभागे तु नरस्य पृष्ठभागे पश्चिमा मस्तकोपरि ऊर्ध्वादिक् पादाधः पतनादयः एवं कोण
चतुष्टयमपि विदिगिति क्रमाद्वहनीयम् एतत्प्रतीतिस्तत्र नष्टयिथ्यादिरूपतनविषयसाध्येति दर्शयति तेषामिति पू
र्वादिप्रत्ययानामित्यर्थः ॥ ८२

तदेव पादयति पूर्वस्मिन्निति तादवस्थ्यादिति स्वरूपतो भेदाभावादित्यर्थः अयंभावः एकस्मिन्नेव वस्तुनि किंचिदपेक्ष
या सूर्योदयसन्निहितत्वात्पूर्वत्वम् किंचिदपेक्षया च तद्विपरीतत्वेन पश्चिमत्वमिति . न तद्विषयाणां प्रतीति
नियामकत्वम् किं त्वदृष्टस्यातिरिक्तद्रव्यातिरिक्तद्रव्यस्य दिश एवेति अस्याश्चैकत्वेन इयमस्मात्पूर्वा न पश्चिमेत्यादिप्र
तीत्यनुपपत्तेः एवमूर्तमात्रस्यैव दिगुपाधित्वे न विषयिणां स्वीकृत्य तदूसाह साचैकेति एवं पूर्वोक्तरीत्या दैशिकपरत्वा
परत्वासमवायिकारणसंयोगाश्रयतया दिक्सिद्धिरूहनीया अत्र वदंति दिक्कालौ नेश्वरादतिरिक्तौ तथाकाश
मपि शब्दादिहेतुतामीश्वरस्यैव संभवेनातिरिक्तकल्पने मानाभावादिति तन्न युक्तम् शब्दस्येश्वरात्मगुण
त्वे अन्येषामप्रत्यक्षविषयिता न स्यात् आत्मगुणानामन्याप्रत्यक्षत्वात् अन्यथा तिप्रसंगात् कालिकदै
दैशिकपरत्वापरत्वयोः परस्परवैलक्षण्यं च न स्यात् समानसामग्रीकत्वात् अपि च शब्दादिकं प्रत्यपि क्लृप्तत्वा
दीश्वरस्यैव हेतुतायाम् अनन्तजीवात्मव्याप्तशरीरादाय विनिगमनाविरहादेकमीनरीत्या आकाशं कल्प्यते एवं का

पूर्वस्मिन्पश्चिमेवाव तत्तनस्तादवस्थ्यात् साचैकापि सविकल्पैस्तैर्देशसंयोगोपाधिवशात्प्राच्यादिव्यपदेश ४६ कि
लभते आत्मत्वसंबंधवानात्मा सुखदुःखादिवैचित्र्यान्नानाभूतः सर्वोक्तपद नसामान्यगुणाः स हि न.

लादावपि वाच्यम् अन्यथा ईश्वरोपि न सिध्येत् तेनिःसकर्तृकत्वानुमानेन जीवस्य कर्तृत्वसिद्धेर्वा नित्यज्ञानादिम
त्वसिद्ध्या च विनार्थान्तरसंभवात् तस्माज्जीवेष्वविनिगमनाविरहात्सर्वत्र नित्यज्ञानादिकल्पने गौरवाल्लाघवेनै
केश्वरात्मा तथा कल्प्य एवं च प्रकृतेपि कल्प्यम् न च ईश्वरस्य कार्यमात्रहेतुत्वक्लृप्तत्वेन जीवात्मनामीश्वरस्य शब्दादि
हेतुतायां विनिगमकमस्तीति वाच्यम् शब्दं प्रतीश्वरस्य समवायिकारणतायाः परत्वादिकं प्रतीश्वरसंयोगस्यासमवा
यिकारणतायाश्च क्लृप्तत्वेन तुल्यत्वात् तस्यत्वात् निमित्तकारणत्वेन विशिष्टमेव न चाकाशस्यापि शब्दसमवायि
कारणत्वेन तथैव विनिगमनाविरहस्त्विति वाच्यम् विनिगमनाविरहकल्पितस्यैव विनिगमकत्वात् उस्यादिस्व
यमूहनीयम् क्रमप्राप्तमात्मानं लक्षयति आत्मत्वेति व्याख्यातं प्राक् आत्मत्वस्य जातित्वसिद्ध्यर्थं पूर्वोक्तम
प्यात्मव्यक्तीनामात्मत्वस्य युक्तिकमाह सुखदुःखादीति इदमपि प्राग्व्याख्यातम् देहादतिरिक्तात्मनि प्र
माणकादातांयावद्द्वादिगुणलिंगकउनिसर्वोक्तेस्मारयति सर्वोक्तपदेनेति च तस्येह प्रत्याख्यानवत्तमस्पर्शपति

वोध्यम् संयोगश्चात्मसमवाय्यात्माग्राहके इन्द्रियत्वे लक्षणादिप्रसंगस्तथा आत्मग्राहकचक्षुरादावतिचारणाय संयोगेन द्रव्यादिग्राहके तत्रैवा तिव्याप्तेरात्मपदं संयोगनाल्पसमाहातश्चकारः शरीरे तिव्याप्तेरि न्द्रियपदं तदुक्तसंयोगस्यैव ज्ञानसामान्ये हेतुता मनस्त्वमात्मसंयोग स्पेतिनत त्रातिव्याप्तिः ॥

६३ 63

बुद्ध्यादयस्त्विति बुद्धिसुखदुःखेच्छाद्वेषप्रयत्नधर्माधर्मभावनाख्या नवेत्यर्थः पूर्ववदितिसंख्यादयः कार्योपलब्धेर्विभुत्वं मितं च
चविभुत्वादित्यर्थः मनोलक्षयतिमनस्त्वेति मनस्त्वं सामान्यविशेषः स च दिकारणतावच्छेदकतया सिद्धः तेनाभिसंबंधा
त्समवायात् मनस्तदेभ्योभिद्यते इति शेषः तच्च मनो विभुः तिर्यन्द्रियत्वाच्छ्रोत्रवत् ज्ञानासमवायिकारणसंयोगाश्रयत्वा
दात्मवत् विशेषगुणशून्यद्रव्यत्वादिक्कालवत् ताद्यनुमानेस न्नसो विभुत्वमिति मीमांसकास्तन्मतनिराकरणाया
णुपरिमाणमिति अयमभिप्रायः श्रोत्रादीनां सर्वेषामिन्द्रियाणां स्वस्वविषयसन्निकर्षेपि व्यासंगवशात्किंचिदिन्द्रि
यजन्यं न भवतीत्यनुभवः व्यासंगान्यथानुपपत्तिसिद्धत्वात् तत्र च मनो यदि विभुः स्यात्तदेकदा सर्वत्र संयोगसंभवा
त्सर्वेन्द्रियजन्यज्ञानं स्यात्तस्मादणुमनः तस्य च यदिन्द्रियेण संबन्धस्तज्जन्यं ज्ञानं जायते येन सह संबन्धो नास्ति तज्जन्यं ज्ञा
यत उत्पन्नमपि नेति तथा मनसो विभुत्वे तेन सह विभोरात्मनः संयोगो न स्यात् कालादिवत् क्रियादेः संयोगकारणस्यासंभ
वात् सुषुप्तिकालेपि तस्य ज्ञानोत्पत्तिप्रसंगात्तच्च एवं क्रमेणाणु सिद्धे मनसोणुत्वे मनसो विभुत्वानुमानानामप्रयोजक
त्वं वाधितत्वं वाध्यम् न च विभुत्वस्य वनियामिका अन्यथासत्यपि श्रोत्रमनोयोगे विभुत्वे तस्यैव शब्दस्य ग्रहो नान्यस्ये

बुद्ध्यादयो नव विशेषगुणाः विभुत्वमिति पूर्ववत् मनस्त्वाभिसंबन्धान्मनः अन्तरिन्द्रियम् अणुपरिमाणं वा
इन्द्रियसंयोगी ॥

तिनियमो न स्यात् तस्माद्व्यासंगस्थले विभुत्वेन तस्यैव बोधः इति मनो वैयर्थ्येपि नत्वतिविततिवाच्यम् सर्वत्र विभुत्वाद्याहेतुत्वे
मानाभावात् ग्राह्यविभुत्वेन तस्यापि द्वित्रादेर्ग्रहणात् एककालीनशब्दे शब्दावस्थापि निहं हे विभुत्वापानुपपत्तेः फलवेला
त् एवं गीतादौ प्रणिधानस्येति वाच्यम् यत मनसो विभुत्वे मनः संयोगस्यासमवायिकारणस्य सार्वत्रिकत्वात्सर्वत्रैव
शरीरे स्त्वावास्युपलंभापतिरिति तन्न मनसो विभुत्वेपि चेष्टनादिसंयोगो यदवच्छेदेन तदवच्छेदेनैव स्त्वावास्युपलब्धेः संभ
वात् मनसोणुत्वे पदैप्रातस्यावश्यं वाच्यत्वादन्यथा गादेशतापत्तेः एवं दीर्घशष्कुलीभक्षणादिस्थलेपि चेन्द्रियजन्यज्ञाना
नां योगपद्यभ्रमः सूक्ष्मकालानां भेदाग्रहणात् एवं विशालेमल्पवच्छेदेन युगपत्क्रियायाजनकयत्नेषु बोध्यम् एकप
त्वं वायत्नो विशालक्रियाजनकः कल्पनीयः काश्चिदत्तु मनोवयवि तस्य संकोचविकाशाभ्यामेव व्यासंगस्यापि चेन्द्रियजन्यज्ञा
नयोगपद्यस्योपपत्तिरित्याहुस्तन्नेदम् संकोचविकाशौ प्रत्यहं विशेषयोरेव नियामकत्वमवश्यं वाच्यम् तथा च ताभ्यामे
व व्यासंगाद्युपपत्तौ मनोवयवानां तत्कारणाभावादीनां चकल्पनायां गौरवात् लाघवेन निरवयवस्यैव कल्पनात् न
चादृष्टादेवव्यासंगस्थले ज्ञानाभावोपपत्तौ मनसो विभुत्वे मेलकतिवाच्यम् इन्द्रियसन्निकर्षादिरूपादृष्टसामग्रीस
भावा

मवायेनादृष्टस्यावश्यकत्वात् अन्यथा चक्षुरादेरप्यनंगीकारापत्तेः अ
पादेरदृष्टविशेषाभावादेव रूपादिविषयकप्रत्यक्षाभावोपपत्तेरित्यल
मनुमानस्यायमर्थानस्माद् संयोगीति यद्यपि संख्यादिगुणवत्त्वमस्त्येव
तदुपमानलये देमर्थोरि तथापि संयोग्यन्तरविनिपमित्येकसायमस्य

६३

साधर्म्यान्तरकथनमुद्रया प्रमाणं सूचयति महत्वादीति लाघवादिति शेषः अष्टगुणवत्वं दर्शयति संख्यादीति संख्यापरिमाण
पृथक्त्वसंयोगविभागपरत्वापरत्वसंस्कारवदित्यर्थः ननु संख्यादिपदेन विभागांतपंचगुणवत्तामात्रमूर्तत्वेन नदैशिकप
रत्वापरत्ववेगानामपि संभवात् अत एव मूर्तत्वान्तरत्वापरत्वे संस्कारश्चेति भाष्यम् क्वचित्पुस्तके संख्यादिपंचगुणवत्वे गव
चेति पाठ तत्र चकाराद्दैशिकपरत्वापरत्वयोरपि ग्रहणात् वहिरिन्द्रियसहकारितां मनसो दर्शयति तत्संयोगेति आत्मसं
योगेन त्वक्संयोगेन वहिरिन्द्रियसंयोगेन च व्यापारेण वहिरिन्द्रियजन्यविषयप्रत्यक्षे कारणमित्यर्थः प्राणमनःसंयो
ग प्राणीरमनःसंयोगयोरपि ज्ञानहेतुत्वेनावपीति बोध्यम् अत एवेति यत आत्मग्राहकं सत्वाद्युपलम्भकं वहिरिन्द्रिया
दि ग्राहकं च मनः अत एवेत्यर्थः सर्वजन्यज्ञानकारणमित्यर्थः तेनेश्वरज्ञानस्य नित्यत्वेपि न सर्वपदासंगतिः एवं सूचिते
प्रमाणमुपदर्शयितुमवितारयति तत्र प्रत्यक्षमिति अणुत्वान्नीरूपत्वाच्चेति शेषः अनुमानं दर्शयति सुखदुःखा
द्युपलब्धयश्चेति चक्षुरतिरिक्तकरणसाध्या अंधादेरसत्यपि चक्षुषि जायमानत्वात् एवं त्वगतिरिक्तकरणसाध्या
कुष्ठादेरसत्यपि त्वगिन्द्रिये जायमानत्वादित्यादिक्रमेण प्रत्येकं वहिरिन्द्रियातिरिक्तकरणसाधनम् श्रोत्रसाध्य ।

सुखाद्युपलब्धिकरणं नित्यं संख्यादिगुणवत् न तत्संयोगो वाह्येन्द्रियमर्थग्राहकं अत एव सर्वोपलब्धिसा
धनमिन्द्रियं तत्र प्रत्यक्षमपि अनुमानगम्यं तथा हि सुखदुःखाद्युपलब्धयः चक्षुराद्यतिरिक्तकरणसाध्याः
असत्स्वपि चक्षुरादिषु जायमानत्वात् छिदावत् अतो सुखदुःखाद्युपलब्धिप्रतियच्च कारणं तन्मनः तच्चाणुपरिमा

णविशेषोपविशेषोपनिवद्धकर्तृणि शक्त्यभावादेवाभावः चाक्षुषादीनामभिचारात् तत्रापि चक्षुषीत्यादिकं निमेषा
भिचारवारणाय स्मायसिद्धेतानायमानत्वादिति तेन सर्वव हिरिन्द्रियसमसत्त्वीवतः कस्मात् मे भेदेन विशेषणासिद्धि
रिति प्रत्युक्तम् असत्स्वपि व्यापाररहितेष्वपीत्यर्थः इति कश्चित् पदार्थमेतावल्लभ्यं साध्यं दर्शयति यत्वेति तावता ज्ञा
नोपनीतमिति निकर्षेरेकत्वमिव सत्वोपलब्धिकरणसाधनत्वमनुमितो विषयीभवतीति दर्शितपूर्वोक्तमनसो
णुपरिमाणत्वमनुवदति तच्चाणुपरिमाणमिति मनसो वपवितेन दवयवानां कार्येकारणाभावान्नाव कल्पना गौ
रवम् विभुत्वे चात्मनस्तत्संयोगविभागतन्नाशाद्यक्तीनां च गौरवम् पूर्वोक्तयुक्तिविरोधश्चेति लाघवेणाणुपरिमाणमेव
मनः कल्प्यत इति भावः इदं तु विधेयम् मनसो नित्यत्वे अणुत्वाभावेपि न क्षतिः पृथिव्यादिचतुष्टयान्यतमपरिमाणोपे

गो. ६४

64

द्रव्यपदार्थानन्तरं गुणपदार्थं निरूपयितुं द्रव्याश्रितत्वादिना गुणनिरूपणं द्रव्यनिरूपणाधीनमिति दर्शयति द्रव्याणीति अत्र द्रव्या-
ण्युक्तानीत्यनेन द्रव्यनिरूपणस्य सिद्धत्वं दर्शितं गुणा उच्यन्त इत्यनेन गुणनिरूपणस्य साध्यता दर्शिता तथा च सिद्धसाध्यसम
भिव्याहारलभ्यो हेतुहेतुमद्भावः सिद्धस्य द्रव्यनिरूपणस्य हेतुता साध्यस्य गुणनिरूपणस्य कार्यतेत्यर्थः यथा मलिनेन वपुः स्ना
यादित्यत्र सिद्धस्य वपुर्मालिन्यस्य साध्यस्नानं प्रति हेतुता प्रतीयते तद्वत् गुणलक्षणमाह सामान्यवानिति जात्यादावतिव्याप्ति
वारणाय सामान्यवानिति समवायसंबन्धेन जातिमत्वे सतीत्यर्थः तेनैकार्थसमवायादिना सामान्यादेरपि सामान्यवत्वान्ना
तिव्याप्तिवारणाय असमवायिकारणमिति न समवायिकारणम् समवायिकारणभिन्नो द्रव्यभिन्न इत्यर्थः नतु पारिभा
षिकमसमवायिकारणमित्यर्थः तथा सत्यदृष्टादावव्याप्तेः असमवायिकारणवृत्तिसत्ताव्याप्यजातिमत्वं तेन सामान्यादाव
तिव्याप्तिनिरासे सामान्यवानिति पदवैयर्थ्यात् असमवायिकारणवृत्तिजातिशून्यार्थकत्वे पुनरप्यदृष्टादावव्याप्तिः धर्म
त्वादिजातिसत्वात् यच्चासमवायिकारणवृत्तिसत्तासाक्षाद्व्याप्यजातिशून्यत्वमत्वमर्थ उच्यते तदा यद्यपि यथासन्नि

द्रव्याण्युक्तानि गुणा उच्यन्ते सामान्यवानसमवायिकारणमस्पन्दात्मा गुणः स च द्रव्याश्रित एव रूपरसगन्धस्प-
र्शसंख्यापरिमाणपृथक्त्वसंयोगविभागपरत्वापरत्वगुरुत्वद्रवत्वस्नेहशब्दबुद्धिसुखदुःखेच्छाद्वेषप्रयत्नधर्माधर्म
संस्काराश्चतुर्विंशतिर्गुणाः ॥

केषांचिन्न वैयर्थ्यं तथापि तदपेक्षया द्रव्यभिन्नत्वस्यातिलघुत्वमिति विभावनीयम् कर्मण्यतिव्याप्तिवारणाय अस्पन्दात्मेति
कर्मभिन्न इत्यर्थः गुणसामान्यलक्षणान्तरमाह स चेति द्रव्याश्रितत्वे द्रव्यसमवेतत्वं इदं च यद्यपि कर्मादावतिव्याप्तं तथा
पि द्रव्यसमवेतमात्रवृत्तिनित्यान्यवृत्तिपदार्थविभाजकोपाधिमत्वं गुणत्वमित्यदोषः द्रव्यत्वादावतिव्याप्तिवारणा
य मात्रवृत्त्यन्तम् असमवेतावृत्त्यर्थक एतल्लाभायैव द्रव्याश्रित एवेत्येवपदम् कर्मण्यतिव्याप्तिवारणाय नित्यपदं सामान्या
दावतिव्याप्तिवारणाय अनित्यपदम् सामान्यतो गुणान् लक्षयित्वा विशेषतो गुणान् लक्षणार्थं विभजते रूपेत्यादि चतुर्विंशतीति
ननु चतुर्विंशतित्वसंख्याया गुणरूपाया द्रव्यमात्रवृत्तित्वात् गुणानां चतुर्विंशतित्वयोगः तस्मात्संख्या न गुणा इति त्रयोविं
शतिरेव गुणाः कथं चतुर्विंशतित्वमिति चेन्नैवम् अत्र चतुर्विंशतिशब्दस्य अयमेकोऽयमेकोऽयमेकोऽयमेक इत्याद्यपेक्षाबु
द्धिविशेषविषये निरूढलाक्षणिकत्वात् अयमेक इत्यादौ चैकत्वसंख्याया एकार्थसमवायेनैव भानं सामान्ये सत्त्ववत्
संख्यादौ गुणत्वे तु रूपादीनामिव असमवेतावृत्तिनित्यवृत्तिर्नित्यवृत्तिनित्यवृत्तिजातिमत्वमेव साधकम् द्रव्ये व्यभिचा ६४
रवारणाय वृत्त्यन्तम् कर्मादौ व्यभिचारवारणाय नित्यवृत्तीति जात्यादौ तद्वारणाय जातीति ॥

तत्र तेषु मध्ये रूपं लक्षयति तत्स्वरूपं लक्षणमाह चक्षुर्मात्रेति संख्यादावतिव्याप्तिवारणाय मात्रपदं त्वगग्राह्यत्वे सति च
क्षुर्ग्राह्यं परम् तेन मनोग्राह्यतया नासंभवः प्रभादावतिव्याप्तिवारणाय चग्राह्येति चक्षुर्मात्रग्राह्यं रूपत्वादावतिव्या
प्तिवारणाय पदं प्रभायाः पकत्वेति व्याप्तिवारणाय विशेषेति अत्र चातीन्द्रियरूपाव्याप्तिवारणाय चक्षुर्मात्रग्राह्यविशेषगु
णवृत्तिगुणत्वव्याप्यजातिमत्त्वं वाच्यम् गुणत्वादिमत्तया रसादावतिव्याप्तिवारणाय गुणत्वव्याप्येति रूपरसान्य
तरत्वादिवारणाय जातीति नादृशजातिश्च रूपत्वनीलत्वादिरूपा वा भा चक्षुर्मात्रग्राह्यत्वस्य जातिविशेषगुणत्वेन
लोक्तविशेषपदवैयर्थ्यापत्तेः प्रत्येकत्वस्य तादृशजातिमत्त्वाभावात् त्वगग्राह्यचक्षुर्ग्राह्यगुणवृत्तिजातिमत्त्वमिति
लघुलक्षणं वाच्यम् ग्राह्येति जातिविशेषणं प्रभात्ववारणाय गुणवृत्तीति लक्षणं तस्माद् पृथिव्यामिति पृथिवी
वृत्तिवृत्ति जलवृत्ति तेजोवृत्ति वृत्तिवायुवृत्त्यवृत्तिद्रव्यत्वावृत्तिजातिमत्त्वमित्यर्थः तेन कस्यापि रूपस्य पृथिव्यादि
त्रयवृत्तित्वाभावेपि नासंभवः अत्र विजातीयजलक्रियाजनकतावच्छेदकजलाग्निसंयोगनिष्ठवैजात्यवारणाय

तत्र चक्षुर्मात्रग्राह्यो विशेषगुणः पृथिव्यादित्रयवृत्ति तच्च शुक्लाद्यनेकप्रकारम् ॥

पृथिवीवृत्तीति तथा पृथिवीतेजःसंयोगनिष्ठपाकजरूपादिजनकतावच्छेदकवैजात्यवारणाय जलवृत्तीति रसत्वगुरु
त्वादिकं तेवारणाय तेजोवृत्तिवृत्तीति स्पर्शत्वसंख्यात्वादिवारणाय वायुवृत्त्यवृत्तीति द्रवत्वत्वादिवारणाय द्रव्यत्वावृत्ती
ति तादृशजातिश्च रूपत्वमेव न च तत्र मानाभावः नीलमतेन पाकजन्यनीलत्वमते नैव वा वस्तुतो वाच्यकार्यकारण
भावरूपत्वस्यानवच्छेदकत्वादिति वाच्यम् रूपं रूपमित्याद्यनुगतप्रतीतिसिद्धस्यैव जातिविशेषस्य लाघवात् रूप
पदशक्यतावच्छेदकत्वादिति वाच्यम् रूपपदशक्यतावच्छेदकतया अतीन्द्रियरूपादावपि तत्स्वीकारात् तदवान्त
रभेदानाह तच्च शुक्लेति शुक्लनीलपीतरक्तहरितकपिशचित्रभेदात् सप्तविधमित्यर्थः तत्रावयवशुक्लादिभिरवयविनि शुक्ला
दिकं जन्यते चित्ररूपं प्रति च कपिशावयवानां चित्ररूपं कारणं कथं चित्रवद्रूपाभावः तथाहि यत्र नीलपीतावयवा
भ्यां घटो जन्यते तत्र नीलावयवे नीलेतररूपं च रूपाभावः पीतावयवे च नीलरूपाभाव इत्यवयवयोः षड्भाववता नी
लरूपप्रति नीलेतररूपत्वे प्रतिबन्धकत्वात् तथा पीतादिरूपे प्रतियोगिनां नीलेतररूपत्वेन प्रतिबन्धकतया तत्रावय
विनि न नीलरूपेण वा पीतत्वस्य तत्ररूपत्वेन जन्यरूपत्वेन कार्यकारणभावात् षड्भावसत्वेपि न वायो चित्ररूप

गौ०
६५
65

दिकमेवस्वीकृत्यप्रतिबध्यतावच्छेदकंयुक्तमित्यलंगौरवेणाकेचित्तुयदवच्छेदेननीलरूपंतदवच्छेदेनावयविनिनीलेतररूपेनजा
यतेनत्येवप्रतिबंधकताकल्पनात् अतोनीलकपालावच्छेदेनघटेनीलेरूपंपीतावच्छेदेनचपीतमित्यव्याप्यवृत्त्यनेकरूपवत्वमे
वचित्रत्वमितिनचित्ररूपंप्रतिकार्यकारणभावांतरकल्पनमितिलाघवम् अतलोहितोयस्तुवर्णोनमखपुच्छेचपांडुरस्तथा
दावेकस्यैवावयविनोवच्छेदकभेदेनरूपवत्ताभ्युपेतव्यंतिवदन्ति अन्यस्तुघटोनीलरूपएव लाघवात् पीतत्वादिनैवप्रतिबध्यता
चित्ररूपंप्रतिकारणादिकल्पनेगौरवात् नचाप्रत्यक्षतापत्तिःसाक्षात्परंपरासाधारणेनस्वसमवायिसमवेतत्वसंबन्धे
नैवरूपस्यबहिर्द्रव्यप्रत्यक्षंप्रतिहेतुतासंभवात् अवयवानांनानारूपवत्त्वस्यैवप्रत्ययविषयत्वात् यथा नीलपीतादिनाना
वर्णरंजकद्रव्यसंयुक्तेचित्ररूपरहितेपिपटेचित्ररूपवान्पटइतिप्रतीतिस्तद्वदित्याहुः एककठिनसुकुमारस्पर्शवदवयवा
रब्धेचित्रस्पर्शोपिवाच्यः अन्यथा अवयविनःस्पार्शनविषयत्वानुपपत्तेःसुरभ्यसुरभिकपालारब्धघटस्तुतिगन्धेप
व षडरसाहरीतकीतिप्रतीतिस्त्ववयवविषयिणीतिसांप्रदायिकाःवस्तुतस्तु चित्रस्पर्शोपिमानाभावात्नैयायिकमते
चोद्भूतस्पर्शवद्द्रव्यस्पार्शनंहेतुत्वेनास्तीतिदर्शितं वायुवादे ॥

पार्थिवावृत्तिजातिमत्त्वमित्यादिलक्षणान्तरमपि बोध्यम् ॥ देवै नमः ॥

पाकजं चेति नन्विदं कस्य लक्षणं पाकजरूपस्य चेत् पृथिवीवृत्तित्वे लक्षणान्तर्गते यादावतिव्याप्तिः पृथिवीरूपस्य चेत् पाकजत्वम् तदा आमघटरूपादावव्याप्तिः न च पृथिव्याः पाकजरूपवत्त्वं लक्षणमिति वाच्यम् पृथिवीलक्षणस्याप्रकृतत्वात् पाकजमेत्यनेन पृथिवीग्रहे एवमुक्तत्वाच्चेत्त पृथिवीरूपस्यैवात्र लक्ष्यत्वात् पाकजं चेति चकारेणापाकजमपि समुच्चीयते तथा चापाकजमात्रवृत्तिजातिशून्यरूपत्वमित्यर्थः मणितादिरूपत्वादसंभववारणाय मात्रपदम् अपाकजावृत्तीति यावत् आमरूपत्वादिकमेव वारणाय जातीति सामान्यस्यावतिव्याप्तिवारणाय रूपत्वमिति नाडप्रजातिः शुक्लभास्वरत्वादिरूपा तेजोरूपं लक्षयति शुक्लमिति भास्वरत्वपरप्रकाशकत्वं तेजसस्तेत्यतिव्याप्तिवारणाय शुक्लपदम् जलरूपादिवारणाय भास्वरेति तेजोनिष्ठतावच्छेदकजातिविशेषो वा शुक्लभास्वरत्वम् तेन न सुवर्णरूपेऽव्याप्तिः लक्षणान्तरमाह अपाकजमिति जलावृत्तितेजोवृत्ति पार्थिवावृत्तिजातिमद्रूपत्वमित्यर्थः जलरूपवारणाय तन्नत्वम् आमघटरूपवारणाय जातिघटितम् जलरूपं लक्षयति तदेवेति अत्र लाघवाय शुक्लमनिर्देशः तदेव

पाकजं च पृथिव्यां तत्रानित्यं पृथिवीमात्रगतम् आप्यतैजसपरमाण्वोर्नित्यम् शुक्लभास्वरमपाकजं तेजसि
तदेवाभास्वरमप्सु रसो रसनेन्द्रियग्राह्यो विशेषगुणः ॥

वत्पूर्वोक्तमेव लक्षणमभास्वरं भास्वरपदरहितमभास्वरं चेत्तदाप्सु अप्परूपत्वं लक्षणवाक्यमित्यर्थः यथाश्रुते पूर्वोक्तस्य लक्षणवाक्यस्य शुक्लभास्वरस्यापाकजस्य तैजसरूपस्याभास्वरत्वे जलवृत्तित्वं च यद्यपि तदसंगतेः स्यात् तथा च शुक्लमभास्वरं मपाकजमिति जलरूपस्य लक्षणान्तरपर्यवसितम् आत्मादावतिव्याप्तिवारणाय शुक्लमिति तेजोरूपवारणायाभास्वरमिति पार्थिवशुक्लवारणायापाकजमिति पार्थिवावृत्तिजातिमदित्यर्थः तेन नात्मपार्थिवशुक्लवारणायापाकजमिति पार्थिवावृत्तिजातिमदित्यर्थः तेन नाम पार्थिवशुक्लरूपेऽतिव्याप्तिः नाडप्रजातिश्च नत्यजलरूपजनकतावच्छेदिकासकलजलरूपवृत्तिः जलीयशरीररूपस्यापि स्वरूपयोग्यत्वात् रसं लक्षयति रसनेन्द्रियग्राह्यत्वं रसत्वादावतिव्याप्तमतो विशेषगुण इति गुणविशेषो मणान्तर्व्याप्यजातिमानित्यर्थः तथा च रसनेन्द्रियग्राह्यवृत्तिगुणत्वव्याप्यजातिमत्त्वं रसत्वमित्यर्थः तेनातीन्द्रियरसेनाव्याप्तिः विशेषपदस्यापि न वैयर्थ्यम् क्व

विशस्तके विशेषगुणशून्यः पाठः रसनेन्द्रियग्राह्य इति रू

गो.
८८
66

लक्षणांतरमाह पृथिवीति पृथिवीवृत्तित्वे सति जलवृत्तित्वे सति तेजोऽवृत्तित्वे सति गुरुत्वावृत्तिजातिमत्त्वमित्यर्थः तेनैकस्यापि रसस्य पृथिवीजला
लोभयवृत्तित्वाभावेपि न क्षतिः स्नेहेतिव्याप्तिवारणाय गुरुत्वेतिव्याप्तिवारणाय द्वितीयम् रूपादिवारणाय तेजस्यादि गुरुत्वा
तिव्याप्तिवारणाय गुरुत्वेत्यादि तेन सान्वरूपत्वादिवारणाय जातीति पृथिवीरसं लक्षयति मधुरादीति मधुरलवणक
टुकषायतिक्ताम्लरसाः षड्रसाः पृथिव्यामेवेत्यर्थः तिक्तवृत्तिरसत्वव्याप्यजातिमत्त्वं पृथिवीरसलक्षणमूह्यम् एवं तिक्त
पदस्थाने लवणादिपदप्रक्षेपेणापि लक्षणं बोध्यम् ताहृशजातिश्च पृथिवीजन्यतावच्छेदिकारसवृत्ति मधुरत्वं तु न व्याप्य
पदस्थाने ... पृथिवीरसे तेन न जलरसवृत्तित्वान्मधुररसत्वस्य न संकर्य्यं पाकजश्चेति चकारेणापाकजस्यापि समुच्चयः तेनापाकजमात्र
पृथिवीरसे तेन न जलरसवृत्तित्वान्मधुररसत्वस्य न संकर्य्यं पाकजश्चेति चकारेणापाकजस्यापि समुच्चयः तेनापाकजमात्र
वृत्तिजातिशून्यरसत्वं पृथिवीरसलक्षणमित्यर्थः जलीयरसवारणाय शून्यांतं असंभववारणाय मात्रपदम् पार्थिवा
वृत्त्यर्थकम् पार्थिवापाकजमधुररसे ग्रहापजाचेतनम् सामान्यादिवारणाय रसपदम् जलरसे लक्षयति अपि

पृथिवीजलवृत्तिः तत्र पृथिव्यां मधुरादिषट्प्रकारः पाकजश्च अस्य मधुरो पाकजः नित्यानित्यो नित्यश्च नित्यः
परमाणुभूतः स्वप्रकार्यभूतास्वपक्षनित्यइति पृथिवीमात्रेत्व नित्यमेव गंधो घ्राणेंद्रियग्राह्यो गुणः पृथि

ति मधुरोऽपाकजस्तत्र केचल लक्षणं न लरूपातिव्याप्तिवारणाय मधुरपदं पार्थिवे मधुरेतिव्याप्तिवारणायापाकज इति पाक
जावृत्तिजातिमदर्थकम् तेन न पार्थिवरसेतिव्याप्तिः ताहृशजातिश्च जन्यजलरसस्य लक्षणांतरमाह नित्यो नित्यश्चेति
नित्यानित्यवृत्तिश्चेति नित्यानित्यवृत्तिरसत्वव्याप्यजातिमत्त्वमर्थः तेनैकस्य नित्यानित्यत्वयोर्विरोधान्नासंभवः रसत्वगु
णत्वादिनातिव्याप्तिवारणाय रसत्वव्याप्येति नित्यानित्यरसयोराश्रयभेदं दर्शयति नित्य इत्यादिना गंधलक्षयति गंध
इति रूपादावतिव्याप्तिवारणाय घ्राणेति गंधत्वादिजातावतिव्याप्तिवारणाय गुणइति घ्राणग्राह्यवृत्तिगुणत्वव्याप्यजा
तिमानित्यर्थः तेनातींद्रियगंधे नाव्याप्तिवारणाय गुणत्वव्याप्येति एतत्त्वद्विज्ञाय रूपावृतीति पदप्रक्षेपेण लक्षणल
क्षणांतरमपि बोध्यम् लक्षणांतरमाह पृथिवीवृत्तिजलवृत्त्यवृत्तिगुणत्वसाक्षाद्व्याप्यजातिमत्त्वमित्यर्थः तेन न पृथि
वीमात्रवृत्तिरूपादावतिव्याप्तिः शब्दादावतिवारणाय दृश्यान्तम् रूपादावतिव्याप्तिवारणाय जलेत्यादि पृथिवीत्व
वारणाय गुणत्वेत्यादि नीलत्वादिवारणाय साक्षादिति गुणत्वव्याप्यजात्यव्याप्येति तदर्थः ताहृशजातिर्गंधत्वम् ॥ ८८

प्रीतत्वमित्यर्थः रूपादावतिव्याप्तिवारणाय स्पर्शपदम्
पर्वेऽकर्मेणात्मस्यादिलक्षणंवोध्यम् ॥

तद्वांतरभेदंदर्शयति सुखविशेषजनकीभूतसाक्षात्कारविषयगंधत्वं सुरभित्वम् दुःखविशेषजनकीभूतसाक्षात्का
रविषयगंधत्वमसुरभित्वम् असुरभिगंधग्रहेकस्यचित्सुखोत्पत्तेः सुरभिविशिष्टगंधादिग्रहे दुःखोत्पत्तेश्चाति
व्याप्तिवारणाय लक्षणद्वये विशेषपदे चंदनसद्गंधादिस्पर्शनानां सुखदुःखविशेषजनकत्वादतिव्याप्तेर्लक्षणद्वये
गंधपदे सुरभित्वमसुरभित्वे च जातिविशेषौ वा ननु गंधस्य पृथिवीमात्रवृत्तित्वं कथं तन्न ननु कुसुमादिस्य जले सौरभ्यप्रतो
तेः तथा पुराणनकूपोदकादौ दुर्गंधग्रहादत आह जलादाविति संपृक्तेति जलसंपृक्तपार्थिवावयवे गंधस्य
वापात् इह लोहितस्फटिकइत्यादिवदौपाधिकः प्रत्ययइतिभावः पृथिवीवृत्तिगंधत्वेनैव कार्यकारणकल्पनात् का
लांतरे पार्थिवावयवापगमे तज्जलस्य निर्गंधप्रतीतेश्च ननु च रसेपि च मस्त्विति वाच्यम् यतस्तज्जलादौ पार्थिवाभा
वेपि मधुररसप्रतीतेः लवणरसस्तु तस्यौपाधिकः समुद्रभसामेव जलनामकृतानापार्थिवावयवापगमे तादृशरसाभावाप
त्तेः स्पर्शंलक्षयति स्पर्शइति तत्र चक्षुर्ग्राह्या सते सतीति विशेषणीयम् तेन न संख्यादावतिव्याप्तिः विशेषगुण इतिपाठे

सुरभिश्चासुरभिश्च जलादौ न गंधप्रतिभानं संपृक्तसमवायेन दृष्टव्यम् स्पर्शस्त्वगिन्द्रियग्रा
ह्यो गुणः पृथिव्यादिचतुष्टयवृत्तिः सच त्रिविधः शीतोष्णानुष्णाशीतस्पर्शभेदात् शीतः पयसि
उष्णस्तेजसि ॥

त्वगिन्द्रियमात्रेतिपाठे तरेवाप्यतद्विशेषणेनोपादेयम् बुद्ध्यादावतिव्याप्तेस्त्वगिन्द्रियेति स्पर्शत्वजातावतिव्याप्तेर्गुणइ
ति चक्षुरग्राह्यत्वग्राह्यवृत्तिगुणत्वव्याप्यजातिमत्वमर्थः तेन नातीन्द्रियस्पर्शेऽव्याप्तिः चक्षुरग्राह्यत्वग्राह्यत्वजा
तिमत्वं वा लक्षणं बोध्यम् लक्षणांतरमाह पृथिव्यादीति स्वसमवायिसमवायसंबंधेन पृथिव्यादिचतुष्ट
यवृत्तित्वाभाववज्जातिमत्वमित्यर्थः तेन कस्यापि स्पर्शस्य चतुष्टयवृत्तित्वाभावान्नासंभवः असंभववारणा
यवृत्त्यंतम् वेगत्वसंख्यात्वगुणत्वकर्मत्वादिवारणाय मनउत्पादि जन्यद्रव्यवृत्तिगुणत्वादिरूपेयमवारणा
यजातीति अवांतरभेदानाह सचेति शीतेत्यादि दुःखनियततरीमात्रकंठ्यादिजनकस्पर्शत्वं शीतत्वं कामिनीका
नकस्पर्शेतिव्याप्तिवारणाय दुःखनियतेति खदिरदाहादिजनकस्पर्शत्वमुष्णत्वम् दुःखेतिपदमावृत्तिः एवंच उ
भयत्रापि स्पर्शपदमदृष्टादावतिव्याप्तिवारणाय तदुभयभिन्नस्पर्शत्वमनुष्णाशीतत्वम् वटादावतिव्याप्तिवारणा

पयस्पर्शपदम् प्रीतत्वादिजातिमत्वेऽतिव्याप्तिवारणाय
क्रियापदेन निवृत्तिपदं पत्तिः पदस्य लक्षितत्वात्

पृथिवीवाय्वोरिति पृथिवीवायुस्पर्शान्यतरवृत्तिजलस्पर्शावृत्तिजातिमत्त्वमित्यर्थः रूपादावतिव्याप्तिवारणाय वृत्त्यं
तम् पृथिवीवायुस्पर्शसाधारणस्यैकस्यानुष्णाशीतत्वस्य जातित्वे विवादादसंभववारणायान्यतरेत्या दिस्प
र्शत्वगुणत्वादिवारणाय जलेत्यादि वारणायजलेत्यादिति स्पर्शवृत्त्या जातिरूपम् एकापृथिवीजन्यतावच्छेदिका
अन्याच जन्यवायवीयस्पर्शजनकतावच्छेदिका वायुपरमाणुस्पर्शसाधारणीजातिः प्रसंगाद्रूपादीनां चतुर्णां
प्रत्यक्षत्वातीन्द्रियत्वव्यवस्थामाह तेचेति महत्त्वेति महत्त्वसमवायिनि समवेतत्वे सतीत्यर्थः तेन परमाणुद्व्यणुक
योरूपादीनामतीन्द्रियत्वमतत्समवायिनि परमाणौ द्व्यणुके महत्त्वस्य समवायाभावात् त्रसरेणुस्पर्शस्य तु महत्त्वे
कार्थसमवायेसत्यप्यतीन्द्रियत्व प्रतिबंधकसद्भावावच्छेद्भूतानुद्भूतत्वजातिविशेषः अनुद्भूतत्वजात्यभावोवानेत्र
प्रत्यक्षप्रयोजकम् तेनचक्षुरादिरूपादीनां न प्रत्यक्षत्वादीयितिकृतत्वस्यानुद्भूतरूपादौमानाभावः स्पर्शादौ साध्य ए

अनुष्णाशीतः पृथिवीवायोः पृथिव्यांपाकजः स एवापाकजो वायोः पृथिवीमात्रे तत्वनित्यः आप्यतैजसवायवीयपर
माणुषु नित्यः आद्यादिकार्येष्वनित्यः तेचरूपादयश्चत्वारो महत्त्वैकार्थसमवेतत्वे सत्युद्भूताएव प्रत्यक्षाः संख्या
एकादिव्यवहारहेतुः साच सामान्यगुणः ॥

थिवीत्वादेरप्रयोजकत्वात् लाघवाच्चक्षुरादेर्न्नीरूपत्वमेव नियतारंभे परमाणूनां नीरूपत्वात् अनियतारंभेचक्षु
रादीनां प्रतिबंधकत्वादिति चेन्नेदेति इदम् एतत्तौ अनभिभूतानुत्पत्तिवोध्यम् तेन न स्वर्णीरूपस्य प्रत्यक्ष
ता संख्यालक्षयति संख्येति एकादीति व्यवहित्य सहानीयादानादिकंक्रियते अनेनेति व्यवहारः प्रत्यते तथाच
विषयतयाएकोनेक इत्यादिप्रत्यक्षान्यतमहेतुर्गुणः संख्येत्यर्थः तादृशप्रत्यक्षकारणादृष्टादावतिव्याप्तिवारणा
दृष्टादावतिव्याप्तिवारणायविषयतयेति हेतुपदस्थाने विषयपदप्रक्षेपो वा एकोऽनेको द्वौ त्रय इत्यादि प्रत्यक्षा
णामेकतमोपादाने अन्यत्राव्याप्तिः समुदायोपादाने असंभवस्तस्मात् तमपदम् अयमेकोयद्वेरज्जुत्वादौ घटादे
रपि विषयत्वादतिव्याप्तिवारणाय गुणइति अथवा व्यवह्रियते ज्ञायते अनेनेति व्यवहारः शब्दः तथा चैक
द्व्यादिशब्दान्यतमप्रवृत्तिनिमित्तत्वमसंख्यात्वमित्यर्थः अन्यतमप्रयोजनं पूर्ववत् एकपदप्रवृत्तिनिमित्तस्व
मेकत्वम् द्विपदप्रवृत्तिनिमित्तत्व द्वित्वमित्यादिक्रमेणवोध्यम् दर्शितद्वारणायवाच्योपस्थितेति प्रवृत्तिनिमित्तत्वंच वाच्य

समवायिसमवायेन सकलवृत्तिपरिमाणाद्यवृत्तिधर्मवत्त्वमि
त्यर्थः असंभववारणाय स्वेत्यादि रूपत्वादिवारणाय सकलेति असं
भववारणाय परमेति परिमाणत्वादिवारणाय परि
माणेत्यादि ॥

दि० ८ 67

त्वे सति वाच्यत्वे सति वाच्योपस्थितिप्रकारत्वम् आकृतावतिव्या
प्तिवारणाय वाच्यवृत्तिलक्षणान्तरमाह सामान्येति स्वसमवायि

श्री

८

अवांतरभेदानाहएकत्वादीति आदिपदाद्द्वित्वादिपरिग्रहः एकपदप्रवृत्तिनिमित्तमेकत्वम् स्वसमानाधिकरणमिति यावत्
न संख्यात्वमित्याशयं तेव्याख्येवा यद्वैकत्वस्य ह्रस्वैकत्वव्याप्यतासमानाधिकरणत्वम् द्वित्वादेरपि समानाधिकरणे त्रित्वा
दिव्याप्यत्वाद्यावदिति तथा चैकमात्रव्याप्यताभावान्नातिव्याप्तिः एकपृथक्त्वादिषु त्वव्याप्तिवारणाय संख्येति एवं
त्रित्वशून्यवृत्तित्वे सत्यनेकवृत्तिसंख्यात्वं द्वित्वमित्याद्युत्क्रमेण लक्षणं बोध्यम् नित्रित्वाद्यतिव्याप्तिवारणाय सत्यन्तम्
एकत्ववारणाय अनेकेति परार्द्धेतिरिक्तसंख्यानासीमत्र पुराणादिकमेव प्रमाणम् तथाच विष्णुपुराणे एकं
दश शतं चैव सहस्रम्प्रयुतं तथा लक्षं च नियुतं चैवं कोटिरर्बुदमेव च वृन्दं खर्वं निखर्वं च शङ्खं पद्मं च सागरः अन्त्यम्
मध्यं परार्द्धं च दशवृद्ध्या यथाक्रमं भवति परार्द्धलक्षणं च संख्याव्यक्तांतरामाप्यसंख्याते सभिन्नसंख्यामात्रेतिव्याप्ति
वारणाय आप्यान्तम् एकत्वत्वेनेकस्पैकत्वव्याप्यत्वादसंभववारणाय अन्तिपदम् सत्तापि संख्याप्यत्वादसंभव
इति अन्तरपदम् सभिन्नार्थकम् आकाशादावतिव्याप्तिः संख्येति सर्वासामेव संख्यानां समानाधिकरणाधिकव्यक्ति

एकत्वादिप्रयात्रुपर्येता एकत्वानेकत्वभेदेन द्विधा तत्रैकत्वं द्विविधम् नित्यानित्यभेदात् नित्यगतं नित्यं कार्यगत
मनित्यम् स्वाश्रयसमवायिकारणगतैकत्वजन्यं द्वित्वं चानित्यमेव तच्च पितुरुपोरिदमेकमित्यपेक्षाबुद्ध्याजन्य

न भगवत्यै नमः सरस्वत्यै नमः चण्डिकायै नमः देव्यै नमः ॥

वृत्तिसंख्यांतरव्याप्यत्वात् परार्द्धापेक्षयाधिकवृत्तिसंख्यांतराभावाल्लक्षणसमन्वयः एकत्वलक्षणसमन्वयः एकत्वल
क्षयति नित्येति अनित्यमात्रवृत्तिजातिशून्यसंख्यात्वमेकत्वमित्यर्थः एकत्वादिवारणाय शून्यान्तम् असंभवा
रणाय मात्रेति नित्यानित्यैकत्वयोर्वराणमस्याभाह नित्यगतमित्यादिना अनित्यैकत्वस्य लक्षणान्तरमाह स्वाश्र
येति कारणेकार्यप्रत्याएकत्वासमवायिकारणैकत्वमित्यर्थः कार्यकार्यप्रत्यासत्या एकत्वासमवायिकारण
कद्वित्वाद्यतिव्याप्तिवारणाय कारणैकेत्यादि तादृशपरमाणुद्वित्वासमवायिकारणैकद्व्यणुकपरमाणावार
णायैकत्वेति एतेन स्वसाध्यद्वित्वान्त्यानुगमः द्वित्वं लक्षयति द्वित्वं लक्षयति द्वित्वमिति अनित्यमेवेत्येवका
रो अवधारणार्थः तेनानेकत्वातिव्याप्तिः तेनानित्यसंख्यामात्रवृत्तित्रित्वान्यतद्वृत्तिजातिमत्त्वम् यद्वत्ववारणाय संख्या

स्वरूपसंबंधविशेषः तत्रापि द्वित्वसमवाये एकोनष्टाविति
प्रतीतेः द्वित्वोत्पत्तिविनाशप्रदर्शयति नचेति तच्च द्वि
त्वं च जन्यतु समर्थतत्त्वेनान्वयः इदमेकमिति समूहालंबनात्मिका
मानाविषयिणी एकैवापेक्षाबुद्धिः बुद्धेर्नाशे द्वितीयबुद्धिस्थि
तिकाले प्रथमबुद्धेर्नाशो द्वित्वानुत्पत्तिप्रसंगात् ॥

पदम् त्रिचतुष्टयवारणाय त्रित्वेत्यादि अनेकसंख्यालक्षणे तु
आसत्यवृत्तिसंख्यात्वम् संयोगादिवारणाय संख्येति एक
त्ववारणाय वृत्त्यन्तम् तत्त्वं चैकत्वान्यपर्याप्तिवृत्तित्वं पर्याप्तिः

का॰ २

गो
६८
68

समवायीति घटे पिपीलिकानोदनमित्यादौ समवायिकारणासंभवात् गुणादाविवापेक्षाबुद्धिविषयतया संख्याव्यवहारो
गौण इति भावः अपेक्षाबुद्धिनाशादिति आश्रयनाशविरोधिगुणान्तरयोर्गुणनाशकारणयोरभावान्निमित्तनाशस्यैव द्वित्वादि
नाशकत्वं कल्प्यते अत्र चाद्यबुद्धेर्द्वित्वगुणमात्रावस्थायित्वमपेक्षाबुद्धेर्द्वित्वगुणावस्थायित्वं कल्प्यते तथाहि आदावपेक्षाबुद्ध्युत्प
त्तिर्द्वितीयक्षणे द्वित्वोत्पत्तिस्तृतीयक्षणे विशिष्टबुद्धिकारणीभूतविशेषणज्ञानात्मकद्वित्वत्वनिर्विकल्पकम् तेन च निर्विकल्पक
म् चतुर्थक्षणे द्वित्वविशिष्टबुद्धिमपेक्षाबुद्धिनाशं च जनयति पञ्चमक्षणे द्वौ घटाविति विशिष्टवैशिष्ट्यबुद्धिः अपेक्षाबुद्धिनाशा
त्वनाशश्चेति प्रक्रिया अत्र च यद्यपेक्षाबुद्धिर्द्वित्वगुणमात्रावस्थायिनी स्यात् तदा तृतीयक्षणे अपेक्षाबुद्धिनाशाद्द्वित्वनिर्विकल्प
कोत्पत्तेश्चतुर्थक्षणे द्वित्वनाशाद्विषयाभावाद्द्वित्वस्य सविकल्पकविषयता न स्यात् फलबलान्निर्विकल्पकस्यैवापेक्षाबुद्धि
नाशकत्वं कल्प्यते तदुत्पन्नापेक्षाबुद्धेर्द्वित्वगुणावस्थायित्वं सर्गाद्ये चैवमपेक्षाबुद्धिजन्यपरमाणुद्वित्वादेरदृष्टनाशादेव नाशः न तु

तत्र पिण्डः समवायिकारणम् पिण्डयोरेकत्वे असमवायिकारणम् अपेक्षाबुद्धिर्निमित्तम् अपेक्षाबुद्धिविनाशाद्द्वि
त्वविनाशः एवं त्रित्वाद्युत्पत्तिः परिमाणं मानव्यवहारासाधारणकारणम् मतं चतुर्विधम् अणु महद्दीर्घं ह्रस्वं चेति॥

हेर्नित्यत्वात् न च तत्र द्वित्वे मानाभावः द्व्यणुकपरमाणोत्पादकत्वेनावश्यकत्वात् अत एव संख्याविशेषाच्चेति ईश्वरसा
धकप्रमाणदर्शनावसरे आचार्यैरुक्तम् केचित् सर्वत्रैव बलाद्यवादादृष्टविशेषनाशादेव द्वित्वादिनाशोक्तः अलमपे
क्षाबुद्धेर्द्वित्वगुणावस्थायित्वकल्पनयेति वदन्ति इमामेवोत्पत्तिविनाशप्रक्रियां त्रित्वसंख्यादावतिदिशति एवमिति उ
त्पत्तिवल्लक्षणाविनाशोऽपि बोध्यः परिमाणं लक्षयति परिमाणमिति अत्रापि पूर्ववद्व्यवहारपदं प्रत्यक्षपरम् अ
साधारणकारणं च विषयरूपं बोध्यम् तेनायं ह्रस्वो दीर्घो महानित्यादिप्रतीतिविलक्षणविषयवृत्तिगुणत्वव्याप्यजाति
मत्त्वम् तत्त्वम् रूपादावतिव्याप्तिवारणाय वृत्त्यन्तम् यथाश्रुते ज्ञानानामेकैकोपादाने अन्यत्राव्याप्तिः समुदायोपा
दाने असंभव इति यत्किंचिदित्यादि गुणनादिवारणाय गुणत्वेति परमाणुपरिमाणेऽपि तादृशपरमाणुसत्त्वान्नाति
व्याप्तिः अयमणुरिति प्रत्यक्षज्ञानविषयवृत्तित्वादणुत्वमपि तथा तदवान्तरभेदानाह तच्चेति आद्यादिपदैर्यथासंख्यम् अणु
त्वमहत्त्वदीर्घत्वह्रस्वत्वभेदादित्यर्थः आद्यत्वादयः परिमाणत्वव्याप्यजातिभेदाः ॥

जन्यपरिमाणानामुत्पत्तिप्रकारं दर्शयति तच्चेत्यादिना संख्येति द्वंद्वान्तश्रुतिन्यायेन योनिशब्दः प्रत्येकमभिसंबध्यते संख्यायोनि परिमाणयोनि प्रचययोनि चेत्यर्थः संख्यायोनिपरिमाणमुदाहरति तत्रेति द्वित्वेति ईश्वरापेक्षाबुद्धिद्वित्वजनितत्वादित्यर्थः युक्तिश्च पूर्वं दर्शिता योनिशब्दस्य कारणपरत्वं दर्शयति संख्येति संख्याकारणं यस्येति विग्रहः एवं परिमाणयोन्यादिकमपि बोध्यम् संख्यायोनिपरिमाणांतरमप्युदाहरति त्र्यणुकेति सेति स त्र्यणुकपरिमाणं तदाश्रयस्त्रसरेणुस्तस्य समवायिकारणं द्व्यणुकं तद्गता या बहुत्वसंख्या सैव योनिः कारणं यस्येत्यर्थः द्व्यणुकमहत्त्वप्रतिद्व्यणुकनिष्ठबहुत्वसंख्याया एव समवायिकारणत्र्यणुकपरिमाणस्य जनकत्वादिति भावः परिमाणयोनिपरिमाणमुदाहरति चतुरणुकेति आदिपदाद्घटादिपरिमाणपरिग्रहः सेति स च चतुरणुकपरिमा

तच्च कार्यपरिमाणं प्रचययोनि तद्यथा तत्र द्व्यणुकपरिमाणमीश्वरापेक्षाबुद्धिजन्यपरमाणुद्वित्वजनितत्वात्संख्यायोनिः संख्याकारणमित्यर्थः त्र्यणुकपरिमाणं स्वाश्रयसमवायिकारणगतबहुत्वसंख्यायोनिः चतुरणुकादिपरिमाणं तु स्वाश्रयसमवायिकारणमहत्परिमाणजन्यं तूलपिण्डपरिमाणं तु तत्कारणावयवप्रचययोनि प्रचयस्तु स्वाश्रयसमवायिकारणावयवानां प्रशिथिलः संयोगस्तज्जन्यं परमाणुपरिमाणं परममहत्परिमाणं चाकाशादिगतं नित्यमेव ॥

णं तत्स्वाश्रयस्य चतुरणुकस्य समवायिकारणं त्र्यणुकं तस्य परिमाणं महत्त्वात्तज्जातमित्यर्थः प्रचययोनिपरिमाणमुदाहरति तूलेति स च तूलपरिमाणं तस्याश्रयस्य तूलरूपस्य समवायिकारणभूतानामंशूनां प्रशिथिलः संयोगः प्रचय उत्तथः प्रशिथिलत्वं संयोगत्वावान्तरविशेषः तज्जन्यमिति तज्जन्यमित्यर्थः नित्यपरिमाणं दर्शयति परमाण्विति अत्र परमाणुपदेन मनसोऽपि ग्रहणम् परममहत्परिमाणस्याश्रयं दर्शयति आकाशादीति आदिना कालदिगात्मपरिग्रहः नित्यमेवेत्येवकारो भिन्नक्रमः परमाणुपरिमाणं परममहत्परिमाणं चेति द्वयमेव नित्यमित्यर्थः तेन त्रुटावेव विश्रान्तिरिति त्रुटिमहत्त्वस्यापि नित्यत्वमिति भ्रमच्छेदः ॥

तो॰
दर्
69

पृथक्त्वं लक्षयति पृथक्त्वमिति पूर्वोक्तरीत्यायं घटात् पृथगिति ज्ञानविषयवृत्तिगुणत्वव्याप्यजातिमत्त्वं लक्षणम् पदव्यावृत्तिः पूर्ववत् एतेन पृथक्त्वे प्रमाणमपि दर्शितम् तथाहि पृथक्त्वस्य गुणस्य नान्योन्याभावेन गतार्थता घटः पटो न घटः पटात् पृथगिति प्रतीत्योः सावधिकनिरवधिकपदार्थविषयतया भिन्नविषयत्वादिति सांप्रदायिकाः एकदेशिनस्तु अत्रापि च पृथगिति प्रतीत्योः सावधिकनिरवधिकपदार्थविषयतया भिन्नविषयत्वादिति ... अव्ययनिपातातिरिक्तानामार्थयोः सादाङ्क्षदान्वयस्याव्युत्पत्तेः घटो न पटः इत्यादौ सादाद्देवान्वयात् पयदविभक्तेरत्र तु अव्ययनिपातातिरिक्तेति अव्ययपरादिशब्दानां पृथगाद्यव्ययविशेषाणां च पञ्चम्यपेक्षात् तस्मादन्योन्याभाव एव पृथक्त्वमस्त्र नएव घटादन्यः पृथगित्यादिकं गुणादिषु पृथक्त्वप्रतीतिविशेषदर्शिनामप्युपपद्यतऽनुवृत्तिवत् तदवान्तरभेदानाह न चेति द्विपृथक्त्वमिति व्यासज्यवृत्ति पृथक्त्वमित्यर्थः तेन त्रिपृथक्त्वादिसंग्रहः एकत्वसमानमिति नित्यानां परमाण्वाका शादीनामेकपृथक्त्वं नित्यमनित्यानां कारणगतैकपृथक्त्वासमवायिकारणमपेक्षाबुद्धिर्निमितम् अपेक्षाबुद्धिनाशाद्धि

पृथक्त्वं पृथग्व्यवहारासाधारणं कारणम् तच्च द्विविधं एकपृथक्त्वं द्विपृथक्त्वं च तत्राद्यमेकत्वसमानं द्विपृथक्त्वं द्वित्वसमानम् संयोगः संयुक्तव्यवहारहेतुः सर्वद्रव्याश्रयः अव्याप्यवृत्तिश्च ॥

त्वनाशादित्यर्थः एवं त्रिपृथक्त्वादावप्यूहनीयम् संयोगं लक्षयति संयुक्तेति अनेनेदं संयुक्तमिति प्रतीतिविषयवृत्तिगुणत्वव्याप्यजातिमत्त्वमिति पूर्ववद्बोध्यम् एतस्य च सर्वथा रूपाप्राप्तिपूर्विका प्राप्तिरिति लक्षणं पूर्वमेव व्याख्यातम् घटासमवायिकारणगुणत्वव्याप्यजातिमत्त्वं संयोगत्वमित्यादिरीत्यापि लक्षणीयम् लक्षणान्तरमाह द्व्याश्रयवृत्ति व्यासज्यवृत्तिरित्यर्थः समवायेन प्रत्येकवृत्तित्वेपि पर्याप्त्या स्वरूपसंबन्धेनोभयाश्रितत्वमेव नैकाश्रितत्वं संयोगस्येत्यर्थः इदं च यद्यपि द्वित्वादिसंख्यायामप्यस्ति तथापि व्यासज्यवृत्तिमात्रवृत्तिगुणत्वसाक्षाद्व्याप्यजातिमत्त्वं बोध्यम् संख्या त्वादिवारणीयमात्रपदम् रूपत्वादिवारणाय वृत्त्यन्तम् विभागत्ववारणाय विभागत्वादिद्वित्ववारणाय गुणेत्वेति लक्षणान्तरमप्याह अव्याप्येति जन्यप्रत्यक्षवृत्तित्वे सति स्वसमानाधिकरणाभावप्रतियोगिविभागभिन्न गुणत्वमित्यर्थः शब्दबुद्ध्यादिवारणाय सत्यन्तम् रूपादिवारणाय स्वेत्यादि विभागवारणाय भिन्नान्तम् घटादि वारणाय गुणपदम् ॥

अवांतरभेदानाह सचेति अन्यतरेति क्रियाभाववत्समवेतत्वे सति क्रियावत्समवेतसंयोगत्वमन्यतरकर्मजसंयोगत्वम् उभयक
र्मजेति स्वाश्रयविभागकारणाप्रयत्नत्वम् संयोगजसंयोगकारणायक्रियेत्यादिनाद्वितीयविभागकारणायसंयोगेति स्वजनकक्रिया
भाववद्समवेतसंयोगत्वमुभयकर्मजसंयोगत्वमुभयकर्मजसंयोगत्वम् कंपमानपाण्यादौ स्वपनमात्रक्रियाजन्यसंयोगत्वा
म् एवंरूपेण त्रैविध्यम् अन्यथा कर्मजत्वत्वावच्छेदकजातिद्वयवत्त्वाद्वैविध्यमेवस्यात् उभयकर्मजस्यलेपिकर्मत्वे

सचद्विविधः कर्मजसंयोगजश्चेति तत्रापिकर्मजोद्विविधःअन्यतरकर्मजःउभयकर्मजश्च तत्रान्यतरकर्मजो
यथा क्रियावता श्येनेनसहस्थितिक्रियस्याणोः संयोगः अस्पष्टत्वेन क्रियाश्रमवायिकारणम् उभयक
र्मजो यथा द्वयोःसक्रिययोर्मल्लयोर्मेषयोर्वासंयोगः (अस्पष्टत्वेन क्रियाश्च) संयोगजश्च यथा कारणा
कारणसंयोगात्कार्याकार्यसंयोगः देहेनतमः ॥

नैवकारणता तदुभयपादिकेन कार्यनिष्ठत्वेनात्वनियामकम् किंत्वार्थसमाजः अन्यथोभयदंडजचटादावपिवेजा
त्यापत्तेः कारणाकारणेति अत्रकारणसंयोगजसंयोगाश्रयीभूतैकव्यक्तेः समवायिकारणम् अकारणम् तद्व्य
क्तेरेवकारणभिन्नंतयोःसंयोगात्कार्यस्यपूर्वोक्तव्यक्तिरूपस्याकार्यस्यचपूर्वोक्तसमवायिकारणभिन्नस्यपूर्वोक्ता

नं ।

कारणाकारणसंयोगजसंयोगः

70

गु॰ १

हस्तेति हस्तः कायस्य समवायिकारणम् तरुः कारणं तयोः संयोगेन जनितः कायस्य हस्तकार्यस्य च संयोगो यथेत्यर्थः
संयोगनाशस्तु स्वसमानाश्रयविभागाद्ध्वंसः च तत्र विभागस्तेपि घटपटसंयोगनाशात्वेमादि क्वचिन्न द्र
व्यनाशात्संयोगनाशः यथा कपालनाशात्कपालद्वयसंयोगनाशः अनित्यद्रव्ययोः संयोग इति मीमांसकाः तन्न नि
त्ययोः परमाण्वाकाशादिकयोरन्यतरकर्मजत्वात् परमाणुद्वयोस्तूभयकर्मजोपि नित्ययदमत्र विभुपरे चैतयोः
संयोगे मानाभावात् न चाकाशकालादिना संयुज्यते द्रव्यत्वाच्छरीरवदित्यनुमानमेव मानम् न चायं संयोगः
कर्मजः निष्क्रियमात्रवृत्तित्वात् नापि संयोगजः निरवयवमात्रवृत्तित्वात् तथा च पक्षधर्मतावलादजन्य एवासौ इति वाच्यम्
आकाशकालादिना न संयुज्यते निष्क्रियत्वे सति निरवयवत्वात् रूपादिवदित्यनेन सव्यतिपक्षत्वात् परमाणोर्व्यभिचा
रवारणाय सत्यन्तम् संयोगजसंयोगवति निष्क्रिये च घटादौ न व्यभिचारवारणाय विशेष्यम् अजसंयोगग्राहकेनानुमानेन
अजविभागस्यापि साधने विरोधात् न हि तदेव तदानीं संयुक्तं तद्विभक्तं चेति संभवति तस्माद्द्रव्यत्वादिहेतुरप्र
योजकोवाध्यः विभागलक्षयति विभाग इत्यादिना अनेनेदं विभक्तमिति प्रतीतिविषयः गुणत्वव्याप्यजातिम

यथा हस्ततरुसंयोगेन कायतरुसंयोगः विभागोपि विभक्तप्रत्ययहेतुः संयोगपूर्वो द्वाश्रयः स त्रिविधः अन्य
तरकर्मज उभयकर्मज विभागजश्चेति तत्र प्रथमो यथा श्येनक्रियया निष्क्रियपर्वततो विभागः द्विती
यो यथा मल्लयोर्मेषयोर्वा विभागः तृतीयो हस्ततरुविभागात्कायतरुविभाग ॥

त्वम् तत्त्वमित्यर्थः लक्षणान्तरमाह संयोगेति नासंयुक्तस्य विभाग उक्ते संयोगनाशकत्वे सति संयोगजन्यत्वं लक्ष
णम् भिन्निभावः संयोगजसंयोगादावतिव्याप्तिवारणाय सत्यन्तम् संयोगादौ तद्वारणाय विशेष्यम् यद्यपि ए
वमपि संयोगजसंयोगे अतिव्याप्तिस्तथापि यत्संयोगनाशकत्वं तत्संयोगजन्यत्वं विवक्षितम् संयोगजसंयो
गस्तु स्वस्य नाशकोन्यसंयोगजश्चेति न दोषः असंयुक्तकालाकाशयोर्विभक्तप्रतीतिः संयोगाभावविषया सं
युक्तत्वाभावेन विभागाभावात् द्वाश्रय इति संयोगप्रकरणोक्तलक्षणे विभागावृत्तिपदस्थाने संयोगावृ
त्तिपदस्थाने संयोगावृत्तिपदप्रक्षेपेणात्र तदेव लक्षणं स प्रयोजनं बोध्यम् एवमन्यतरकर्मजविभागलक्षणेपि ए

परत्वापरत्वे लक्षयति परत्वेत्यादिना अत्र परत्वापरत्वयोः परस्परसापेक्षत्वाल्लाघवाच्च ग्रहणद्वयमेकग्रन्थेनैव निरूपितवान् अत्रापि एवं
वद्व्यवहारस्य प्रमत्वात्तस्यासाधारणकारणत्वं विषयतया बोध्यम् तेनायमस्मात्परः इति प्रतीतिविषयवृत्तिगुणत्वव्याप्यजातिमत्वं
परत्वस्यापि लक्षणं बोध्यम् तयोर्भेदानाह द्विविधेति दिक्संयोगासमवायिकारणकं परत्वं दैशिकपरत्वम् दिक्संयोगासम
वायिकापिकारणकं परत्वं दैशिकपरत्वम् दिक्संयोगासमवायिकारणकमपरत्वं दैशिकापरत्वम् कालसंयोगासमवायि
कारणकं परत्वं कालिकपरत्वम् एवं कालिकापरत्वस्यापि लक्षणं बोध्यम् दिक्कृतापरत्वोत्पत्तिं दर्शयति इदं च प्रयागतो
मथुरापेक्षया सन्निकृष्टायाः काश्याः अपरत्वादिवारणाय तत्र प्रयागान्मथुरायाः पश्चिमायां दिशि काशी प्राच्यामिति दिग्भे
दान्न परत्वाद्युत्पत्तिः तथा चैकदिग्वृत्तिपिण्डयोरेव परत्वापरत्वसमवायिकारणत्वम् यद्वा पिण्डयोरेव समवायित्व

परत्वापरत्वे पराऽपरव्यवहारासाधारणकारणे ते द्विविधे दिक्कृते कालकृते च तत्र एकस्यां दिशि स्थि
तयोः पिण्डयोः इदमस्मात्सन्निकृष्टमिति बुद्ध्यानुगृहीतेन दिक्पिण्डयोः संयोगेनापरत्वं सन्निकृष्टे जन्यते विप्रकृष्ट
बुद्ध्या तु परत्वं विप्रकृष्टे जन्यते ॥

म यद्दिक्संयोगः परत्वासमवायिकारणम् तद्दिक्संयोग एवापरत्वासमवायिकारणमिति वाच्यम् पिण्डयोरिति समवायि
कारणप्रदर्शनम् इदमस्मादिति सन्निकृष्टबुद्धेर्निमित्तताप्रदर्शनम् अनुगृहीतेनेति सहकृतेनेत्यर्थः दिक्पिण्डस
समवायिकारणप्रदर्शनम् संयोगेनेति जन्यत इत्यनेनान्वयः सन्निकृष्ट इति एतेनैतदुक्तं भवति न केवलं सन्नि
कृष्टत्वबुद्धिर्निमित्तमपि तु सन्निकृष्टत्वमपि पिण्डस्य स्वरूपसदपरत्वोत्पत्तिं प्रति निमित्तम् तेन विप्रकृष्टे सन्निकृष्ट
भ्रमान्नापरत्वोत्पत्तिरिति एवमग्रेऽपि दिक्कृतपरत्वोत्पत्तिं दर्शयति विप्रकृष्ट इति विप्रकृष्टत्वबुद्धेर्विप्रकृष्टत्वबुद्धेर्वि
कृष्टत्वस्य च परत्वोत्पत्तिनिमित्तत्वमिति शेषः समवाय्यसमवायिकारणे समाने इति भावः ॥

सन्निकृष्टत्वासन्निकृष्टत्वे निर्वक्ति सन्निकृष्टत्वमिति पिण्डस्येति यद्दीसंयोगाल्पीयस्त्वमित्यत्रान्वयेति द्रष्टुरिति इदं सन्निकृष्टमि-
त्यादिज्ञानविषयः शरीरापेक्षयेति इदमुपलक्षणम् परत्वापरत्वावध्यपेक्षमेयमर्थो बोध्यः तेन वाराणसीस्थस्य मथुरातः
काशीक्षेत्रं परम् प्रयागक्षेत्रमपरम् इति परत्वापरत्वाद्योर्नानुपपत्तिः सन्निकृष्टत्वादिविषयमानसबोधस्तत्वात् अ-
न्यथा तच्छरीरापेक्षया काश्यपापवसन्निकृष्टत्वादसंगतेः तथा च मथुरातः प्रयागक्षेत्रं काश्यपेक्षया अल्पतरसंयुक्तसं-
योगवद्दिग्यादिज्ञानमपरत्वोत्पत्तिनिमित्तमूहनीयम् एवं बहुतरसंयुक्तसंयोगवद्दिगादिज्ञानं परत्वोत्पत्तिनिमित्तम् अत्र
केचित्तु संयुक्तसंयोगाल्पत्वमेव सन्निकृष्टत्वं प्रत्यासन्नत्वमपरत्वं चेति व्यवह्रियते एवं तद्भूयस्त्वमेव विप्रकृष्टत्वं दूरत्वं दूर-
त्वं परत्वं चेति न तदतिरिक्तपरत्वापरत्वाभ्युपगमे मानमस्तीति तन्न यथा मथुरास्थितस्य प्रयागापेक्षया संयुक्तसंयोगानामाधि-
क्यात् काशीक्षेत्रं परमिति धीर्जन्यते तथाद्दग्रपि काश्यपेक्षयापि परत्वादिधीः संयोगबाहुल्यस्योभयत्रापि समानत्वात्तस्माद्विषय

सन्निकृष्टत्वं त पिण्डस्य द्रष्टुः शरीरापेक्षया संयुक्तसंयोगानामल्पीयस्त्वम् तद्भूयस्त्वं विप्रकृष्टत्वम् अनियतदि-
गवस्थितयोर्युवस्थविरयोरयमस्मादल्पतरकालेन संबद्ध इति धिया तु ग्रहीतेन कालपिण्डयोः संयोगेन तरुण्य ५८

नासंवृयेनायमेतस्माद्विप्रकृष्ट इत्यादिधीर्यत्र वर्तते तत्रैव परत्वादिकमुत्पद्यते इत्युत्पत्तिनिष्ठतापि स्वीकार्यम् तथा प्रयागात्काशी
मथुरयोर्विरुद्धदिगवस्थितयोः संयोगानामल्पत्वबहुत्वसत्वेपि न परापरव्यवहार इत्यपि द्रष्टव्यम् एवं कालकृतस्थलेपि
युवतद्वृद्धत्वयोरेव परापरव्यवहारणात्तेसमाथयोर्युवस्थविरबाहुल्येपि यस्मिंस्ताहृशाहृशापेक्षाबुद्धिविषयतयापस्वतत्रे-
वतस्य परत्वादिवाय इति नियमानुपपत्तेरित्यलं बहुना कालकृतापरत्वबुद्धिं दर्शयति अनियतेति दिक्कृतपरत्वा-
दिवत्कालकृते नियतदिग्वृत्तित्वं नापेक्षितमिति भावः नाप्यनियतदिग्वृत्तित्वमपेक्षितमिति भावः एकदिगवस्थितयो-
र्वृद्धवृद्धयोः परापरव्यवहारात् युवेति युवत्वस्थविरत्वे देहावस्थाविशेषोपलिता सामर्थ्ये देहेन्द्रियापाटवादि वि-
षत्वस्थविरत्वम् रोगादिजन्यवारणाय विशेषपदम् प्रथमद्धाद्विमत्वेसतिषत तद्विपरीतत्वं बोध्यम् बाल्यवारणाय सत्य-
त्वम् अल्पतरेति अल्पतरेति अल्पतरतपनपरिस्पंदान्तरितजन्मेत्यर्थः एतेन चायं युवेति देहावस्थाविशेषप्रतिपत्तविवेदितम्

ण्डसंयोगेनासमवायिकारणेन स्थविरेत्यपरत्वम् जन्यतद्
त्यपेक्षेतेनान्वयः गणेशाय नमः सरस्वत्यै नमः ॥ राम ॥ राम ॥

ह्नि तथा तपनकर्मणामल्पत्वबहुत्वयोर्द्वयोरप्यतथात्वाह
कीतरापेक्षया विरोधानुपपत्तेः एवमग्रेपि कालेपि

कालिकपरत्वोत्पत्तिं दर्शयति अथेति अत्र च परत्वापरत्वयोर्विनाशकारणं सप्तधा बोध्यम् तदुक्तमाचार्यैः अपेक्षाबुद्धिसंयोगद्रव्यनाशा
त्पृथक्पृथक् द्वाभ्यां द्वाभ्यां च सर्वेभ्यो विनाशः सप्तधा तयोः अपेक्षाबुद्धिनाशात्परत्वादिनाश इत्येकः प्रकारः संयोगनाशादिति द्विती
यः संयोगनाशश्च द्विविधः परत्वाधारभूतपिण्डस्य तद्दिक्संयोगनाशः एवं तदपेक्षया अपरत्वाश्रयस्य पिण्डस्य तद्दिक्संयोग
नाशादपि परत्वनाशः तथाविधभूतस्य द्रष्टुर्देशदेशसंयोगनाशादपि परत्वनाशः तथाविधभूतस्य द्रष्टुर्देशदेशसंयोगनाशा
दपि परत्वनाशश्च सः अपेक्षाबुद्धिनाशसंयोगनाशाभ्यामिति षष्ठः द्वाभ्यां चेति चकारेण तृतीयस्यापि नाशद्वयस्य समुच्चयः अ
पेक्षाबुद्धिनाशसंयोगनाशद्रव्यनाशेभ्य इति सप्तमः प्रत्येकनाशकत्वाभिमिलितस्य च सर्वेषामेव हेतुत्वात् एतेषां च परस्परासंकी
र्णस्थलानयनप्रक्रिया गुणकिरणावल्यामनुसंधेया ग्रन्थगौरवभयान्नेह प्रपञ्च्यते वचसंयोगस्यापेक्षे विध्येन सहपरत्वा
दिनाशकात्वानवधियत्वं बोध्यम् गुरुत्वं लक्षयति गुरुत्वमिति पतनेति कपालसंयोगादावतिव्याप्तेः पतनपदं पद्यस्य यथास
योगात्तूलक्रियायामेव पतनत्वमेनात् दृष्टिचक्रियागुरुत्वाभाववति जलस्यापि वर्तते शिरसि सूर्यकिरणाः पतन्ति प्रासादो चलः
पतितमित्यादिव्यवहारात् तथा च तेजःपतनासमवायिकारणे अदृष्टवदात्मसंयोगादावतिव्याप्तिः तथापि गुरुत्वजन्य
तावच्छेदकजात्यवच्छिन्नस्य वर्णादिवृत्तिपतनविशेषोऽत्र विवक्षितः अत्र द्वितीयादिपतनमानाय तत्कारितवेगसमवायिकारणे

अयमस्मात्पुरःकालेन संबद्ध इति धियास्य विपरत्वं जन्यते गुरुत्वं पतनासमवायिकारणं पृथिवीजलवृत्ति ॥

त्वाद्वेगेतिव्याप्तिवारणाय आद्यत्वेन पतनं विशेषणीयमिति कश्चित् वस्तुतस्तु द्वितीयादिपतनेऽपि गुरुत्वस्यैवासमवायिकारणत्वेन
जेऽवृत्तिविलक्षणपतनत्वावच्छिन्नप्रतिलाघवेन तस्य हेतुत्वात् वेगस्यापि गोरवात्रनाणाभावाच्च वेगच्छायाद्यादिकर्मस्थ
लेनाद्येषु कर्मासमवायिकारणस्य नोदनरूपसंयोगस्य नष्टत्वात् आद्यपाकर्मजन्यवेगस्य कर्मान्तरासमवा
यिकारणत्वस्वीक्रियते तदुक्तं नोदनाद्यमिषोः कर्म तत्कारिताच्च वेगाद्युत्तरोत्तरमेकं कर्म इति वेगजन्यतावच्छेदकं च कर्मनिष्ठवै
जात्यं द्वितीयादिपतने विनिगमनाविरहादुभयोर्हेतुत्वे जातिसांकर्यम् आद्यपतने गुरुत्वजन्यतावच्छेदिकाया जाते
रिषादिकर्मणि च वेगजन्यतावच्छेदिकाया जातेः सत्त्वात् एकत्र द्वितीयपतनादौ संकीर्णत्वात् तस्मान्न वेगस्य पतना
समवायिकारणत्वमिति यथाश्रुतमेव लक्षणसमंजसमिति सुधीभिरालोचनीयम् क्वचिन्मूलपुस्तके आद्यपतनेति
पाठे आद्ययोः पृथिवीजलयोः पतनमित्यर्थः तेन तेजःपतनविशेषः पतनसमवायिकारणादावतिव्याप्तेः समवायीति
पतनासमवायिकारणवृत्तिगुणत्वव्याप्यजातिमत्त्वमित्यर्थः तेन व्यापितिनसंयोगोत्पन्नविनष्टस्य चरमे गुरुत्वेनाव्या
प्तिः लक्षणान्तरमाह पृथिवीति पृथिवीवृत्तिवृत्तिजलवृत्तिवृत्तितेजोऽवृत्तयवृत्तिरसावृत्तिजातिमत्त्वमित्यर्थः स्नेहेतिव्याप्तेः पृ

गो॰ ३२

72

गुरुत्वस्य पतनासमवायिकारणत्वं न्यायसिद्धान्तसिद्धमिति दर्शयति यथोक्तमिति वैशेषिकसूत्रकृतेति शेषः गुरुत्वे सत्यपि पतनाद
र्शनादन्वयव्यभिचारवारणाय प्रतिबंधकाभावान्तं सहकारित्वं दर्शयति संयोगेत्यादिना अत्र गुरूणामपि तालादिफलानां
वृंतसंयोगस्य पतनप्रतिबन्धकतया पक्वतादशायां तदभावे सति पतनम् एवं गुरूणां काण्डादीनां पतनप्रतिबंधकवेगस्याभा
वे सति पतनम् तथा गुरूणामपि पतत्रिशरीरादीनां प्रयत्नसत्त्वे न पतनम् तदभावे तदभावदशायां पतनमिति त्रितयोपादा
नं अनेन पतनेऽसमवायिकारणं कर्मत्वात् काण्डादिवदित्यनुमानेनेतरथा यथा गुरुत्वसिद्धावितिप्रमाणमुक्तम् नच रसस्येव
पतनहेतुतास्तु किमतीन्द्रियगुरुत्वकल्पनेनेति वाच्यम् विजातीयरसवद्द्रव्यपवारणस्य नीरसस्य हरीतक्यादेरजनितादृष्ट प
तनाभावप्रसंगात् माधुर्यादिरसप्रकर्षेपि द्राक्षादीनां पाषाणाद्यपेक्षया पतनापकर्षदर्शनात् कारणगतोत्कर्षापकर्षयो
रेव कार्यगतयोस्तयोः प्रयोजकत्वात् अत एव न महत्त्वपरिमाणविशेषस्यापि पतनहेतुत्वम् तूलकादेर्महत्त्वप्रकर्षे
प्यपकृष्टमहत्त्वशालिप्रकृष्टगुरुत्वसुवर्णाद्यपेक्षयारेवकार्यगतयोः प्रयोजकत्वात् अत एव न महत्त्वपरिमाणविशेषस्या
पि पतनहेतुत्वम् तूलकादेर्महत्त्वप्रकर्षेप्यपकृष्टमहत्त्वशालिप्रकृष्टगुरुसुवर्णाद्यपेक्षया पतनापकर्षदर्शनात् न

यथोक्तम् संयोगवेगप्रयत्नाभावे सति गुरुत्वात्पतनमिति द्रवत्वमाद्यस्यन्दनासमवायिकारणम् ॥

नैवं सति लघुत्वमपि गुणान्तरं न तु गुरुत्वाभावस्य लघुत्वे लघुत्वाभावस्यैव गुरुत्वमित्येव किं न स्यात् तदभावादेव पत
नस्यादि गगनगमनाविरहेण सावयवत्वे संयोगविभागवत् गुरुत्वं लघुत्वं च गुणद्वयमेवास्तीति चेन्न पतनेऽप्यन्यथानुपपत्त्या
तत्कारणतया गुरुत्वकल्पनमावश्यकम् तदभावादेव पतनाभावोपपत्तौ लघुत्वाख्यगुणान्तरत्वे मानाभावात् नच लघुत्वा
भावादेव पतनोपपत्तिः लघुत्वाभावत्वापेक्षया गुरुत्वजातेर्लाघवेन कारणतावच्छेदकताद् गुणत्वकल्पनायाः फलत्वात् नच
पत्रतुलायामेकफलके तोलकमितसुवर्णमन्यत्र च माषकमिते तत्र माषकस्य पतनाभावो लघुत्वादेव न गुरुत्वाभावात् तो
लकस्यापि न पर्क गुञ्जाप्रदेये माषकस्य पतनदर्शनेन गुरुत्वाभावविरहादिति वाच्यम् तुलाफलकसंयोगस्यैव माषकपत
नप्रतिबन्धकत्वात् तुलायामेकफलकावच्छेदेन गुरुतरसंयोगे सति फलकान्तरावच्छेदेनोन्नमनक्रियासंभवात् ननु नम्रत
फलकावच्छेदेन लघुत्वद्रव्यसंयोगस्यापि हेतुत्वम् एकफलके गुरुद्रव्ये सति फलकान्तरे किंचिद्द्रव्येणु नमनदर्श
नात् तस्मादुत्कृष्टगुरुद्रव्यसंयुक्तफलकावच्छेदेन तुलायां नमनमपावच्छेदेनोन्नमनम् उन्नमने च द्रव्यसंयोगस्य
च प्रतिबंधकत्वम् एवं च पाषाणोत्पतनादौ अदृष्टमित्यादि स्वयमूहनीयम् द्रवत्वलक्षयति स्यन्दनेति संस्कृतजलादी
नामुच्चदेशान्नीचदेशसंयोगजनकक्रियाविशेषः स्यन्दनासमवायिकारणं द्रवत्वगुणत्वव्याप्यजातिमत्त्वमित्यर्थः नेताज

तितस्य दृष्टे उत्पन्नविनष्टघटादिद्रवत्वे नाव्याप्तिः ॥

लक्षणान्तरमाह आभूतेजस्त्विति पृथिव्यादित्रयवृत्तित्वे सति वायुवृत्तिरूपाद्यवृत्तिजातिमत्त्वमित्यर्थः रूपप्रकरणोक्तरीत्या व्याहृति
रूहनीया नाहृशजातिस्त्वद्रवत्वत्वम् तच्च द्रवत्वं द्विविधं नैमित्तिकं सांसिद्धिकं च निमित्तादग्निसंयोगाज्जातं द्रवत्वं नैमि
त्तिकद्रवत्वत्वमिति लक्षणम् तद्भिन्नद्रवत्वत्वं सांसिद्धिकद्रवत्वत्वं नैमित्तिकद्रवत्वस्याश्रयं कथयन् लक्षणं क
थयति भूतेजसोरिति भूतेजोन्यतरवृत्तिद्रवत्वत्वमित्यर्थः कस्यापि द्रवत्वस्योभयवृत्तित्वाभावादसम्भवोऽतोऽन्यतरेति
गंधादावतिव्याप्तेर्द्रवत्वपदम् भूतेजसोरित्यस्य चूर्णसुवर्णयोरित्यत्र यथासंख्यं नान्वयः अग्निसंयोगेनेत्यनेन
नैमित्तिकपदस्य यौगिकत्वं दर्शयन् पाकजेत्यादिमदुक्तलक्षणं सूचयति नैसर्गिकं लक्षयितुमाह जले त्विति
जलवृत्तिद्रवत्वं नैमित्तिकद्रवत्वमिति भावः नैसर्गिकं स्वाभाविकं न त्वागतपाकादिजन्यं यावद्द्रव्यभावीत्यर्थः इद
मेव सांसर्गिकद्रवत्वमित्युच्यते अत्र भूतेजसोर्द्रवत्वोत्पत्तौ पाकः कारणम् द्रवत्वनाशे तु कचित्तेजःसंयोगः कचिदाश्रयनाशोऽप्य
जलद्रवत्वस्य परमाणुगतस्य तु नित्यत्वम् द्व्यणुकादिगतस्य कारणक्रमेणोत्पत्तिः आश्रयनाशादेव नाशः द्रवत्वं तु चक्षुषा त्व

भूतेजोजलवृत्तिः भूतेजसोर्चूर्णादिसुवर्णयोरग्निसंयोगैरग्निसंयोगेन नैमित्तिकं द्रवत्वं जले तु नैसर्गिकम् स्नेहस्त्वि
क्कणो जलमात्रवृत्तिः कारणगुणपूर्वकः गुरुत्वादिवत् ॥

चाक्षुषेन्द्रियेण गृह्यते इति बोध्यम् स्नेहं लक्षयति स्नेह इति स्नेहत्वं चिक्कणतासंग्राहकत्वम् संग्रहात्मसंयोगजनकत्वमि
यावत् संग्रहस्य सक्तुधूल्यादिलड्डुकाकृतिनिर्माणप्रयोगि संयोगविशेषः स च स्नेहस्य द्रव्यसंयोगादेव भवतीति न संग्रहा
समवायिकारणवृत्तिगुणत्वव्याप्यजातिमत्त्वं लक्षणं अजनितसंग्रहे स्नेहे अव्याप्तिवारणाय जातिघटितम् लक्षणान्तरमा
ह जलेति जलेतरसमवेतवृत्तिगुणत्वव्याप्यजातिमत्त्वमित्यर्थः रूपत्वादेर्वारणाय वृत्त्यन्तम् आत्मत्वादिवारणाय जले
त्यादि जलरूपादिविशिष्टवैजात्यवारणाय गुणत्वेत्यादि यथाश्रुते जलमात्रवृत्तित्वस्य जलीयरूपाद्यतिव्यापक
त्वात् लक्षणान्तरमाह कारणेति कारणस्य स्वाश्रयसमवायिकारणस्य यो गुणः स्नेहः रूपः स तत्पूर्वकस्तज्जन्य इत्यर्थः त
था च स्वाश्रयसमवायिकारणगतासमवायिकारणवृत्तिपृथिवीवृत्त्यवृत्तिगुणत्वसाक्षाद्व्याप्यजातिमत्त्वमित्यर्थः तेन
परमाणुस्नेहे नाव्याप्तिः शब्दत्वादिवारणाय वृत्त्यन्तम् रूपत्वादिवारणाय वृत्त्यन्तम् सत्त्वादिवारणाय गुणत्वेति अत्र भास्व

यावद्द्रव्यमिति यावद्द्रव्यं द्रव्यस्य सत्तावधि भवति तिष्ठति न नश्यतीति यावत् तेन स्वाश्रयसमानकालीनध्वंसप्रतियोगि
प्रवृत्तिपरिमाणवृत्तिपरिमाणवृत्तिगुणत्वसाक्षाद्व्याप्यजातिमत्त्वं तत्त्वम् रूपत्वादिवारणाय द्वितीयमनुक्तेन तु गुरुत्वादि
वारणाय द्वितीयम् परिमाणत्ववारणाय तृतीयम् सांसिद्धिकद्रवत्ववारणाय गुणत्वे सति गुरुत्वादिवदिति काका
दिगोलकस्यापेनोभयत्र दृष्टान्ततया सम्बध्यते कारणगुणपूर्वकत्वे यावद्द्रव्यभावित्वे च आद्यपदात्परिमाणस्य परिग्र
हः ननु निरूपणक्रमात्कृष्यत्वस्य तस्य तु पाकजतया सत्यपि द्रव्ये अग्निसंयोगनाशेन नाशात् उभयत्र दृष्टान्तत्वासं
भवात् अत्र लीलावतीकारमते भस्मीभवत्पदादौ गुरुत्वापकर्षदर्शनात् गुरुत्वस्यापि पाकजत्वं तन्मते मतान्तरे स्पर्शे
दमुदाहरणम् तन्मते तु परिमाणमेव दृष्टान्तत्वेनोपात्तम् शब्दलक्षयति शब्दइति श्रोत्रग्राह्यगुणत्वं शब्दत्व
मित्यर्थः गुणपदं शब्दत्वादौ अतिव्याप्तिवारणाय लक्षणान्तरमाह आकाशेति आकाशविशेषगुणत्वं तत्त्वमित्य

यातद्रव्यभावी शब्दः श्रोत्रग्राह्यो गुणः आकाशविशेषगुणः ननु कथमस्य श्रोत्रेण ग्रहणं भेर्यादिदे
शे शब्दोत्पत्तेः श्रोत्रे तु पुरुषदेशे स्थितम् भेर्यादेशे जातस्य शब्दस्य वीचितरङ्गन्यायेन कदम्बगोले

र्थः रूपाद्यावृत्तिव्याप्तिवारणायाकाशेति आकाशसंख्यादौ तद्वारणाय विशेषपदं भेर्यवच्छिन्नाकाशोत्पन्न
शब्दस्य कर्णशष्कुलीविवरावच्छिन्नाकाशासमवेतत्वेन कथं श्रावणप्रत्यक्षता स्वसमवेतस्यैव श्रोत्रेण ग्रहणाद
न्यथाऽतिप्रसङ्गादित्यभिप्रायेण शङ्कते नन्विति अस्येति शब्दस्येत्यर्थः ग्रहणं संगतः प्रत्यक्षविषयीकरणमित्यर्थः
सन्निकर्षाभावादिति शेषः तदेवोपपादयति यत इति श्रोत्रसमवेतचरमशब्दग्रहणेन ननु भेर्याद्यवच्छेदेनो
त्पन्नइति प्रतिपादयिष्यन् समाधत्ते सत्यमित्यादिना वीचीति एकदिक्स्पर्शवशेनोत्पन्नेन तरङ्गमाणपाय यथैकतरं
गस्तदवच्छेदेनान्यः एवं क्रमेणैकस्यामेव दिशि तरङ्गपरम्परा प्रवहति तद्वदत्र पूर्वं देशेऽपीति वीचीतरङ्गन्यायार्थः
कदम्बेति यथा सर्वदिक्षु शब्दोत्पत्तिस्तदा यथा कदम्बगोलकस्यात्मवतः प्रसूनानि निःसरन्ति तथा मध्यवर्तिन
आद्यशब्दात्सर्वतः शब्द उत्पद्यते इति कदम्बगोलकन्यायार्थः वा शब्दोऽत्र मतभेदे किंतु अवस्थायामाद्य अवस्था
वायुसंयोगाधीनाः तथा हि शब्दो यत्र जातस्तत्र वायवाकाशसंयोगो निमित्तकारणं तस्य वावच्छेदतो वेगेन सामान्या

यमद्वितीयम् ॥

स्वसन्निहितमिति स्वावच्छिन्नाकाशप्रदेशाव्यवहितनभोभागावच्छेदकमित्यर्थः सच शब्द इत्यत्रापि स्वसन्निहितमित्यनुवर्त्तते आर
भत इति असमवायिकारणरूपतया जनयतीत्यर्थः अंत्येस्तु पलक्षणम् श्रोत्रजातः शब्दः श्रोत्रजातः शब्दः श्रोत्रेण गृह्य
त इति विवक्षितः तेन श्रोत्रमध्योत्पन्नस्य शब्दस्याद्यस्य मध्यस्य वा श्रावणोपपत्तिः तद्योनन्त्यमध्यमस्यैतत्संसर्गिकरीत्यभि
प्रायेण श्रोत्रासन्निकृष्टः शब्दो न श्रावण इत्येवं तत्त्वम् एवमग्रेपि बोध्यम् संयोगजे शब्दे दर्शयित्वा विभागजं दर्शयति
एवं वंशेत्यादि पाट्यमाने विदार्य्यमाणे अवयवविभागानुकूलकर्मजनकनोदनाख्यसंयोगाश्रयीक्रियामाण इत्यर्थः विभा
गदेशे जात इति पाठेऽयमर्थोऽस्ति विभागजन्य इत्यर्थः जनयति प्रयोजको भवतीत्यर्थः आद्यशब्दस्य श्रोत्रनिष्ठशब्दोत्पत्तौ ज
नकताभावात् कुलालपित्रादिवदन्यथासिद्धेः ननु भवदुक्तक्रमेण शब्दज शब्द एव सर्वत्र श्रावणः प्रत्यक्षः तदा कथम
यं भेरीशब्दो यं मृदङ्गशब्द इत्यादिविलक्षणप्रतीतिरित्यत आह भेरीशब्द इति भेरीशब्द इत्यस्य यद्भेर्यवच्छिन्नाका

काशमिव समवायिकारणम् ॥

शसन्निहिते शब्दान्तरमारभते सच शब्दः शब्दान्तरमारभत इति क्रमेण श्रोत्रदेशे जातोऽन्त्यशब्दः श्रोत्रेण गृह्यते न
त्वाद्यो नापि मध्यमः एवं वंशे पाट्यमाने दलविभागेजातः शब्दान्तरारम्भक्रमेण श्रोत्रदेशे अन्त्यशब्दं जनय
ति सोन्त्यशब्दः श्रोत्रेण गृह्यते नाद्यमध्यमाः भेरीशब्दो मया श्रुत इति धीर्भ्रान्ता एव भेरीशब्दोत्पत्तौ भेर्या
काशसंयोगोऽसमवायिकारणं भेरीदण्डसंयोगो निमित्तकारणम् आकाशः समवायिकारणम् एवं वंशे पाट्य
माने चटचटशब्दोत्पत्तौ वंशदलाकाशविभागोऽसमवायिकारणं दलद्वयविभागो निमित्तकारणम् इत्यमाद्यः
शब्दः संयोगजो विभागजो वा अन्त्यमध्यशब्दास्तु शब्दासमवायिकारणकाः अनुकूलवायुनिमित्तकाः संयो

गाद्विभागाच्छब्दाच्च शब्दोत्पत्तिरिति आद्यादीनाम् ॥

शसमवेतशब्दस्तदाश्रमे एवं च स्वभेरीप्रयोज्यमित्यर्थः लोदात प्रमैवेति द्रष्टव्यम् अत एव दर्शिनामपि तथा प्रत्ययः अत्र
च भेरीसंयोगादिप्रयोज्यतावच्छेदकः साक्षात्परंपरासाधारणभेरीप्रयोज्यशब्दवृत्तिर्जातिविशेषः प्रत्यक्षसिद्धः प
दशान्द्रजेनादिनाद्यनुमानं एवं शब्दविशेषश्रवणेन वीणाद्यनुमानमपि बोध्यम् तथा प्राच्योकोलाह
लो नपश्चिमायामित्यादिव्यवहारोपि तत्तद्दिक्प्रयोज्यतावच्छेदकजातिविशेषाधीनमिति बोध्यम् शब्दविशेषे
ष समवायिकारणनिमित्तकारणानां विशेषं दर्शयति भेरीशब्दोत्पत्तावित्यादिना उक्तमिति वैशेषिकतंत्रका

व्यभिचार इति भावः तथा च समवायिकारणं सर्वेषामेवेति दर्शयति आद्यादीनामिति ॥

देरिति शेषः संयोगादिति तथा च संयोगादिजन्यतावच्छेदकजातिविशेषा एव शब्दवृत्तयः कार्यतावच्छेदका इति

74

शब्दस्योत्पत्तिप्रकारे दर्शयित्वा विनाशप्रकारं दर्शयिष्यन् शब्दस्य द्विक्षणमात्रावस्थायित्वं दर्शनीये प्रसंगाल्लाघवाच्च बुद्ध्यादेरपि द्वि
क्षणमात्रावस्थायित्वं दर्शयति कर्मवद्धीति अत्र त्रिक्षणावस्थायित्वमिति क्वचित्पुस्तके पाठः विभुविशेषगुणानां स्वानंत
रोत्पन्नविशेषगुणनाश्यत्वात्स्वोत्पत्तिद्वितीयक्षणोत्पन्नशब्दादीनां नाशकानां संभवात्तृतीयक्षणपर्यंतं स्वनाशाद
शात्त्रयवृत्तित्वस्य कदाप्यसंभवात् यदि च क्वचित्पुस्तके एवंकारस्त्रूत्स्यः पाठोऽस्त्येतेनसाउपसर्गेणाधातवर्थो बलादन्यत्र नीय
तद्विति विरोधि लक्षणया प्रध्वंसस्याधानोगतिवोधकत्वं वक्त्राव प्रध्वंसस्य नाशकोत्यकत्वं त्रिक्षणावस्थायित्वं तृतीयक्षणवि
नाशित्वमित्यर्थः कर्मविशेषस्य बुद्धिविशेषस्य च कदाचित्त्रिक्षणावस्थायित्वं दर्शयति शब्दस्य तनेकस्थायित्वं तीयक्षण
वस्थायिता तथाहि अपेक्षाबुद्धेर्द्वित्वप्रत्यक्षाभावे येन त्रिक्षणावस्थायित्वं पूर्वमेवप्रतिपादितम् एवं यत्रावयवद्वयविभा
गकाले अवयविनि कर्म द्वितीयक्षणे अवयवसंयोगनाशोऽवयविनि विभागोत्पत्तिस्तृतीयक्षणे द्रव्यनाशः एवं संयो
गनाशश्च चतुर्थक्षणे द्रव्यनाशात्कर्मनाश इति कदाचिद् बुद्धिविशेषकर्मविशेषयोः दशात्रयवृत्तित्वम् शब्दस्य त्रिक्षणवृत्तित्वं कस्यापि न संभवति अत एव ह्येवं तेन लिखितं द्वयोरपि शब्दयोः क्षणत्रयावस्थायित्वं तत्रो

कर्मवद्धि वत्त्रिक्षणावस्थायित्वे शब्दानां तत्राद्यमध्यमशब्दाः कार्यशब्दनाश्याः अंत्यस्तूपांत्येनोपांत्यस्त्वंत्येनसंद
पसंदस्थापिनवितयपतीतिकाश्चित् ॥

पांत्योत्पत्त्यनंतरं पंचमे क्षणे शब्दनाशश्चतुर्थक्षणे उपांत्यनाशात्तज्जन्ममूलकमिति वोध्यम् वस्तुतस्त्वत्र कर्मपदं या
गादिकर्मपरम् मागादेरिच्छारूपस्य द्विक्षणमात्रावस्थायित्वात् अत एवोक्तमाशुतरविनाशिनां कर्मणां कालांत
रभाविस्वर्गादिहेतुत्वादित्विरध्वंसफलायालेन कर्मातिशयं विनेत्यपि च चलनात्मकस्य तु कर्मणा क्षणाच चलना
त्मकस्य तु कर्मण क्षणचतुष्टयवृत्तित्वं विभागपूर्वसंयोगनाशद्वारा चतुर्थक्षणोत्पादितस्योत्तरदेशसंयोगस्य तन्ना
शकत्वात् अत एव पूर्वमुक्तं क्रियादिसंयोगान्तानां चतुर्णां योगपद्याभिमानो न स्यादिति तथा च शब्दस्यापेक्षाबुद्धि
भिन्नबुद्धेरिच्छात्मककर्मणश्च क्षणद्वयमात्रत्वं साधर्म्यम् उत्पद्यः जनकनेरप्यत्र लक्ष्यत्वं वोध्यम् यद्यपीदकपालद्व
द्वयसंयोगनाशोत्पन्नघटसंयोगादावतिव्याप्तं तथाप्यपेक्षाबुद्धिभिन्नत्रिक्षणावृत्तिजातिमत्वं लक्ष्यत्वं वोध्यम् ज्ञा
नत्वसंग्रहायापेक्षाबुद्धिभिन्नेति असंभववारणाय त्रिक्षणावृत्तीति नित्येच्छाज्ञानादिसंग्रहाय जन्यपदं घटादिवारण

एतन्मते चरमशब्दस्य बौद्धाभिमतक्षणिकतापत्तिः तथा चैतद्दृष्टान्तेनान्यत्रापि तथा स्यादिति उपान्त्यनाशस्यैवोत्पन्नाशकत्वादिति अतस्त्रि
चतुःक्षणावस्थायित्वमिति निर्दिशयति तदयुक्तमित्यादिना अत्रापि त्रिक्षणावस्थायिनेति विकारशून्यः पाठः वकारपाठे तु पूर्वोक्त एवा
र्थः अत्रैवमन्वयः अन्त्यस्य द्वितीयक्षणस्यानुपस्थाद्वृत्तिः प्रथमक्षण इति यावत् तद्गामिना प्रथमक्षणवृत्तिनेत्यर्थः तृतीयक्ष
णे चेति चकारेण द्वितीयक्षणस्यापि द्वितीयक्षणे तृतीयक्षणे चासत्त्वेनेत्यर्थः अत्र हेतुगर्भविशेषणमाह त्रिक्षणावस्थायिनेति
यतस्तस्योत्पत्तिक्षणावधिकतृतीयक्षणवृत्तित्वं नास्तीत्यतिः स्वोत्पत्तिद्वितीयक्षणोत्पत्तिकोऽन्त्यस्य द्वितीये तृतीये वा क्षणे
सत्त्वेन संभवतीत्यर्थः एतादृशेनोपान्त्येनान्त्यस्य नाशजननासंभवादिति अत्र कार्यकालवृत्तितया कारणता नास्तीति दर्शयि
तुं तृतीयपदम् कार्यपूर्वकालवृत्तितया कारणता न संभवतीति द्योतनाद्द्वितीयपदम् एतत्फक्किकार्थबोधपर्यवसायिपद
र्शितगौरवं न भ्रमबीजम् तस्मादुपान्त्येति तथा चान्त्यस्यापि द्विक्षणावस्थायित्वमिति भावः वस्तुतस्त्वन्त्यशब्दनाशप्रतु

स्तु तदयुक्तं उपान्त्येन हि त्रिक्षणावस्थायिनान्त्यस्य द्वितीयक्षणानुगामिना तृतीयक्षणे चासता अन्त्यनाशजननासंभवात् त
स्मादुपान्त्यनाशेनैवान्त्यनाश इति विनाशित्वे च शब्दस्यानुमानेन तथाहि अनित्यः शब्दः सामान्यवत्त्वे सत्यस्म
दादिबाह्येन्द्रियग्राह्यत्वात् घटवत् शब्दस्यानित्यत्वं साध्यं अनित्यत्वं च विनाशावच्छिन्नस्वरूपवत्त्वं ननु वि
नाशावच्छिन्नसत्तायोगः प्रागभावे सत्ताहीने अनित्याभावप्रसंगात् सामान्यवत्त्वे सत्यस्मदादिबाह्येन्द्रियग्राह्य
त्वं हेतुः प्रत्यक्षत्वादित्युच्यमाने आत्मनि व्यभिचारस्तत उक्तं बाह्येन्द्रियेति तेनैव योगिनां बाह्येन्द्रियग्राह्ये परमाणौ व्यभिचा

योऽन्त्यशब्दनाशब्दनाशत्वे हेतुत्वापेक्षया लाघवादुपान्त्यशब्दत्वेनैव हेतुत्वमुचितं न चान्त्यशब्दस्य क्षणिकत्वापत्तिरेव दोष इति वाच्यं
कृतहान्यकृताभ्यागमप्रसंगेन यत्सत्तत्क्षणिकमित्याद्यनुमानानामप्रयोजकत्वाद्योजकतया जगतः क्षणभङ्गुरत्वं नाङ्गीक्रि
यते अन्त्यशब्दस्य तु विनाशसामग्रीसमवहितोत्पन्नस्य क्षणिकत्वे बाधकाभावात् एवं चरमदुःखादेरपि बोध्यम् ननु सएवाय
गकार इति प्रत्यभिज्ञानान्नित्यः शब्दः श्रावणप्रत्यक्षविषयत्वाच्छब्दत्ववत् इत्यनुमानाच्च शब्दस्य नित्यत्वमेवेति मीमांसकादयः तत्क
थमिह शब्दस्य नाशः प्रतिपादित इत्यत आह विनाशित्वेति नाशप्रतियोगित्वमेवानित्यत्वं न तु नाशप्रतियोगिसंसर्गगौरवात् प्रा
गभावे व्याप्तेश्चेति हेतुविशेषणानां प्रयोजनानि दर्शयति प्रत्यक्षत्वादित्युच्यमान इति तेनैव आत्मनैवेत्यर्थः प्रतियोगि
नां बाह्येन्द्रियेति योगजधर्मस्य सर्वेन्द्रियसत्त्वादिति भावः अस्मदादीति प्रत्यक्षस्यालौकिकप्रत्यक्षपरत्वे तात्पर्यग्राहकमस्म

त्वेप्यात्मादिषु न व्यभिचारः

गौ०
७५
75

सामान्यादिनेति आदिपदात्समवायाभावयोः परिग्रहः विशेषपदार्थस्यातीन्द्रियतया न तत्र व्यभिचारसंभवात् सामान्यवत्वइति
समवायसंबंधेन यत्किंचित्पदार्थवत्वे सतीत्यर्थः तेन सामान्यपदार्थनिष्ठनित्यत्वादिर्न वैयर्थ्यम् सामान्यादीति सामान्य
मादिर्यस्य त्रयस्य समवायाभावरूपस्य तत्सामान्येन समं चतुष्टयमित्यर्थः एवमनुमानेनैव शब्दस्यानित्यत्वसिद्धिरि
ति पूर्वोक्तप्रत्यभिज्ञानां का गतिरिति चेन्न उच्यते प्रत्यभिज्ञया तावत्पूर्वानुभूतगकारेणानुभूयमानगकारेणानुभूयमा
नगकारस्याभेदो गृह्यते अभेदश्च भेदाभावः भेदश्च द्विविधः गत्वावच्छिन्नप्रतियोगिताको विशेषभेदस्तत्र
यत्नो गकारो विनष्टो मेकारवृत्तिप्रतीते लब्ध्यक्ति भेदाभावस्य बाधितत्वात् गत्वावच्छिन्नसामान्यभेदाभाव एव
तज्जातीयत्वरूपः प्रत्यभिज्ञाया विषयः यथा पूर्वं या लिपि लिखिता सैवेदानीं लिखितेत्यादौ नहि वर्णवन्नमस्या
दिरूपलेखायां लिपेरपि कस्यचिन्मते नित्यः शब्द इत्यनुमानेन च साधनावच्छिन्नसाध्यव्यापकं सत्ताभाववत्व
मुपाधिः अनित्यानुमानेन न तु बलवत्वाबाधश्च अपिच पूर्वोपदर्शितचैत्रादिप्रयोज्यतावच्छेदकस्यैवोत्पत्तिरिल

तथापि सामान्यादिना व्यभिचारः स्यादत उक्तं सामान्यवत्वे सतीति सामान्यादित्रयेतरत्वे निः सामान्यं किंपुन
योगिसद्भावे प्रमाणम् उच्यते परमाणवः कस्यचित्प्रत्यक्षाः प्रमेयत्वात् घटवत् ॥

त्वानुमानस्यानुभविकतया शब्दस्य न नित्यत्वं न च ध्वनेरेवास्मन्मते नित्यत्वात्तज्ञता एवं तादृशाजातय इति वाच्य
म् न च सोयं गकार इति प्रत्यभिज्ञैव बाधिकेति वाच्यम् सेयं गर्जरीत्यादिप्रत्यभिज्ञाया ध्वनावपि तुल्यत्वात् तस्मा
त्तस्याः तज्जातीयत्वमेव विषय इति वक्तव्यम् नच वर्णेऽपि तुल्यम् किंच वायुसंयोगादिकार्यतावच्छेदकं भवन्मते
कप्रत्यक्षं वाच्यम् कत्वस्य नित्यत्वात् मन्मते तु कत्वमेव तथा त्विलाघवत्वको व्यनुमानसहकारी नच विशेषपि
तया प्रत्येकं कोऽनित्यः ककार एव कार्यतावच्छेदक इति तस्यैवेति वाच्यम् कावच्छिन्नप्रत्यक्षत्वं प्रत्यक्षता
वच्छिन्नः को वा प्रयोजकः इति विनिगमनाविरहात् इतरेतरकार्यकारणभावद्वयापत्तेः प्रत्यक्षत्वात्तत्वेन वाचका
वच्छिन्नदोषो व्यभिचार इति दिक् ननु शब्दस्यानित्यत्वसाधकहेतोर्योगिप्रत्यक्षविषयतया परमाण्वादौ व्यभिचा
रवारणाय सामान्यादिपदं न दास्यामि वेद्यद्धियोगजधर्मवशादतीन्द्रियककस्यचित्प्रत्यक्षत्वे तत्र प्रमाणाभावः इत्य
तः प्रसक्तोत्तराभ्यां तत्र प्रमाणं दर्शयति किंपुनरित्यादिना परमाणव इति अत्र प्रत्यक्षत्वं सामान्यलक्षणाजन्यल

पदार्थज्ञानावलम्बनसाध्यसिद्धिं दर्शयति यस्येति ननु योगिनो नातीन्द्रियार्थविषयकप्रत्यक्षवन्तः प्राणित्वमत्वादस्मदादिवत् योगिप्रत्यक्षं नातीन्द्रियवि
षयकं प्रत्यक्षत्वादस्मदादिप्रत्यक्षवदित्यादित्यादि मीमांसकोद्भावितानुमानानां का गतिः तेरीश्वरेऽत्र गिकारान प्रत्यक्षेन व्यभिचार इति चेत्
मीमांसागुरवो मीमांसानभिज्ञाः प्राणित्वादिमत्वपक्षादिवत् मीमांसकबुद्धिर्न वेदार्थविवेचिका बुद्धित्वात् पथ्यापथ्यादिबुद्धिवदित्याद्यनुमा
नानां का गतिः सा तत्राप्यस्ति तेषामप्रयोजकत्वमिति चेत्प्रकृतेपि तुल्यम् स च योगी द्विविधः युक्तो वियुक्तश्च तत्र युक्तानां कदाचित्समा
धिः कदाचिद्व्युत्थाने समाधिस्थं इन्द्रियाणि विषयेभ्यः प्रत्याहृत्य इन्द्रियेभ्यो मनः प्रत्याहृत्य साक्षात्कृतेव स्तुत्यादरेण मनो यावदेकत्वेनास्थि
तनात्स्वरूपः समाध्यभावो व्युत्थाने युक्तास्तु समाधिदशायामेवातीन्द्रियपदार्थदर्शिनो नान्यकाले तत्र च युक्तानां योगजधर्मो मनसः प्रत्या
सत्तिः वियुक्तास्तु तेताभ्यासेन प्रीकृतमनसः सर्वदैव समाधिस्थाः योगजधर्मं वृण्वन्ति माद्य— सिद्धियुक्ता एवं च व्यवहितातीन्द्रिय
विषयग्रहणरूपवहिरिन्द्रियसिद्धिभाजः कालविप्रकृष्टातीतानागतपदार्थग्रहणरूपमानससिद्धिमन्तः सर्वदैव सर्वदैवस
र्वज्ञाः तदुक्तं शाब्दानेषः सूक्ष्मो नियोजनवर्षादिव्यादियोगजधर्मः सर्वेन्द्रियाणां प्रत्यासत्तिः योगेन धर्मात्मतो निदिध्यासित
मद्गत्यादि विषय एव प्रमाणं मनसो वहिरस्वातन्त्र्येपि मिद्धा मनोयोगश्चात्र योगजधर्मः सहकारी कल्प्यते फलस्य प्रमाण
सिद्धत्वादिति संक्षेपः अधुना गुणं किरणावल्यामनुसंधेय बुद्धिं लक्षयति अर्थेति प्रकाशो ज्ञानं पर्यायशब्दकथनेन मनो

यस्य प्रत्यक्षः स योगी अर्थप्रकाशो बुद्धिर्ज्ञानं नित्यापेक्षा बुद्धिः अनपेक्ष्या तु नित्याः प्रीतिः सुखं तच्च सर्वात्मनामनुकूल
वेदनीयम् ॥

बुद्धिरित्यादिना सांख्याभिमतमनोरूपबुद्धिर्निरस्ता विज्ञानमानंदं ब्रह्मेत्यादिना वेदान्तिमतप्रकाशस्वरूपात्मजन्यस्य निरासः आत्मगुण ॥
त्वे सतीति काचित्पाठेपि वेदांतिसमतात्मस्वरूपता निरासः सा च ज्ञानरूपा बुद्धिर्मनो नाप्यात्मेति भावः तत्तद्रूपत्वे पर्याय
णप्रयोगासंभवादित्यधिकमग्रे दर्शयिष्यते लक्षणं तु ज्ञानानामीत्यनुव्यवसायविषयवृत्तिगुणत्वव्याप्यजातिमत्वं आत्मन्यतिव्या
प्तिवारणाय गुणत्वेति अनुव्यवसायाविषये परामर्शादेर्व्याप्तिवारणाय जातिरुदितम् सा च निरूपयति प्रीतिरिति पर्या
यकथनेन प्रमाणमादर्शितम् प्रीतोस्मि सुखीभवामि इत्यादिप्रत्यक्षेण व्यवहारेण च सुखं विसिद्धमिति भावः लक्षणं त्व
हं सुखीत्यनुभवविषयगुणत्वगुणपदप्रयोजनं पूर्ववत् साधर्म्यान्तरमाह तच्चेति अनुकूलत्वेन स्वेष्टत्वेन मम
दमस्त्विति क्रमेण वेदनीयम् ज्ञानविषयः ज्ञानविषयीभूतेस्य द्यत्सर्वप्राणिभिरेव स्वचूत्रितये यात्तेनत्सुखमित्यर्थः यद्य
पीदं परद्रव्योपभोगादिजन्यसुखविसायकं द्वेषदर्शनाद्व्याप्तम् तथापीष्टसाधनताविषयज्ञानजन्यजन्येच्छाविषयगुण
त्वेवोध्यम् सुखसाधने भोजनादावतिव्याप्तिवारणाय जन्यान्तम् ईश्वरेच्छाविषयेतिव्याप्तिवारणाय जन्येति दुःखाभाव

श्री
७८
76

लक्षणोक्तसुखस्यानेदुःखपदम्॥

दुःखं निरूपयति पीडेति पूर्ववत्सर्वम्॥ प्रतिकूलेति प्रतिकूलत्वेनानिष्टत्वेन ममेदं मास्त्विति ज्ञानविषयत्वमित्यर्थः द्विष्टसाधनता
विषयकज्ञानजन्यज्ञानाजन्यद्वेषविषयगुणत्वं तत्त्वम् तेन तपः क्लेशादेर्मुनीनां प्रतिकूलवेद्यत्वाभावेपि न क्षतिः पदव्यावृत्तिः पू
र्वरीत्या बोध्या सुखाभावव्यावारणाय गुणपदं न तु सुखाभाव एव दुःखमस्तु किमतिरिक्तकल्पनेनेति चेन्नसम्भ्रम् घटादेरपि दुः
खवत्त्वप्रसंगात् सुखध्वंस एवेति चेत् स्वर्गिणोपि दुःखानुभवप्रसंगः पूर्वसुखध्वंसानां विद्यमानत्वात् सुखासमानका
लीनसुखध्वंसस्तथेति चेन्नर्तकेपि दुःखानुभवो न स्यात् स्वर्गिसुखसमानकालीनत्वात् समानाधिकरणसुखासमा
नकालत्वं विवक्षितमिति चेत् इदानीं जनानां दुःखाभावप्रसंगः सर्वेषामेव ध्वंसानां तादृशसुखसमानकालत्वेन त
द्भिन्नत्वाभावात् चरमसुखध्वंसस्यैव तथात्वात् तादृशध्वंसानधिकरणकालवृत्तित्वविशिष्टस्य ध्वंसस्येति चेन्न सुषुप्ता
वपि दुःखापत्तेः नच सुषुप्तौ तस्यैत्यपि त्वद्मते नो योग्याभावान्नानुभव इति वाच्यम् अज्ञानसुखवद्दुःखस्य प्रमाणाभावा

पीडा दुःखं तच्च सर्वात्मनां प्रतिकूलवेदनीयं राग इच्छा सापीशस्य नित्यान्यदीया त्वनित्या क्रोधो द्वेषः उत्साहः प्रय
त्नः बुद्ध्याद्यः षडात्ममानसप्रत्यक्षाः ॥

त् यत्नाद्दृष्टाद्दुःखध्वंसस्यैव सुखत्वमित्यस्यापि सुवचत्वमाविनिगमनाविरहेणोभयोरपिगुणत्व सिद्धत्वेवक्तना इच्छां लक्ष
यति राग इति पूर्ववदिच्छामीत्यनुभवविषयगुणत्वं तत्त्वम् अत्रात्मकेच्छा राग इति यथा विशेषो रागो वाच्यः अतएव स्वर
सरागित्वं द्वेषं निरूपयति क्रोध इति यद्यपि क्रोधद्वेषयोर्न पर्यायता नरकादौ क्रोधाभावेपि द्वेषविशेष एव क्रोध इति
प्रतिपादयितुं तथाभिधानम् द्विष्टार्थसाधनीभूतचेतनविषयकद्वेषस्यैव क्रोधत्वात् नहि कंटकादिषु द्वेषे क्रोध
व्यवहारः प्रामाणिकानाम तस्मात्तन्नपदम् प्रयत्नं लक्षयति उत्साह इति अत्रापि प्रयत्नविशेष एवोत्साहो वाच्यः विशेषश्च
सुखविशेष एवोत्साहो वाच्यः विशेषश्च सुखविशेषजनकीभूतकर्मविषयकत्वम् यथा राज्ञो युद्धादौ स्त्रीणां च
कन्यादर्शनादौ भारवाहनाद्यनुकूलप्रयत्ने उत्साहपदाप्रयोगात् करोमीत्यनुभवविषयवृत्तिगुणत्वव्याप्यजातिमत्वं
प्रयत्नत्वम् बुद्ध्यादीनामेकं साधर्म्यमाह बुद्ध्यादय इति मानसप्रत्यक्षविषयवृत्तिगुणत्वव्याप्यजातिमत्त्वमित्यर्थः ते

धर्माधर्मौ लक्षयति धर्मेति लक्षणद्वयेतात्पर्यम् स्वासाधारणकारणत्वं धर्मत्वम् एवमन्यत्रापि इदं च पद्यपि कामुकस्त्रादिज
नके कामिनीदर्शनादावतिव्याप्तम् तथापि यागजन्यस्वर्गजनकवृत्तिगुणत्वव्याप्यजातिमत्वम् गंगाजलसंयोगादे
रपि स्वर्गहेतुत्वात् यागजन्येति यागजन्यस्वप्रत्यक्षवारणाय स्वर्गजनकेति स्वर्गाजनके कीर्त्तनादिनष्टे व्याप्ति
वारणाय गुणत्वेति एवं निषिद्धकर्मजन्यनरकजनकवृत्तिगुणत्वव्याप्यजातिमत्वमधर्मत्वम् तेन कंटकसंयोगादे
दुःखासाधारणत्वेपि न क्षतिः ईश्वरज्ञानत्वादिवारणाय जन्यान्तम् अन्यत्सर्वं रीत्या ननु दृष्टसमाग्रीवशादेव कार्योत्प
त्तिसंभवे अदृष्टे किं प्रमाणम् तत्र शाब्दप्रामाण्यसंभवेपि तत्प्रामाण्यानभ्युपगन्तारं प्रत्यनुमानं दर्शयति देवदत्तस्येति
चैत्रशरीरादेर्बाधवारणाय देवदत्तस्येति पक्षविशेषणम् आदिपदात् इंद्रियपरिग्रहः अत्र च पक्षतावच्छेदेन सा
ध्यसिद्ध्युद्देश्यता तेन द्वितीयादिशरीरादेर्ज्ञानादिजन्यतासंभवान्नांशतः सिद्धसाधनम् दोषाय आद्येत्वेन

धर्माधर्मौ त्वदृष्टं स्यादेतयोरसाधारणं कारणं तौ चाप्रत्यक्षावप्यनुमानगम्यौ तथाहि देवदत्तस्य शरीरादिकं
देवदत्तस्य विशेषगुणजन्यं कार्यत्वे सति देवदत्तस्य भोगहेतुत्वात् देवदत्तजन्यप्रयत्नवस्तुवदिति यश्च
शरीराद्यजनक आत्मविशेषगुणः स एव धर्मोऽधर्मश्च न च प्रयत्नादीनां शरीराद्यजनकत्वादिति संस्का

द्विविधं

पक्षो विशेषणीयः इति कश्चित् आद्यशरीरोत्पत्तिकाले चैत्रीयज्ञानादेरसंभवात् ईश्वरविशेषगुणादिनार्थान्तरवार
णाय साध्ये देवदत्तस्येति पदं तत्वादिवारणाय विशेषेति भावनाख्यसंस्कारस्याशरीराजनकत्वमुभयथा दिक्सिद्धमिति
तेनेनार्थान्तरम् नो चेन्नदन्यत्वेनापि गुणो विशेषणीयः आत्मादौ व्यभिचारवारणाय पदेद्वितीयसत्यन्तम् मैत्रादिश
रीरे व्यभिचारवारणाय देवदत्तस्येति भोगः सुखदुःखसाक्षात्कारः एकैकोपादानेन हेतुद्वये तात्पर्यम् तेन न कतर
वैयर्थ्यम् दृष्टान्तस्य साध्यविकलत्ववारणाय दृष्टान्ते देवदत्तेति वस्त्रगृहादिरूपमित्यर्थः पक्षधर्मतावलभ्यं
साध्यं दर्शयति यश्चेति यत्नादिनार्थान्तरं वारयति प्रयत्नादीनामिति आद्यशरीरोत्पत्तिकाले शरीराभावेन
देवदत्तीयप्रयत्नादेरसंभवात् इति भावः संस्कारं निरूपयति संस्कार इति अत्र चात्मविशेषगुणत्वे इति सूत्रं

बोधस्य रूपत्वादिवारणाय आत्मेत्यादिवारणाय विशेषेति
ज्ञानत्वादिवारणाय धर्मेति ॥

निवृत्ति[illegible]गुणत्वव्याप्यजातिमत्वमिति सामान्यलक्षणं

मु० ७७

77

श्चेत्तरमेन्दर्पूपत्तिवेगादृत्यादि मनोवृत्तिवृत्तिसंस्कारत्वव्याप्यजातिमत्वम् आत्ममात्रवृत्तिसंस्कारत्वं भावनात्वं पृथिवी
वृत्ति वृत्तिमनोवृत्त्यवृत्तिसंस्कारत्वव्याप्यजातिमत्वं स्थितिस्थापकत्वम् भावनायामतिव्याप्तिवारणाय पृथिवीति
वेगेति व्याप्तिवारणाय मनइति रूपेतिव्याप्तिवारणाय संस्कारत्वेति तेषामाश्रय विशेषान्दर्शयति पृथिव्यादीति वेग
स्यलक्षणांतरमप्याह क्रियाहेतुरिति क्रियाहेतुवृत्तिमनोवृत्ति वृत्तिसंयोगवृत्तिजातिमत्वमित्यर्थः संख्यादिवारणा
यमनइतिसंयोगत्ववारणाय संयोगेति भावनां लक्षयति भावनेति उक्तं प्रागेव लक्षणांतरमाह अनुभवेति उपल
क्षणमेतत् स्मृतेरपि संस्कारजनकत्वात् तथाच जन्यज्ञानजन्यसंस्कारत्वं स्मृतिजनकसंस्कारजनकत्वंच भा
वनात्वमिति भावः ईश्वरज्ञानजन्यवेगादिवारणाय जन्यपदद्वयंलक्षणे अत्रच घटत्वप्रकारकघटविशेष्यक
संस्कारं प्रत्युपेक्षान्यतादृशानिश्चयत्वेन हेतुता घटविषयोपेक्षासत्वे संशयसत्वे वा संस्कारानुपपत्तेः नच स्मृतिं प्रत्ये

वेगो भावना भावनास्थितिस्थापकस्तत्र वेगः पृथिव्यादि चतुष्टयमनोवृत्तिः क्रियाहेतुः भावनाख्यः संस्का
र आत्ममात्रवृत्तिः अनुभवजन्यः स्मृतिमात्रवृत्तिः स चोद्बुद्ध एव स्मृतिं जनयति उद्बोधश्च सहकारिला
भः सहकारिलाभः सहकारिणश्च सदृशादृष्टचिंतादयः यथोक्तं सदृशादृष्टचिंताद्याः स्मृतिबीजस्य बो ॥

क्षतादृशानिश्चयत्वेन हेतुतास्तु संस्कारं प्रति तु ज्ञानत्वेन हेतुतेति वाच्यम् तथासत्युपेक्षादितः स्मृत्यजनकसंस्कारकल्प
नापत्तेः तथाच घटत्वप्रकारकघटविशेष्यकस्मृतिप्रकारक घटविशेष्यकज्ञानत्वेन हेतुता अन्यथा घटादिसंस्का
रत्य दिसंस्कारापत्तेः एवंसति स्मृतिं प्रति ज्ञानत्वेनैव हेतुता लाघवात् ननु तत्रापि समानप्रकारकत्वादीति
विशेषः संस्कारकार्यैकाधिकरणाभवत्वेनैवातिप्रसंगनिरासादिति अलक्षणात स्मृतिजनकतायां सहकारिण
माह उद्बुद्ध इति उद्बोधपदार्थमाह उद्बोधश्चेति लाभः समवधानम् एककालवृत्तित्वमिति यावत् सहकारिणो विशिष्य
दर्शयति सहकारिणश्चेत्यादिना सदृशेति सादृश्यज्ञानस्योद्बोधकत्वम् यथाग्निहोत्रदर्शनात् तज्जनतस्मरणादि स्थले
एवं ज्ञानमात्रे स्यस्त्यानेदृष्टस्योद्बोधकत्वाभासरणस्थले जीवनादृष्टस्योद्बोधकताविस्तरेण श्लोकादिस्मरणमनःप्रतिसं

७८

स्थितिस्थापकं लक्षयति स्थितीति स्पर्शेति वेगवद्द्रव्यस्य स्पर्शवद्वृत्तित्वं चेष्टादौ विवाभावादिति द्योतयितुं विशेष
पदम् लक्षणेन पूर्वोक्तलक्षणे पृथिवीपदस्थाने स्पर्शवद्द्रव्यपदप्रक्षेपाद्वर्गतम् अन्यथेति आदिपदाच्छाखादिग्र
हणम् नामितस्य धनुरादेः पुनस्तादृगवस्थापूर्वक्रूपतापादकम् तत्संपादकक्रियाविशेषहेतुरित्यर्थः बु
द्ध्यादिभावनान्तानामेकं साधर्म्यमाह एतद्गुणादिना आत्मेति तदूपादावतिव्याप्तिवारणाय सत्यन्तं रूपादावतिव्याप्ति
वारणाय विशेषेति गुणान्तरेति द्रव्याकाशानीवत्वाद्येयम् संयुतिकर्मणी येलक्ष्यत्वनिर्णयात् अपशब्दमाह च
लनेगमनेनतद्वात्मकं तज्जातीयस्वरूपं तेनपाणादिरूपस्य हितीयादिकर्तव्यरूपस्यवाकर्तृणो निरासः लक्षणमा
हगुणत्वादिति अनेन पूर्वोक्तलक्षणस्य सारयुक्ति यथा सामान्यवान् समवायिकारणमस्पंदात्मा गुणइति अत्र
लक्षणे संयवपदस्थाने गुणपदे गुणपदस्थाने सत्पूपदम् चेद्रव्य इति तदेव कर्मलक्षणाकारं भवतीतिभावः व्या

स्थितिस्थापकश्च स्पर्शवद्द्विशेषवृत्तिः अन्यथा भूतस्यात्माश्रयधनुरादेः पुनस्तादृक्स्थापकः एतेबुद्ध्यादयो
धर्माधर्मोभावनात्मविशेषगुणाः गुणाउदासीनकर्मोच्यते चलनात्मकं कर्म गुणवद्द्रव्यमात्रवृत्ति
अविभुद्रव्यपरमाणोनमूर्त्तत्वापरमान्त्यासहेकार्थसमवेतं विभागद्वारापूर्वदेशसंयोगहेतुश्च ॥

व्याप्तिवत्त्वलक्षणान्तरमाह द्रव्येति सत्तासामान्यवारणाय मात्रपदम् द्रव्यभिन्नासमवेतत्वे सतिजन्यद्रव्यसमवे
तत्वमित्यर्थः तेन विशेषपदार्थेऽतिव्याप्तिः तस्यनित्यद्रव्यमात्रसमवेतत्वात् द्रव्यगुणभिन्नत्वे सतीत्यपिविशेष
णीयम् तेनन तयोरतिव्याप्तिः साधर्म्यान्तरमाह अविभ्विति अविभुनः परममहत्परमाणुभाववतो द्रव्यप
रमाणुनावच्छिन्नपरिमाणेनेत्यर्थः तदेव पर्यायशब्देनकथयति मूर्त्तत्वापरेति एकेति एकस्मिन्द्रव्ये समवेत
मित्यर्थः तथाचमूर्त्तत्वव्यापकताघटकपदार्थविभाजकोपाधिमत्त्वलक्षणत्वाद्विवारणाय व्याप्येतिचेष्टत्वादि
वारणाय पदार्थेति लक्षणान्तरमप्याह विभागेति उत्तरसंयोगहेतुत्वेपूर्वसंयोगनाशाश्रयेवनकर्मणइति मत्वा
तिरासाय विभागपूर्वसंयोगनाशयोर्हेतुरनारम्भकर्मणम् तथाच आधारेआधारितोनान्यसिद्धिरितिभावः
हेत्वपदस्य समवायिकारणपरत्वं तेनन द्रव्यादावतिव्याप्तिः संयोगविभागासमवायिकारणत्वकर्मत्वमितिसि
द्धम् एकैकासमवायिनोः संयोगविभागयोरतिव्याप्तेरूभयोपादानम् अतएवसंयोगरनपेक्षकारणमकर्मेति

गो॰
७८
78

तदवांतरभेदान्दर्शयति तत्रेति उत्क्षेपणत्वादयः कर्मत्वव्याप्यजातिविशेषाः विजातीयतत्संयोगजनकतयाप्रत्यक्षतनुभ
सिद्धा एवमूर्ध्वदेशसंयोगासमवायिकारणकर्मोत्क्षेपणं तथाधःसंयोगासमवायिकारणं कर्मापक्षेपणम् अभिमुखदेश
संयोगासमवायिकारणमाकुंचनम् तिर्यक्संयोगासमवायिकारणं प्रसारणम् अनियतपूर्वोत्तरदेशसंयोगासम
वायिकारणं गमनमिति बोध्यम् नन्वन्येपि कर्मविशेषाः सन्ति तत्कथं पंचैव दर्शितानीत्यत आह भ्रमणादय इति आदि
पदाद्रेचनस्पन्दनोर्ध्वज्वलनतिर्यग्गमननमनोन्नमनादीनां ग्रहणम् सामान्यलक्षणमाह अनुवृत्तीति स्वनिष्ठप्रका
रतानिरूपितपत्ति विशिष्टविशेष्यतासमानाधिकरणविशेष्यत्वनिरूपितप्रकारताशालिप्रत्ययत्वमनुवृत्तिप्र
त्ययत्वम् अत्रैकस्मिन्नेव घटे रूपवान् रूपवानित्याद्यनुगतप्रत्ययद्वये तत्त्वं रूपत्वं क्रियावत्त्वं समवायिकारणा
तम् प्रथमज्ञानीयविशेष्यतेन सह द्वितीयज्ञानीयविशेष्यतायाः समानाधिकरणत्वात् नानाविशेष्यकज्ञानेषु
एकस्य घटादेः प्रकारतया भवति तादृशविशेष्यतानाधिकरणमिति नानाविशेष्यकैकप्रकारकप्रत्ययत्वम्

तत्रोत्क्षेपणापक्षेपणाकुंचनप्रसारणगमनभेदात्पञ्चधा भ्रमणादयस्तु गमनग्रहणेनैव गृहीताः अनुवृत्तिप्रत्य
यहेतुसामान्यं द्रव्यादित्रयवृत्ति नित्यमेकमनेकसमवेतं ॥

चानुगतप्रत्ययत्वे हेतुत्वं विषयतया बोध्यम् तेन नादृष्टादावतिव्याप्तिः विषयताप्रकारता तेन न विशेषेतिव्याप्तिः
प्रकारता च समवायसंबन्धावच्छिन्ना बोध्या तेनाभावत्वादेरखण्डोपाधित्वेपि नातिव्याप्तिः तथा च समवायनिरूपि
तत्वे सति अनुगतप्रत्ययप्रकारत्वं सामान्यत्वमिति लक्षणं सिद्धम् गुरुत्वत्वादिजातेरतीन्द्रियत्वेपीश्वरस्ययोगि
नो वा तादृशप्रत्ययविषयत्वान्नाव्याप्तिः एतेन सामान्यपदार्थे प्रत्यक्षप्रमाणमादर्शितं लक्षणान्तरमाह द्रव्यादीति
अत्र लक्षणत्रये तान्वयम् घटवृत्तित्ववृत्तित्वमन्याहतिपदार्थविभाजकोपाधिमत्त्वमेकं विशेषपदार्थे तिव्याप्ति
वारणाय द्रव्येत्यादिसंग्रहोपाधिपुरस्कृतम् गुणवृत्तित्ववृत्तिपदार्थविभाजकोपाधिमत्त्वं तृतीयम् एकलक्षणपर
त्वे पदार्थद्वयोपादानवैयर्थ्यापत्तेः वृत्तिश्चात्र समवायः तेन न समवायेतिव्याप्तिः प्रसिद्धलक्षणमाह नित्यमिति संयो
गविभागादिवारणाय नित्यमिति एकपदस्वरूपकथनमात्रं न तल्लक्षणघटकं व्यावर्त्याभावात् अनेकत्वेति
व्याप्तिवारणायानेकेति अनेकसमवेतमित्यर्थः तेनात्यन्ताभावादिवारणं ॥

अवांतरभेदं दर्शयति तत्रेति परंत्वापदे अपरंत्वाप्यमित्यर्थः परं दर्शयति तत्रेति सत्तायां सामान्यं परं सामान्यांतरस्या
लकस्य व्यापकमिति बोध्यम् हेतुमाह बह्विति सामान्यांतरापेक्षया अधिकदेशसंबंधत्वात् मेयत्ववदिति भा
वः अत्र च समवायविशेषणान्नातिसाधारण्यं संबंधत्वमेकदेशनिष्ठतेन दृष्टांतसमं वेनत्वाभान्न साधनवैक
ल्यम् अतिरिक्तं घटत्वादिकं वा दृष्टांतो वा भ्यः तस्य लक्षणांतरमाह अनुवृत्तीति मात्रपदं द्रव्यत्वादिवारणाय तद
र्थश्च प्रागुक्तानुवृत्तिप्रत्ययप्रकारत्वे सति साम्प्रयस्य जातिमदपेक्षया अव्यावर्तकत्वे तज्जातिमत्त्वाप्रतियोगिकभे
दसाधने व्यभिचारित्वम् प्रमेयत्वादिवारणाय सत्यंतम् घटत्वादिवारणाय विशेष्यम् सामान्यादेरपि आव
र्तकतया असंभववारणाय जातीति सामान्यमात्रमिति सामान्यमेवोच्यत इति शेषः मात्रपदेन वक्ष्यमाण
सामान्यविशेषसंज्ञानिरासः अपरमिति द्रव्यत्वादिजातमत्तरं व्याप्यम् सत्तापेक्षया अल्पदेशवृत्तित्वमात्र

तच्च द्विविधं परमपरं चेति तत्र परं सत्ता बहुविषयत्वात् सा चानुवृत्तिप्रत्ययमात्रहेतुत्वात् सामान्यमात्रम्
अपरं द्रव्यत्वादि अल्पविषयत्वात् तच्च व्यावृत्तेरपि हेतुत्वात् सामान्यविशेषः अत्र कश्चिदपोहवादी घटा
द्यतिरिक्तं सामान्यमेव नास्तीति अत्र ब्रूमः किमालंबना हि भिन्नेषु विलक्षणेषु पिण्डेष्वेक

घटत्वादिवदिति शेषः व्यावृत्तेरपीति जातिमत्प्रतियोगिकभेदसाधकत्वादिति भावः अपिकारादनुवृत्तिप्रत्ययस
मुच्चयः लक्षणं पूर्ववत् अनुवृत्तिप्रत्ययहेतुत्वं सामान्यपदस्य व्यावृत्तिहेतुत्वं च विशेषपदस्य प्रवृत्तिनिमित्तमि
ति चस्याउच्यते अनुगताकारस्यालीकत्ववादिनो बौद्धस्य मतं दर्शयति अत्र कश्चिदिति व्यक्तीति अयमभा
वः अयं घट इत्यादिकं सविकल्पकं अनद्याकृतिरेव प्रकारतया भासते सा च घटेतरभेदरूपा अभावस्य तच्छ
स्यानतिरिक्ततया स्वरूपं चेति किमालंबनेति किंविषयेत्यर्थः अयमाशयः यथायं घटोयं घट इति ज्ञाने
योर्भिन्नविशेष्ययोरपीति सर्वानुभवसिद्धम् तत्र च ज्ञानवैलक्षण्यावैलक्षण्ययोर्विषयभेदाभेदनियतत्वेन
तथा घटोयमिति ज्ञानावैलक्षण्याद्विषयैक्यं तत्रापि विशेष्ययोर्भेदस्य प्रमाणसिद्धत्वाद्विशेषणस्यैव तत्व
सखभेद आयाति तस्माद्विशेषणभेदाभेदावेव प्रत्ययवैलक्षण्यावैलक्षण्यनियामकौ अतएवैकस्मि

गो॰
७८
79°

इदानीमनुवृत्तिरभावरूपातिरिक्तैवास्तु सामान्यकार्यकारित्वं किंभावसामान्याख्यपदार्थान्तरकल्पनेनेत्याशंकते
नन्वित्यादिनेति विधिरूपेति भावरूपेत्यर्थः विधिमुखेनेति गौरियमित्यादिना नञर्थानुल्लेखेनैकाकारा प्रत्यया
दित्यर्थः इदं च यद्यपि प्रत्ययपदार्थ्येसत्स्वरूपे तमः तेजोभावात्मके च विधिमुखप्रत्ययदर्शनादसंगतं तथापि
गवाविपदान्तालाघवाद्दोनवगोवृषाकान्तावच्छेदकं न तु गोभिन्नभेदो गौरवात् किंच गोत्वविशिष्टग्रहे प्रति
योगितावच्छेदकविशिष्टज्ञानानामभिन्नत्वग्रहे हेतुत्वं हेतुश्च तद्भेदरूपगोत्वविशिष्टग्रहदशायामन्योन्याश्रयप्रसङ्गादि
दृष्टव्यं वाच्यम् गोभिन्नभिन्नोयं गौरियमित्यादिप्रत्ययवैलक्षण्यस्यानुभविकत्वाच्चातिरिक्तं सामान्यमिति
विशेषपदार्थं निरूपयति विशेषेति नित्येति यद्यपीदमात्मैकत्वादावतिव्यापकम् तथापि जन्यवृत्त्यवृ

नन्वनुवृत्तिकृतैवैकाकारा बुद्धिरस्तु तथाहि सर्वेष्वेव गोपिण्डेषु अगोभ्योऽश्वादिभ्यो व्यावृत्तिरस्ति तेना
गोव्यावृत्तिविषयोयमेकाकारः प्रत्ययः अनेकेषु गोपिण्डेषु न तु विधिरूपगोत्वसामान्यविषयः इति
मैवम् विधिमुखेनैकाकारस्फुरणात् विशेषो नित्यो नित्यद्रव्यवृत्तिः व्यावृत्तिबुद्धिमात्रहेतुः तानि आकाशा
दीनि पञ्च पृथिव्यादयश्चत्वारः परमाणुरूपाः ॥

नित्यपदार्थविभाजकोपाधिमत्त्वमिति लक्षणं व्याख्येयम् शब्दत्वादिवारणाय पदार्थेति लक्षणान्तरमाह व्यावृत्तीति
मात्रपदमनुवृत्तिबुद्धिवारणाय तेनानन्वयत्वावति व्याप्तिः सामान्यरहितत्वे सति समवायिवाच्यम् तेनेतरव्यावर्तक
रूपादिव्यक्तिनिरासः ननु विशेषपदार्थे किंप्रमाणं न च स्वतः संकीर्णानां परमाणुवायवीनां कालाकाशादीनां च भे
दकधर्मं विना भेदासिद्धेस्तदर्थमेकैकविशेषः कल्प्यते इति वाच्यम् एकपृथक्त्वं पृथक्त्वं सरूपादिव्यक्तेर्वा भे
कत्वसंभवादिति चेन्न अयं परमाणुरेतत्परमाणोरेतत्परमाणोर्भिन्न एकपृथक्त्ववत्त्वादिति व्यभिचारि नच
तदेकपृथक्त्वं हेतुः तस्मात् परमाणोर्भेदासिद्धेः दोषः एतेनापि तत्त्वपदार्थग्रहात् परमाणुमात्रसमवेतत्वं हितस्य
नत्वम् तस्मात्प्रतिनित्यद्रव्यमेको विशेषपदार्थः स एव भेदकः इति संप्रदायः तदाग्रपरस्तेनायाह इत्या

समवायं निरूपयति अयुतसिद्धयोरिति व्याख्यातं प्राक् ननु युतसिद्धत्वमेव न ज्ञायते तयोः संबंधः कथं ज्ञातव्य इत्यपेक्षायामाह स
चोक्तएवेति परमाणुद्व्यणुकयोर्व्यवहारः तत्रैव नावनादीनामविवेकात्सम्यग्व्यवहारः इदेयकं केषांस्याग्रहे पितत्समूहमावेदकेक
कपरमाणोर्मतीन्द्रियत्वेपि पुंजस्य प्रत्यक्षत्वमित्यवयवविवेचकानां वाह्यानां मतेदर्शयति नौलमाहित्वावा पक्काभा
वादिति नचवयवरूपरसादिकं स्तितोऽवयविनिरूपादीनादृष्टगतरूपलब्धिरेव बाधकम् नचसजातीयसंभेदादे
वभेदाग्रहे यथा प्रभादीनामिवेति वाच्यम् तथात्वे अवयवगतरूपैरवयवि विनिगमकत्वात्पादिनानुपूर्वीपस्थितकनका
पेतयाकुंडलाद्यवयवितः पतनोत्कर्षप्रसंगात्सवर्णोत्खेडद्वयापेत्तयास्वर्णखंडत्वघतोलनेनतथादर्शनादि
दितिचेन्न अवयवावयविगुरुत्वैरेकजातीयमेवयतनेजन्यते यथैकेनदंडेनदंडाभ्यांदंडैर्वाएकजातीयएवघ
अयुतसिद्धयोः संबंधः समवायः सचोक्तएव नचवयवावयविनावप्ययुतसिद्धौ तेनतयोर्यः संबंधः समवा
यइति नचतद्युक्तम् अवयवातिरिक्तस्यावयविनोऽभावात् परमाणवो हि तथाभूताः सन्निकृष्टाघट
घटोपमितिरुच्यते अत्रोच्यते अत्येकस्थूलोपलब्धिप्रत्यक्षाबुद्धिः नचसापरमाणुष्वनेकेष्वनेके
षुस्थूलेष्वतीन्द्रियेष्वेवंभवितुमर्हतीति भ्रांतेयंबुद्धिरितिचेन्नबाधकाभावात् तदेवंघटपदार्थाद्रव्यादयो
वर्णिताः तेचविधिमुखप्रत्ययवेद्यत्वाद्भावरूपाएवइदानीमभावादिभावघटपदार्थोतिरिक्तोनि
रूप्यते तदवयववर्णस्यापि चयस्थलेचगुरुत्वाणोयुतसिद्धानांवयवावादेरपि पतनप्रकर्षेनियामकत्वस्यकल्पने
फलवत्वात् एतदेवसमाहारगुरुत्वमितिवदंतीतिदृष्टांतेपत्तविलेन विधिमुखप्रत्ययेति इत्यत्वादिप्रकारकेत्यर्थः
भावरूपाइति इत्यादिघटकाभावाभावविच्छिन्नाधेयेघटे अतिव्याप्तेः भावमात्रेतिव्याप्तिवारणायानिरूपितात
म घटोअभावस्येतिप्रमाविषयेघटे अतिव्याप्तिवारणाय स्वनिष्ठेति सप्तमपदार्थरूपाभावत्वभ्रमविषयोक्त
इतिव्याप्तिवारणाय प्रमेति घटाद्यभावरूपस्यघटादेलक्षणत्वेहिभावायत्वान्निदेशमध्येसप्तमपदार्थइति
एवंसत्येमिथ्येति इत्यत्वाद्यन्यतमधर्मानिरूपितस्वनिष्ठविशेष्यताशालिप्रमाविषयत्वमभावत्वमित्यर्थः अन्यथा घटाभावोनास्तीतिप्र
तीतिविः

४०

नन्वेवं तत्र भेदमाह । अभावस्त्विति अग्रे भेदाभिधानमपि दर्शयिष्यमाणत्वादाह । संक्षेपत इति अन्योन्याभावभिन्नोऽभावः संसर्गाभावः तादात्म्यसंबन्धावच्छिन्नप्रतियोगिताकाभावत्वमन्योन्याभावत्वमिति वक्ष्यति तेन नात्माश्रयः प्रतियोगिनि संसर्गारोपहेतुकधीविषयाभावत्वं संसर्गाभावत्वमिति केचित्तन्न प्रतियोग्यारोपस्य हेतुत्वे मानाभावात् नात्र गेहे वह्निरित्येतस्य जलह्रदे वह्निर्नास्तीतिवल्लोके च तादृशारोपं विनाप्यभावप्रतीतिदर्शनात् संसर्गाभावभेदानाह । प्रागभाव इति ध्वंसाभाव इत्यत्राभावपदं स्वरूपकथनपरं प्रागभाव इति ध्वंसाभाव इत्यत्राभावपदं स्वरूपकथनपरं प्रागभावं लक्षयति उत्पत्तेरिति इदं च सावधारणं प्रागेव यो ऽभावो न तु पश्चादित्यर्थः तेन नात्यन्ताभावादिनिरासः कारण इति तदधिकरणप्रदर्शनार्थं न तु लक्षणप्रविष्टं वैयर्थ्यात् समवायिकारण इत्यर्थः तेन कार्योत्पत्तिप्राक्कालमात्रवृत्त्यभावत्वमिति लक्षणं सिद्धं पूर्वं विनष्टघटादावतिव्याप्तिवारणाय भावपदम् उत्पत्तिमद्भावस्य वारणाय वृत्त्यन्तं उत्पत्तिश्चाद्यक्षणसंबन्धरूपा स्वाधिकरणक्षणध्वंसानधिकरणस्वाधि-

त्वभावः संक्षेपतो द्विविधः संसर्गाभावोऽन्योन्याभावश्च संसर्गाभावोऽपि त्रिविधः प्रागभावः प्रध्वंसाभावोऽत्यन्ताभावश्चेति उत्पत्तेः प्राक् कारणे कार्याभावः प्रागभावः यथा तन्तुषु पटोत्पत्तेः प्राक् पटाभावः उत्पत्तेरभावादनादिर्विनाशी च कार्यस्य तद्विनाशरूपत्वात् उत्पन्नस्य कारणेऽभावः विनाश इति यावत् य-

करणत्वमाद्यलक्षणत्वं उत्पत्तिपदं चातोपादेयं प्राक्कालत्वं च तदधिकरणकालत्वमित्युत्पत्त्यादेः प्रागभावाघटितत्वान्नात्माश्रयः नाशप्रतियोग्यभावत्वं प्रागभावत्वमिति च लक्षणान्तरं बोध्यं नाशस्यापि प्रतियोगिस्वरूपस्य अतिरिक्तकल्पने प्रमाणाभावात् उभयकालेऽपि तन्नाशाप्रतीतेश्च किं त्वयमनादिरनन्तो प्रमाणाभावात् इह कपाले घटो भविष्यतीति नेहदेउ इति सार्वलौकिकप्रतीतिरेव प्रागभावे प्रमाणं न च सा समवायिकात्यन्ताभावविषयैवात्र विषयसंदेहेऽपि सत्त्वादित्यलेवक्तु ना घटाभाव इत्यादौ नाशप्रतियोगीत्यस्याहार्थे उत्पत्तेरिति उत्पत्तौ प्रमाणाभावादित्यर्थः कार्यस्येत्युपलक्षणं तद्ध्वंसस्यापीति बोध्यं गोथानाधारसमयानाधाराभावत्वं प्रागभावत्वं तादृशश्च समयः प्रलय इति मिश्राः प्रतियोगिजनकाभावत्वमित्यपरे ध्वंसत्वं प

नार्थं यद्वा अवयविनाशित्वे सति प्रतियोगिसमवायिसमवायिमात्रवृत्त्यभावत्वमिति लक्षणान्तरे तात्पर्यम् प्रागभाववारणाय सत्यन्तं जन्योऽभावः सत्य इति लक्षणं न बोध्यम् आधिकाभावनिरासाय ध्वंसविनाशपदयोः पर्यायतां दर्शयति विनाश इति ॥

ति उत्पन्नस्येति [illegible] अवधारणं बोध्यं प्रतियोग्युत्तरकालमात्र... त्रिरभावो ... तेनान्योन्याभावादिनिरासः तदुत्तरकालत्वं च ... तदधिकरणकालत्वमात्रभावत्वं च गगनाद्याधारेष्वप्युक्तलक्षणम ... यिवृत्ति नात्मा[illegible]श्रयः कारण इति पूर्ववदधिकरणदर्शं

तस्योत्पत्तिसत्त्वेदर्शयितुंकारणपरंपरांदर्शयति सचेति आदिपदात्संयोगग्रहणम् जन्यइतिप्रयोज्यमित्यर्थः घटनाशप्रयत्नकप
लद्वयसंयोगनाशस्यैवहेतुत्वात् तत्रच मुद्गरपातस्यकपालस्यकपालक्रियाजनकोभूतसंयोगजनकतयाप्रयोजकत्वा
त् उत्पत्तिइदानींघटध्वंसोजातइत्यादिप्रत्ययादितिभावः तत्प्रागभावस्यप्रतियोगिरूपः प्रतियोगिप्रागभावरूपश्चउभयका
लेपिइहध्वंसोभविष्यतीतिप्रत्ययात् अतिरिक्तकल्पनेगौरवात् अविनाशित्वेहेतुमाह पुनरिति प्रतियोगिनइतिशेषःप्र
तियोगिनःपुनरुत्पत्त्यभावादित्यर्थः कार्यस्येतिपाठेप्ययमेवार्थः अयमाशयः यथात्यन्ताभावस्यात्यन्ताभावःप्रतियोगि तथा
ध्वंसस्यविनाशित्वेनध्वंसःप्रतियोग्येववाच्यः तथासति नष्टस्यघटादेःपुनरुन्मज्जनापत्तिरिति अतिरिक्तएवध्वंसइतिचे
त्तदातदातस्याप्यन्यःकल्पनीयइत्यनवस्थास्यात् ध्वंसेविनष्टइतिप्रतीत्यभावेननिष्प्रामाणिकत्वाच्चेति अत्रापीहकपालेघ
टोनष्टोनतुतन्तुइत्यादिप्रतीतयःसामयिकात्यन्ताभावातिरिक्तेध्वंसेप्रमाणमितिमतम् आत्यन्ताभावंलक्षयतित्रैकालि

सचमुद्गरप्रहारादिजन्यः सचोत्पन्नमानश्चविनाशीनष्टस्यपुनरनिवृत्तेः त्रैकालिकोऽभावोऽत्यन्ताभावः य
थावायौरूपाभावः अन्योन्याभावस्तुतादात्म्यप्रतियोगिकोऽभावः यथाघटःपटोनभवति ॥

कइति ------ अभावपदंचसंसर्गाभावपरम् तेननान्योन्याभावेतिव्याप्तिः नित्यपदंचप्रागभाववारणाय ध्वंसाप्रतियो
गित्वेसतिप्रागभावाप्रतियोगित्वपरम् रूपाभावोरूपसंसर्गाभावइत्यर्थः तेनभेदस्यनोदाहरणम् अन्योन्याभावंलक्ष
यतितादात्म्येति तदात्मातत्स्वरूपंतस्यभावस्तादात्म्यम् स्वरूपसंबन्धविशेषश्चभेदापरपर्यायः तदवच्छिन्नप्रतियोगि
ताकोऽन्योन्याभावइत्यर्थः प्रतियोगीत्यत्रप्रतियोगितावच्छेदकस्यापिप्रतियोगित्वमित्यभिप्रायेणवातादात्म्यप्रति
योगिकेत्यभिहितं घटःपटोनेतितदुदाहरणप्रदर्शनमुखेनतादृशप्रतीतीनांतादृशाभावेषुप्रमाणत्वंसूचितम् भे
दस्यात्रचतुर्विधेष्वेवाऽयःस्वरूपभेदःपृथक्त्ववैधर्म्यान्योन्याभावरूपः तत्रभेदपदस्यनानार्थत्वम् लघुनिशङ्को अन्यत्रेति
रुद्रलक्षणावा तत्रतावदत्यन्ताभावान्योन्याभावयोःप्रथमतोद्वैविध्यम् विशेषाभावःसामान्याभावश्चेति यथापीतघटव
ति नीलघटाभावःपीतघटोननीलघट ॥

दइत्यादिप्रतीतीनीसिद्धोविशेषाभावः॥ किंचिद्रूपवत्त्वनापमानोघटसामान्यमूल्येजापमानोभूतलेघटोनास्तिभूतलेनघटवदि
त्यादिप्रत्ययोर्द्वितीयेप्रमाणम् नचमिलितल्पप्रविशेषाभावादेवोपपत्तावलेसामान्याभावेनेतिवाच्यम् कपोरूपं
नवावापुरूपवान्नवेतिसंशयानुपपत्तेः कोटितिम्नयस्यसत्वात्पृथिव्यादिरूपविशेषाभावस्यानिश्चितत्वात् स्मृति
रिक्तस्याभावात् किंचमण्यादीनांदाहादिप्रतिबंधकानांविशेषाभावकूटस्यहेतुत्वापेक्षयालाघवादेकस्यैवसा
मान्याभावस्यहेतुत्वेकल्प्यतइतिसंक्षेपः तथाचसामान्यवृत्तिधर्मावच्छिन्नप्रतियोगिताकाभावोयत्रनयाभूत्स्व
ति पुनर्द्वैविध्यमसामान्यवृत्तित्वंचएकव्यक्तावपर्याप्तवृत्तित्वम् पर्याप्तिश्चस्वरूपसंबंधविशेषः एकस्मिन्घटे
सत्यपिद्वित्वसमवायेएकोनद्वावितिप्रतीतेः तत्राद्यस्तु घटवतिघटपटौनस्तः घटोनघटपटाविमादिप्रती
तौद्वः तत्रसार्वभौमाः पटविशिष्टघटाभावएवघटपटोभयाभावः नतुविशिष्टाभावातिरिक्तः कस्मिन्नुभ
याभावोनास्ति विशिष्टकेवलाद्यतिरिक्तमिति घटवत्यपिपटविशिष्टघटस्याभावात् घटपटौनस्तइत्यादेः नत्रहीपृथिव्यानिका
याः उभयाभावोनविशिष्टाभावः घटेघटत्वपटत्वोभयनास्तीत्यादौस्वसमवायसंबंधेनघटत्वसिद्धेः कालिकादिसंबंधेनत
घटेपिसत्वेनतादृशाभावप्रत्ययानुपपत्तेः विशिष्टस्यातिरिक्तत्वेप्रमाणाभावः दंडविशिष्टपुरुषादेरुत्पत्तिविनाश
कारणकल्पनागौरवाच्चेतिप्राहुः विशिष्टाभावस्तुत्रिविधः विशेष्याभावकूतोउभयाभावकृतश्चकेवलदंडवतिदंड
वतिकेवलपुरुषवतिदंडपुरुषोभयाभाववत्तश्चकेवलदंडवतिकेवलपुरुषवतिदंडपुरुषोभयाभाववतिचदंडपु
रुषोनास्तीतिप्रतीतेः यथाप्रतियोगितावच्छेदकधर्मभेदेनाभावभेदेनाभावभेदादर्शितः एवंप्रतियोगितावच्छेदकसं
बंधभेदादप्यभावभेदोवोध्यः संयोगेनघटवतिसमवायादिनाघटोनास्तीत्यादिप्रतीतेः अत्रसंयोगोद्रव्य
त्वाभावस्थलेयथाव्यधिकरणसंबंधावच्छिन्नप्रतियोगिताकाभावःस्वीक्रियतेतथाघटत्वावच्छिन्नद्रव्यत्वाभावा
दिरूपोव्यधिकरणधर्मावच्छिन्नप्रतियोगिताकाभावोपीत्याह तन्न प्रतियोगितावच्छेदकविशिष्टप्रतियोगिज्ञानं
स्याभावधीहेतुत्वात् द्रव्यत्वस्यचघटत्ववैशिष्ट्याभावात् भ्रमरूपतादृशज्ञानस्यपदार्थसाधकत्वाभावात् इति
संक्षेपः अत्रमीमांसकाः याद्दशोभूतलादौघटोनास्तीतिप्रतीतिर्जायतेतद्भूतलादिस्वरूपाण्यवाभावोनातिरिक्तः तो

निरूपितमर्थरूपं प्रमेयमुपसंहरन्ति तदेवमिति वेदांतिमतमाशंकते ननु ब्रह्मण इति तथा तं स्मृतिसिद्धम् तथा सर्वं खल्वि
दं ब्रह्मेत्यादिश्रुतेरिति भावः विज्ञानवादिमतमभिप्रेत्याह ज्ञानाद्वेति क्षणिकविज्ञानसंतानादित्यर्थः प्रपंचादिसिद्धे
ति न च प्रत्यक्षादिसिद्धस्य प्रपंचस्य व्यावहारिकसत्तामात्रं वस्तुसत्ता तु ब्रह्मण एवेति वाच्यम् घटः सन् पटः सन्नित्या
दिप्रतीतिविषयार्थातिरिक्तायां वस्तुसत्तायां प्रमाणाभावात् किंच प्रत्यक्षप्रमाणसिद्धस्यापि पदार्थस्याव्यावहारिकत्वे कल्प
नायेनानुमितादिविषयाणामपि तथात्वापत्तिः ब्रह्मणोप्यप्रामाणिकतापत्तिः एकमेवाद्वितीयमित्यादिश्रुतेरीश्वरे वेदतात्पर्य
म् सर्वमिमादेश्वरप्रपंचस्य ब्रह्मरूपतया चिन्तनीयत्वे तात्पर्यमित्यधिकमस्मत्कृतवैशेषिकभाष्यविवरणे द्रष्टव्यम् त
थात्वावच्छ्रुतादेरपि प्रामाणिकत्वम् अन्यथा ज्ञानस्याप्यप्रामाणिकतापत्तेरित्यादि द्रष्टव्यम् अर्थरूपं प्रमेयं नि

तदेवमर्था व्याख्याताः ननु ब्रह्मणो ज्ञानाद्वा अतिरिक्ता अर्था न सन्त्येवम् अर्थानामपि प्रत्यक्षादिसिद्धत्वेना
शक्यापलापत्वात् बुद्धिरुपलापत्वात् बुद्धिरुपलब्धिर्ज्ञानं प्रत्यय इत्यादिभिः पर्यायशब्दैर्याभिधीयते सा बु
द्धिः अर्थप्रकाशो वा बुद्धिः सा च संक्षेपतो द्विविधा अनुभवः स्मरणं च अनुभवोपि तथा यथार्थोऽयथार्थश्च तत्र यथा॥

रूपयति बुद्धिरित्यादि अत्र सांख्यादिमते बुद्ध्यादिपदानां भिन्नार्थत्वमिति तन्निराकरणपरपदचतुष्टयस्य पर्यायता प्रदर्श
नम् तथाहि सांख्यास्त्रिगुणात्मिकायाः प्रकृतेः सत्त्वगुणपरिणामस्य महत्तत्त्वस्यान्तःकरणविशेषस्य भेदाग्रहात् चै
तन्यमहं जानामीत्यभिमानस्योपलब्धिसंज्ञां बुद्धिवृत्तेः स्वाकाररूपपरिणामविशेषस्य च प्रत्ययसंज्ञां वदन्ति तदयुक्त
म् बुद्ध्यैव उपलभते जानाति प्रत्येति इत्युक्ते न वा प्रतीतौ सुखी दुःखी वेति प्रत्यनुभवति तस्मादेतेषां पदानां समा
नार्थत्वमिति संक्षेपः आधिक्यं तु गुणकिरणावल्यादौ बोध्यम् बुद्धिलक्षणं तु प्रागेव दर्शितम् अनुभवस्मरण
लक्षणे प्रागेव दर्शिते तथेति द्विविध इत्यर्थः अविसंवादीति विसंवादि प्रमाणान्तरबाधितो अयथार्थ इत्यर्थः व्या
पावत् तेषां यथार्थभिन्नो यथार्थ इत्यर्थः अयथार्थलक्षणमग्रे वक्तव्यम् ॥

गौ॰
४२
42

यथार्थानुभवस्यावान्तरभेदान्दर्शयितुमाह सच प्रत्यक्षादिभिरिति प्रत्यक्षादिप्रमाणचतुष्टयं दर्शयति यथेत्यादिना यथा
र्थं नासंपन्नयेत्युक्तं तैरिति विशेषणांशे व्यस्यति चक्षुरादितोऽप्रमस्यैवोमनेः अयथार्थं दर्शयति अयथार्थ इति अर्थव्य
भिचारीति अर्थप्रयोजने समर्थरूपे व्यभिचारी अजनकः तदभाववति तत्प्रकारकज्ञानरूप इत्यर्थः अप्रमाणेऽवि
प्रमाणविरोधिप्रमानुत्पत्तिनियतोऽप्रमाणेदोषजन्य इत्यर्थः अप्रमाणंऽप्रमाकरणम् सदोषेंद्रियादित

सच प्रत्यक्षादिभिः प्रमाणैर्जन्यते यथा चक्षुरादिभिर्घटादिज्ञानं धूमलिंगकमग्निज्ञानम् गोसाद॰
नाद्गवयपदवाच्यताज्ञानम् ज्योतिष्टोमेन स्वर्गकामो यजेतेति वाक्याज्ज्योतिष्टोमस्य स्वर्गसाधनत्वज्ञान
म् अयथार्थस्त्वर्थव्यभिचारी अप्रमाणजः संत्रिविधः संशयस्तर्को विपर्ययश्च संशयतर्कौ च वक्ष्येते विप
र्ययस्त्वतस्मिंस्तद्ग्रहणं भ्रम इति यावत् यथा पुरोवर्तिन्यरजते शुक्त्यादौ रजतमिति स्मरणमपि यथार्थ
मयथार्थं चेति द्विविधं तदुभयं जागरे ॥

ज्ञ इति कश्चित् तन्न अतस्मिंस्तद्ग्रहत्वस्य संशयेपि सत्वात् स्विप्यात्रेभ्रम इतीति तथाच तदभाववद्विशेष्यकतत्प्रका
रकनिश्चय इत्यर्थः इदं च प्रमाणलक्षणेऽकरीत्या आख्येयम् यद्यपीह प्राग्विपर्ययत्वेन तर्कस्योपि तथाप्याहा
र्यत्वान्नाह यत्वाभ्यां भेदेनोपन्यास इति वाच्यम् अनुभवस्य द्वैविध्यं दर्शयित्वा स्मृतेरपि तथात्वं दर्शयति स्म
रणमिति तदुभयमिति यथा वणिग्वीथीस्थरजतत्वविशिष्टमनुभूय स्मरति तद्रजतमिति तदयथार्थं स्व
तिरियम् अयथार्थस्तु स्वप्ने सर्पत्वेनोपलभ्य पलापितस्य सः सर्प इति स्मृतिः ॥

स्वप्नेति इदं चैकदेशि मतम् वस्तुतस्तु स्वप्नस्य मानसानुभवरूपत्वादुक्तमर्थं श्रोत्रेणाशृणोमीत्याद्यनुव्यवसायात् अत एव च
निरिन्द्रियप्रदेशावस्थितान्तःकरणसंयोगं द्विपद्वारेणैव यदनुभवनमिति स्वप्नज्ञानलक्षणाभाष्येऽनुभवनपदम् अ
पि स्मृतेर्व्यवच्छेदाय मीलितेऽपि स्वप्ने विद्यते तेन स्मृतमनसोऽननुकल्पादुक्तम् तथा च निरिन्द्रियप्रदेशावस्थितमनःसंयो
गासमवायिकारणकानुभवत्वं स्वप्नज्ञानत्वं स्वप्नानुभूतस्यार्थस्य पत्न्युपेक्षमरणं जायते तत्स्वप्नान्तिकमिति उच्यते तथा
ति व्याप्तिवारणायानुभवपदम् तत्र यथार्थस्मृतिरूपमेव निरिन्द्रियप्रदेशे निखिलमनःसंयोगः स्वप्नः स्वप्नस
तिस्वप्नज्ञानम् स्वप्नादिति वा यत्र केवलस्वप्नप्राप्त्येज्ञाने प्रयुज्यते तत्र लक्षणम् तत्स्वप्नज्ञानं त्रिविधं दृष्टजं यथा
तजमदृष्टजमं चेति यद्यपि सर्वत्र सर्वेषां हेतुत्वं तथापि विशेषहेतुतावलम्बे विभागः तत्राद्यं यथा कामुका
देः पूर्वानुभूतकामिन्यादिकमादरेण स्मरतो निद्राणस्य संस्कारवशात्स्वप्ने कामिन्याद्यनुभवः द्वितीयं यथा धातुना

स्वप्नेतत्सर्वमेव ज्ञानम् स्मरणमयथार्थम् दोषवशेन तदिति स्यात् इदमित्युदयात्सर्वज्ञाननिराकारमेव ॥

नां कफवातपित्तानामुपचयापचयलक्षणदोषात्स्वप्ने तत्तत्पदार्थानुभवः तत्र वातदोषादाकाशगमनभ्रमणभूकंपादिस्व
प्नप्रदर्शनम् पित्तदोषात्सुवर्णपर्वतमध्यानलपदिग्दाहादिदर्शनम् कफदोषात्सरित्समुद्रनदीरजतपर्वतादिदर्शन
नम् तृतीये शुभाशुभफलजनकादृष्टकृते तत्र शुभादृष्टकृतं गजारोहणायापसभक्षणादि तैलाभ्यंगोष्ट्रयानारोहणाद्य
शुभादृष्टकृतम् अत्र सर्वत्रैहिकानुभवजन्यः पारत्रिको वा संस्कारः कारणं धर्माधर्मौ च यथा पथ्यं वो यम् पारत्रिकसं
स्कारजन्यमेकदृष्टारोहणादेवलोकादिदर्शनमिति संदेहः स्मरणमिति स्मरणजन्यज्ञानमनुभवद्वयस्पर्धः तेन तस्मिंस्तद्विरो
यद्विरोधः इति केचित् अयथार्थाप्रमत्वापि सर्वमिन्यनुवर्तते ननु स्वप्नस्यापि क्वचिद्यथार्थत्वसंभवति यथाहमिहेश
श्यायां सुप्तो निद्रामीत्यादावत आह दोषेति मनसो निरिन्द्रियदेशावच्छेदेनात्मसंयोगप्रवात्रे दोषसत्त्वप्रमादितिस्थि
तइति येसाशय्यायां मेक्षनुमत्तस्या नेदं तेन शय्यामेषं तरवो योदयादिति भावः दोषस्तेजः प्रमेयवत्वं स्यान्तुमेनन
तज्ज्ञप्ति भेदलाभः अत्रेदं तत्त्वमिदानीन च चाक्षुषप्रमत्तविषयत्वं तच्च प्रकृते शय्यायां नास्तीति न प्रमात्वमित्याचार्याः सा

घटकश्चित् सर्वं ज्ञानं साकारं जन्यपदार्थत्वात् यो जन्यः पदार्थः स साकारः जन्यनिराकारपदार्थाभावात् जन्यपदार्थस्य
निराकारत्वाभावादित्यर्थः तेनन प्रतियोग्यप्रसिद्धिः तन्मतमाशंकते ननु तिति तस्येति आकारो विषयित्वं ज्ञानेन ज्ञा
तेघटे तत्रस्तविषयित्वे जन्यत्वं तत्र्त्यर्थः साकारत्वादेति अनेन मूलग्रंथे दूषितं स्मारयति तच्च स्वविषयित्वस्य स्वरूपसंबं
धरूपस्य विषयजन्यत्वेमानाभावः अतीतानागतादिविषयकज्ञानस्य स्थले व्यभिचाराच्च यदि च ज्ञानाकारपदार्थवि
षयो नातिरिक्त इति मते तदा भोजनेन भोजनज्ञानेनापि तृप्तिः स्यादित्यादिकमनुसंधेयम् रज्जुसर्पादिस्थलेपि
आकारेणाविषयानुमानमिति मतं निराकरोति अत एवेति यतो ज्ञानं निष्ठाकारस्य विषयजन्यत्वे मानाभावा
त्तेन पं: दूषणांतरमाह प्रत्यक्षेति तथा च सिद्धसाधनमिति भावः ज्ञानं विषयसंबद्धमेवोत्पद्यते तेन तद्रूपेण
सद्विषयकं भवतीति दर्शयति सर्गमिति अर्थनिरूप्यमिति विषयनिरूपकम् विषयनिष्ठविषयतानिरू

ननु ज्ञानेऽर्थेन स्वस्साकारो जन्यते साकारत्वाद निराकरणात् अत एव ज्ञानाकारेणार्थानुमानमपि
निरस्तम् प्रत्यक्षादिसिद्धत्वात् घटादेः सर्वं ज्ञानमर्थनिरूप्यम् अर्थप्रतिबद्धस्यैव तस्य मनसा निरू
पणात् घटज्ञानवानहमिति ननु ज्ञानवानहमित्येतावन्मात्रं ज्ञायते अन्यथैरिति चेन्न तत्रोक्तमेव प्र
प्रवृत्तिः धर्माधर्ममपि यागादिक्रिया तस्या जगद्व्यवहारसाधनत्वात् [illegible]नमः ॥

पितविषयिताशालिसविषयमित्यर्थः ज्ञानमतीत्यादिशब्दबोधदर्शनात् अर्थेति विषयविशिष्टस्यैव ज्ञान
स्य मनसा ग्रहणादित्यर्थः एतेन निर्विषयमेव ज्ञानं जन्यते तथा विषयाणामनुभवदविषयता किं त्वाकारेणानु
मेयपित्यादिकमसंगतमिति सूचितम् मनोरूपप्रमेयं निरूपयति अन्यथेति प्रवृत्तिरिति धर्माधर्मम
पीत जनिकेत्यर्थः तत्स्वरूपमाह यागादीति यागादिक्रियेतेजन्यते अनयेति कुर्यस्त्यागयागादिजन
क कृतिरूपेत्यर्थः आदिपदात् लिपिद्ध परिग्रहः तथा च धर्माधर्मजनकीभूतजन्यकृतित्वं प्रवृत्तित्व
मित्यर्थः जीवनयोनियत्नवारणायभूतानम् अप्रवृत्तवारणाय जन्यपदम् सा च त्रिधा वाक् प्रवृत्तिः बुद्धिप्रवृत्तिः शारी

त्यर्थः तपोरिति पाठे धर्माधर्मयोरित्यर्थः जगतः संसारिसमूहस्य वा
व्यवहारो ज्ञानं सुखदुःखसाक्षात्कारो भोगः इति यावत् तत्साधनत्वा
दित्यर्थः जगतः कार्यमात्रस्येत्यर्थे व्यवहारस्येति व्याख्येयं स्यात् ॥

स प्रवृत्तिः स्वविषयवचनद्वारा धर्माधर्मजनिका अद्या मानसिक
प[illegible]द्वारा [illegible]जनकीभूता द्वितीया क्रियाद्वारा तथा भूता तृती
य[illegible]द्वारा प्रवृत्तिर्भोगसाधनत्वं दर्शयति तस्या इति प्रवृत्तेरि

दी. ८३
83

दोषाख्यंप्रमेयंलक्षयतिदोषाइति अदृष्टजनकप्रवृत्तिसाधारणकारणत्वविशेषणत्वंदोषत्वमितिसामान्य
लक्षणंबोध्यम् दोषंविनापिजनकादोषाप्रवृत्तिदर्शनादसंभववारणायजनकांते अदृष्टद्वारणायासा
धारणमिति ज्ञानादिवारणायकारणपकारणान्तम् पञ्जेदित्यादिविभिन्नवाक्यवारणायान्त्येति आत्ममनो
योगवारणायविशेषेति रागइच्छेति इच्छाविशेषइत्यर्थः सचस्वसमानाधिकरणादृष्टोत्पादकप्रवृत्तिजन
केच्छारूपः तेनतेश्वरयोगिनोरिच्छायामतिव्याप्तिः द्वेषइतिव्याख्यातंप्राक् विपर्ययइति आत्मनिदेहादावा
त्मत्वभ्रमरूपविपर्ययविशेषइत्यर्थः प्रेत्यभावाख्यंप्रमेयंनिरूपयति पुनरितिपुनःपदेनमरणानन्तरत्वंसू
चितम् इदंचव्यापकम् आत्मनोअपूर्वदेहादिसंबंधः प्रेत्यभावइत्यर्थः प्रेत्यमृत्वाभवनमुत्पत्तिरेतादृशार्थेत्व

दोषारागद्वेषमोहाः रागइच्छा द्वेषोमन्युःक्रोधइतियावत् मोहोमिथ्याज्ञानंविपर्ययइतियावत् पुनरु
त्पत्तिःप्रेत्यभावःसचात्मनःपूर्वदेहनिवृत्तिरन्यदेहसंघातलाभः फलंपुनर्भोगःभोगश्च सुखदुःखे

प्रेत्यभावपदस्यार्थंदर्शयति सचेति पूर्वदेहेति पूर्वदेहोपजीवनादृष्टध्वंसः पूर्वदेहावच्छिन्नदुःखजनकात्ममनः
संयोगनाशोवापूर्वदेहस्यनिवृत्तिः प्रेत्येत्यस्यार्थः भावपदार्थमाहअन्यदेहेति स्वीयादृष्टाकृष्टदेहान्तरसंबंधइत्य
र्थः देहसंघातोदेहसमूहइत्यर्थः संसारस्यप्रवाहिकत्वात्तस्यभवितव्यत्वात्प्रमाणमप्रत्यक्षेनसाधनमनेनेतिवाचस्प
तिमिश्राः फलाख्यंप्रमेयमाह फलमिति भोगपदार्थमाह सुखेति जीवन्मुक्तस्यापिभोगोभवत्येव किंतु
नासौबंधनइतिविशेषः अतएवोक्तंममक्रोडाद्विषयभक्तेरिति दुःखाख्यंप्रमेयमाह पूर्वोक्तंसर्वंस्वार्थय
ति तच्चेति अपवर्गंलक्षयति मोक्षइति अपवर्जनमपवर्गः संन्यासादिश्रमनिरासायमोक्षइतिप्रसिद्धा
र्थकपर्यायशब्दान्तरप्रदर्शनम् ॥

मोक्षलक्षणमाह स्वेति एकविंशतीति तथाच मुमुक्षूद्देश्यत्वेन रूपेण दुःखपदस्याऽऽवृत्त्यार्थलक्षणया एकविंशतिप्रभेदोप
स्थापकत्वं बोध्यम् आत्मापवर्गान्यप्रमेयत्वमेकविंशतिदुःखानां साधारणधर्म इति वस्तुस्थितिः इदं च त्रैकालिकैकविंशति
दुःखानामभावप्रदर्शनाय स्वरूपकथनपरम् नतु लक्षणान्तर्गतं प्रयोजनाभावात् मुक्तिलक्षणे दुःखपदमात्मविशेषगुणप
रमेव नन्वेवं सति यत्र क्रमिकत्वेनैव ब्रह्मणा सह सोऽत इत्युक्तस्तत्र ब्रह्मलोकीयचरमसुखध्वंस एव मोक्षो वक्तव्यः तत्र यद्दुः
खाभावादित्यैकविंशतिपरत्वमेव दुःखपदस्येति चेन्न स्वर्गपातादिदुःखवत्तत्रापि मरणजन्यापत्तिकिंचिद्दुःखाङ्गीकारात् अ
दृष्टासाधारणकारणकत्वेन दुःखपदस्य सुखदुःखोभयपरत्वाद्वा एकविंशतिप्रभेदपरत्वे सर्वस्यैव चरमदुःखेतरदुःख
ध्वंसस्य चरमदुःखप्रागभावसमानकालीनत्वादसंभवापत्तेः नचास्तु चरमभोगध्वंस एव मोक्ष इति वाच्यम् तस्यापुरु
षार्थत्वात् दुःखस्येति निवृत्तिर्ध्वंसः सामासिकदुःखध्वंसस्यातिव्याप्तिवारणायात्यन्तिकीति ननु किमिदमात्यन्तिकत्व
म् नतावद्दुःखासमानकालीनत्वं मुक्तेर्दिवादिदुःखध्वंसादेरसदादिदुःखसमानकालीनत्वात्त्रातिव्याप्तेः नापि समा

सचैकविंशतिप्रभेदभिन्नस्य दुःखस्यात्यन्तिकी निवृत्तिः ॥

नाधिकरणदुःखासमानकालीनत्वम् स्वध्वंसावतिव्याप्तेः अथ समानाधिकरणविशेषगुणासमानकालीना
त्मविशेषगुणध्वंसो मोक्षः संसारकालीनेतिव्याप्तिवारणायासमानकालीनान्तम् मुक्तादृष्टे मुक्तावतिव्याप्तिवारणा
य समानाधिकरणेति आत्मैकत्वादिसमानकालीनत्वादसंभववारणाय विशेषेति गोत्वादिध्वंसेतिव्याप्तिवारणा
यात्मेति मुक्तात्मचरसंयोगध्वंसेतिवारणाय चरमविशेषपदम् नच सध्वंसो मोक्षः चरमस्यापि मुक्तत्वापत्तेः नच
मोक्षजनकादृष्टसमानकालीनत्वादसंभव इति वाच्यम् भोगमोक्षसाधनं च प्रत्येवादृष्टस्य हेतुत्वाङ्गीकाराद्वमो
क्षस्य तथात्वाभावेनादृष्टजन्यत्वाभावात् अन्यथा तत्त्वाप्रत्ययस्यदृष्टान्तरापेक्षायामनवस्थावशात् निर्मोक्षाप
त्तेरितिचेत् मैवम् चरमदुःखसाक्षात्कारसमानकालीनतया तत्रासंभवात् तदुक्तम् वर्तमानाप्यविरमतु अयतत इति
तस्माद्दुःखध्वंसस्यात्यन्तिकत्वमेव दुर्वचमिति चेदत्रोच्यते समानाधिकरणदुःखप्रागभावासमानकालीनदुःखध्वंसो
मोक्षः इदानीन्तनमुक्तावतिव्याप्तिवारणाय समानाधिकरणेति चेदात्मसंयोगप्रागभावादिनाऽसंभववारणाय दुः

त्रितिवाच्यम् असमानकालीनेत्यस्य दुःखविशेषगुणानान
उत्पत्तिमद्दुःखस्य चरमदुःखप्रागभावसमानत्वात् अत्रेदं
क्रमादृष्टाभावा ॥

पदम् तत्त्वज्ञानिव्याप्तिवारणाय प्रागभावेति मुक्तात्मसंयोगध्वं
सस्याहुःखं मुक्तत्वप्रसक्त्याऽचरमदुःखपदम् ननु तथापि
दुःखध्वंसस्य दुःखप्रागभावासमानकालीनत्वात्तत्रातिव्या

त्यंतिकदुःखध्वंसो वर्त्तते इति सर्वमतसिद्धम् कस्यापि मते मुक्तस्यानंगीकारात् परंतु तादृशदुःखध्वंसस्य मुक्तित्वे विवादः तथाहि
भट्टमते नित्यसुखाभिव्यक्तिर्मुक्तिरिति अत्र सुखाभिव्यक्तेः सांसारिकदशायामपि सत्वादतिव्याप्तिरतो नित्येति सुखविशेष
णम् अभिव्यक्तेर्नित्यत्वे संसारिणामविशेषापत्तेः न च जन्यज्ञानत्वावच्छिन्नं प्रतिशरीरत्वेन हेतुत्वान्मुक्तस्य नित्यसुखाभि
व्यक्तेः कारणमेव नास्तीति वाच्यम् शरीरजन्यतावच्छेदकज्ञानवृत्तिवैजात्यकल्पनात् नित्यसुखाभिव्यक्तौ तु चरम
दुःखध्वंसस्यैव कारणत्वम् नित्यसुखे च नित्यं विज्ञानमानंदं ब्रह्मेति श्रुतिप्रमाणमिति तदभिप्रायः तन्न मुक्तस्य
जीवस्य नित्यसुखे प्रमाणाभावात् अहं सुखी न तु सुखमहं मम सुखं नास्ति दुःखेनास्मीत्याद्यबाधितप्रतीतेस्तस्य साधनत्वाच्च आनंदमि
ति श्रुतेनानन्दात्मकब्रह्मपरोर्थः किंतु मत्वर्थीयाच्प्रत्ययेनानंदवदित्यर्थः अन्यथानपुंसकत्वानुपपत्तेः तथा च पुण्या शब्द
वत् रूपाकाशत्वविशिष्टस्य नित्यत्वेपि न शब्दस्य नित्यता तथा चानंदशब्दे नित्यत्वेवाभिमतेत्वेवापि तेवोपितेपि नानंद
स्य नित्यसुखप्रतीयतेव सत्तस्य नित्यमित्यादिश्रुतेरीश्वररूपब्रह्मपरता तस्य च दुःखात्यंताभाववत्त्वमेव नानंदवत्त्वमेव नानंदव
त्त्वमेव नानंदवत्त्वम् अस्तु वा नित्यसुखवानीश्वरः तथापि जीवस्य मुक्तावस्थायां नित्यसुखाभिव्यक्तिर्भवतीत्यत्र मानाभावः प्र
त्युत अशरीरं वा वसंतं प्रियाप्रिये न स्पृशत इति मुक्तस्य सुखादिसंबंधाभावबोधकश्रुतिर्बाधिका न च घटवत्त्वित्वति
घटपटोभयाभावप्रतीतिवत् सुखदुःखवत्त्वेपि सा दुःखोभयाभावप्रतिपत्तिर्नानुपपन्नेति वाच्यम् सुखपदवैयर्थ्यापत्तेः वा
वसंतमिति पदस्य विरूपं तेन संसारितादशायां पूर्वशरीरनाशात्तलोत्तरशरीरत्वेपि न तदानीं तथा पत्र त्वस्य सर्वमात्मैवा
भूत्तत्केन कं पश्येत्तत्केन कं जिघ्रेत्तत्केन कं रसयेत्तत्केन कं रसयेत्तत्केन किमभिवदेत्तत्केन कं स्पृशेत्तत्केन किं मन्वीत
तत्केन किं विजानीयादित्यादि बृहदारण्यकश्रुतिरपि बाधिका यत्रेति यत्र दशायामस्य सर्वं द्विपविषयरूपेहिन्नेति
शेषः आत्मैवाभूत् आत्ममात्रमेवावस्थितमभूत् इत्यर्थः अनयाप्रमुक्तस्य ज्ञानसामान्यसामग्रीविरहात् ज्ञानसामा
न्याभावो दर्शितः इति कुतो नित्यसुखाभिव्यक्तिर्मुक्तस्येति स्वयमूहनीयम् एवं च आत्यंतिकदुःखप्रागभावो मोक्षः
नत्रात्यंतिकत्वं न विनाशित्वं संसारितादशायामपि तत्सत्वेनातिव्याप्तेः किंतु समानाधिकरणदुःखदुःखजनकप्रा
गभावसामान्याभाववैशिष्ट्यम् चरमदुःखेतिव्याप्तिवारणाय दुःखेति ... —तिव्याप्तिवारणाय दुःखजनकप्रागभा

धिकरणयावद्दुःखध्वंससमानकालीनत्वमात्यंतिकत्वमि
तिकेचित् सांमारि ॥

ति वैशिष्ट्यं च कालिकसामानाधिकरण्येन बोध्यम् समाना

गौ·
८५
85

केतिचान्निवारणायदुःखप्रागभावेनित्यात्यंतिकत्वविशेषणमित्याहुः तन्न मुक्तस्यदुःखप्रागभावाभावात् तस्यप्रतियोगिजनकत्व
नियमात् अपिच मुक्तिरूपदुःखप्रागभावस्य किंदुःखप्रतियोगिनातीतेनतत्प्रागभावस्यानष्टत्वात् नापिभावि समानाधि
करणस्यतस्याप्रसिद्धेः प्रागभावस्यप्रतियोगिसमानाधिकरणनियमात् मिथ्यास्तु दुःखात्यंताभावोमुक्तिः ननु कस्यदुः
खस्यात्यंताभावोविवक्षितः परदुःखस्यचेत् तदासर्वदैवसत्वतःसिद्धः स्वदुःखस्यात्यंताभावस्यतुस्वात्मन्यसंभवः त्रैकालि
काभावस्यैवात्यंताभावात् एवं घटादेरपितत्सत्वतन्मुक्तिप्रसंगः अत्यंताभावस्याजन्यतयामुक्तेः पुरुषप्रयत्नसाध्यत्वा
नुपपत्तिश्चेन्नैवम् स्ववृत्तिदुःखगतानामपिकात्यंताभावस्यविवक्षितत्वात् नच घटादावपितत्सत्वम् चरमदुःखसाध
नध्वंसरूपसंबंधेनतद्वत्वस्यविवक्षितत्वात् यद्यपि दुःखसाधनध्वंसोपुरुषार्थः तादृशप्रागभावश्च नसाध्याभावत्वत्था
पिविशेष्यस्यात्यंताभावस्यपुरुषार्थत्वेविशेषणस्यतादृशध्वंसस्यजन्यत्वमितिविशिष्टस्यतथात्वेबोध्यम् अतएव दुः
खेनात्यंतविमुक्तश्चरतीतिश्रुतौनदत्यंतविमोक्षोपवर्गः इतिन्यायेचात्यंतपदमुपादीयते इतिवदंति तन्न दुःखसाधनध्वंसस्यात्यंताभा
वसंबंधत्वेमानाभावात् तादृशदुःखध्वंसापेक्षयागौरवाच्च श्रुत्यादावत्यंतपदस्यध्वंसगतनिरुक्तात्यंतिकत्वपरत्वात् एकदेशि
वेदांतिनस्तु ब्रह्माद्वैतसाक्षात्कारादविद्यायांनिवृत्तायांकेवलस्यात्मनःस्वप्रकाशज्ञानसुखात्मकतयावस्थानंमोक्षइतिवदं
तितदपिनयुक्तम् तादृशस्यब्रह्मणोनित्यतयासांसारिकदशायामपितदापातात् तस्यच स्वतःसिद्धत्वेमुक्तेःप्रयत्नसाध्यत्वा
भावापत्तेश्च मिथ्याज्ञानरूपायाःपदार्थांतररूपायाअविद्यायानिवृत्तेःसुखदुःखान्यतररूपत्वाभावात् ननिरुपाधिपुरुषेच्छा
विषयत्वरूपपुरुषार्थत्वेतादृशोपसाधनताभावेनतोपायत्वमपि तस्याश्च ध्वंसरूपायाअतिरिक्तत्वस्याप्रसिद्धत्वात् इतिसंक्षे
पः त्रिदंडिवेदांतिनस्तु परमात्मनिजीवात्मलयोमोक्षः लयोनामलिंगशरीरस्यनाशः लिंगशरीरं पंचतन्मात्रापंचमहाभूते
कादशेंद्रियाणिमिलितानिजीवस्यसुखदुःखसाक्षात्कारावच्छेदकानीत्याहुः तदप्यविद्यानाशावच्छेदशरीरनाशस्यापुरुषार्थत
यापूर्वोक्तदूषणग्रस्तं सांख्यास्तुपुरुषस्यनकर्तृत्वभोक्तृत्वादिकं किंतु त्रिगुणात्मिकाप्रकृतिरेकानित्यापरिणामिनीत
स्याःप्रथमपरिणामिनीतस्याःप्रथमपरिणामोमहत्तत्वंबुद्धितत्वमितिचोच्यते कर्तृत्वादिकंतस्यैवतथाभावाष्टकत्वानि
तस्यैवभावाष्टकेद्विविधं धर्माधर्मज्ञानाज्ञानवैराग्यावैराग्यैश्वर्यानैश्वर्यरूपं बुद्धिसुखदुःखेच्छाद्वेषप्रयत्नादृष्टसंस्काररूपंच ॥

कार्यकारणयोरभेदाच्च प्रकृतिः कर्त्रीत्युच्यते पुरुषस्तु चैतन्याश्रयः धर्मधर्मिणोरभावात् ज्ञानस्वरूपो विक्रिया
रणाम् कूटस्थो नित्यश्चलितश्चोच्यते नत्सवथाज्जडस्य महतः स्वच्छस्य चेतनत्वाभिमानाच्च नेनाहं करोमीत्यभि
मानः एवंवर्तन्निष्टपुरुषे ष स्वधामः इयंच बुद्धितत्त्वज्ञानरूपो यः परिणामः तेन सर्वथा विषयः पुरुषस्य स्व
रूपतिरोधायकश्च निवद्धितत्त्वनाशे स्यात् दुःखादिविषयावच्छेदेन पुरुषस्य स्वरूपतिरोधानाभावस्य क
र्तृत्वभोक्तृत्वेन रूपस्यावस्थाने मोक्षः अत एवोक्तम् मनोनाशे महोदय इति मनो बुद्धितत्त्वमिति वयंति नर
पि न साधीयः बुद्धितत्त्वनाशस्य स्वरूपतिरोधानाभावस्य वा सर्वदुःखाभावभिन्नत्वेनापुरुषार्थत्वे न एवो
क्तम् मनोनाशे महोदय इति मनो बुद्धितत्त्वमिति वदंति तदपि न साधीयः बुद्धितत्त्वनाशस्य स्वरूपतिरो
धानाभावस्य वा सर्वदुःखाभावभिन्नत्वेनापुरुषार्थत्वात् तदनुपायत्वाच्च किंच भोगस्य प्रकृतिधर्मत्वे धर्मि
सामानाधिकरण्यव्यत्ययेन नासामानाधिकरण्यस्यापत्तिः अहं कर्ता अहं कर्ता अहं भोक्तादि
वद्धेन नाहं करोमीत्यबाधितप्रतीतेः किंच बुद्धितत्त्वं नित्यमनित्यं वा नित्यं चेत्तदा बुद्ध्युपहितचैतन्यस्य सर्व
दा सत्त्वादनिर्मोक्षः अनित्यं चेत्तस्य नित्यभावस्यासत्त्वात् नियमाज्जन्यतावात्मानं याचतदुत्पत्तेः पूर्वं तस्य
रोधाभावरूपादविरहात्तदपि नोत्पद्यते नित्यस्वाराभावपवस्यादिति तदुक्तमाचार्यैः अत्यन्तमनियता
श्चैतन्याच्च स एव नः अन्यथा न पवर्गः स्यादसंसारोऽथवा ध्रुव इति । पातंजलास्तु योगिनो योगसिद्धिवशात् क्ले
शजात्यायुर्भोगरूपपरतंत्रात्मकवंधापगमे स्वातंत्र्यं मोक्ष इत्याहुः तत्र यदि स्वातंत्र्यं यदि दुःखतत्साधननिवृत्ति
स्तदा अस्मन्मतमेव यदि च योगवशात् अणिमाद्यष्टविधैश्वर्यं तदा स्वर्गादिवद् दुःखानांतरीयत्वाद्विनाशित्वा
च्च हेयमेवमुमुक्षूणामिति चार्वाकादयस्तु दुःखेन तया शरीरादिविरहात्मनैव मोक्ष इति वदंति तेषां मते शरी
रादिनिवृत्तेर्यद्यात्मा नास्ति तदा कस्य लाभः पूर्वं चास्ति तदा धर्मिग्राहकमानेन तस्य नित्यतया विनाशासंभवी श्र
याद् मिति प्रत्ययप्रमाणवादात्मा सत्त्वविनाशेऽपि वेति चेदस्त्वात्मनो ज्ञानाभावो मुक्तावित्यत एव परे तु ज्ञानातिरिक्तात्मनि प्रमा
णाभावादित्यत्र तच्चदर्शितमात्मत्रयेयविज्ञानवादिनस्तु ज्ञानं द्विविधं आलयविज्ञानं प्रवृत्तिज्ञानं च तत्र मयमेवक्ष

तदुक्तमित्यन्ये ते तन्न विज्ञानसामान्यं प्रमेयवशरीरादिरूपव
सो विनाशात् क्षणिकालेताहशविज्ञानधारासत्त्वे प्रमाणा
भावाक्षितिमत्त्वेपः द्वेषः हृष्येनेनमः सरस्वत्यैनमः ॥

णिकं तत्र प्रवृत्तिविज्ञानेषु घटपटादिविषयाकारं तदुपादान
मालयविज्ञानं निर्विषकं तदतिरिक्तं सर्वमेवालीकं तत्र सं
सारकालीन प्रवृत्तिविज्ञानोच्छेदकेवलालयज्ञानधाराभो

86

एकविंशतिर्दुःखानि दर्शयति शरीरमिति यद्यपि षडिन्द्रियाण्येतावन्मात्रमपेक्षितं शरीरस्य चक्षुरादिविषयत्वात् बु
द्धिसुखदुःखानां मानसविषयत्वेनैव संग्रहसंभवात्तथापि शरीरबुद्ध्योर्दुःखसाधारणकारणत्वात् सुखदुःखादी
नामन्यविषयप्राधान्यमिति सूचयितुमेतयोर्दुःखमेवहेयम् तदन्यविंशतिकं च तत्संबंधितया तत्सूचयितुं च
पृथगुपादानमिति बोध्यम् ननु शरीरादीनां तदात्मसंबंधिनां तदात्मनः क्वापि निवृत्तिः संभवति विषयाणां रूपरसा
दीनां कथं नहि चेन्द्रियविषयाणां सर्वेषां विनाशश्चैत्रस्य मोक्षे तु निकश्चिदभ्युपैति संभवति च चक्षुरादिविषयरू
पत्वादिविषयरूपत्वादिजातीनां नित्यतया निवृत्तेरसंभवादिति चेन्नैवम् विषयपदेनात्र विषयसंबंधिरागस्यैवाक्षे
प्तात् स चोत्कटेच्छारूपस्तेन न क्वाप्यनुपपत्तिमिति शरीरादेः पृथगुपादानमिति स्पष्टम् दुःखपदमात्मविशेष
गुणविशेषपरम् अन्यमन्यत्र गौणमिति दर्शयति गौणमन्यदिति ननु मोक्षे दुःखवत्सुखस्याप्यभावात्तस्यायम्

एकविंशतिप्रभेदस्तु षडिन्द्रियाणि षड्विषयाः षड्बुद्धयः सुखं दुःखं च गौणमुख्यभेदात् सुखमपि दुःखं दुः
खानुषंगात् अनुषंगो ऽविनाभावः स चायमुपचारो मधुविषसंपृक्तान्नमपि विषयपक्षनिक्षेपवत् ॥ ८

एतेन प्रेत्यावर्ततोक्तस्तस्मापनेप्रवृत्तिरित्यत आह सुखमिति दुःखमेव दुःखानुविद्धमेव अनुषंगपदार्थमा
ह अविनाभाव इति अविनाभावो व्याप्तिः तथा च सुखं दुःखरूपेण लक्षणया इष्टपदं सुखादीनां सर्वेषाम्
उपस्थापकमिति तात्पर्यम् एतदेव दर्शयति स चेति उपचारो लक्षणेत्यर्थः विषयपरेति मधुविषसंपृक्तविष
भुक्तमिति विषयाविनाभावलक्षणविषयपदप्रयोगादित्यर्थः अयमाशयः स्वर्गादिसुखस्यापि वृद्धिक्षय
पातसाध्यत्वात्पातभीत्यादिजन्यदुःखान्वितत्वाद्विनाशित्वेनोत्तरकालिकदुःखग्रस्तत्वाच्च मधुविषसंपृक्ता
न्नभोजनवत्स्फूर्तिर्दुःखानुविद्धत्वं किं पुनरन्येषां वैषयिकसुखानां दुःखदाङ्कलताबाध्या तथा वक्ष्य
नरपरप्रहारपरिग्रानप्राणवियोगकालस्य जनस्य जनस्य जलया न जन्यसुखवद्वैषयिकसुखेषु मरणत्स्यावरा
णं रागिणां मरणत्स्याजलेषु मरुमरीचितनुष्णानां मरणाणां प्रियापानतः सुखवेदोयः तु घाषाविवेकिनः सुखमात्र

आधिनः ५

अपवर्गोत्पत्तिप्रकारं पृच्छति स पुनरिति कथं केन प्रकारेणोत्पद्यत इत्यर्थः शास्त्रादित्यनेन श्रुत्यादिशास्त्रजन्यो श्रवणमा
दर्शितम् तदुक्तं श्रोतव्यः श्रुतिवाक्येभ्यो मंतव्यश्चोपपत्तिभिरिति विदितेत्यनेन च मननं दर्शितम् अत्र च परमात्मा द्रष्टव्य
भ्योऽभिद्यते जगत्कर्तृत्वादिमाद्यनुमानेपदत्त्वप्रतिपादकश्रुतीनां प्रयोजकत्वं शास्त्रादिति पंचम्या दर्शितम् सर्वप्रमेय
मिति ज्ञानसत्त्वेपि न तत्त्वज्ञानमिति समस्तपदं मशेषरूपेण ज्ञानलाभार्थम् विषयेत्यादिना मोदे च प्रकारो दर्शितः
अन्यथा विषयरागसत्त्वे विमोहोपायकस्य प्रवृत्तेः निदिध्यासनं कुर्वत इत्यर्थः ध्यानस्य परिपाकः फलं योगजधर्मः

सः पुनरपवर्गः कथम् उच्यते शास्त्राद्विदितसमस्तपदोषदर्शनेन विरक्तस्य मुक्तोर्ध्यायिनो ध्यानपरिपाक
वशात्साक्षात्कृतात्मनः क्लेशहीनस्य ॥

पे तद्वशात्साक्षात्कृतात्मानौ जीवपरमात्मात्मानौ येन स तथा तस्येत्यर्थः उभयात्मनतत्त्वज्ञानमेव मुक्तिं प्रतिकारणम् न
मेवविदित्वातिमृत्युमेतीति परात्मप्रकरणीयश्रुतेः आत्मानं चेद्विजानीयादयमस्मीति पूरुषः किमिच्छन्कस्य कामाय
शरीरमनुसंज्वरेदिति जीवात्मपरश्रुतेश्च तत्र परमात्मसाक्षात्कारे योगजधर्मः प्रत्यासत्तिः जीवात्मसाक्षात्का
रे यद्यपि मनःसंयोग इष्टः इति तथाप्यंतरिन्द्रियकालाकाशादिभिन्नतया तत्साक्षात्कारेण योगजधर्मं विनेति न
त्रापि तदपेक्षा क्लेशेति क्लिश्यन्ते संसारयातनानुभवः क्रियते अनेन क्लेशः सवासनमिथ्याज्ञानं तद्रहितस्येत्यर्थः

यथाह्येतत्तत्त्वज्ञानिनो मिथ्यारोपकं मोक्षं चिन्नदुःखसमाप्तेः ॥ सगतेः

गी.
८७
87

निष्कामकर्मेति साक्षात्कृतात्मतत्त्वस्य चरेत्तु न्वेमान्नितम् कामः फलकामना तद्रहितानां भगवत्प्रीत्यर्थं विहितानां
कर्मणामात्मशुद्धिद्वारा तत्त्वज्ञानं प्रतिहेतुत्वात् कामनिषिद्धकर्मणां तु स्वर्गादिफलजनकत्वेन प्रतिबन्धकत
यात्मशुद्धिविवर्जनीये अत्रैव कर्मः फलकामनां विना भगवत्प्रीत्यर्थं कृतैः कर्मभिः पापक्षयरूपात्मशुद्धिर्भवति तया विषये
ष्ववैराग्यं ततः श्रवणादिक्रमेण तत्त्वज्ञानोत्पत्तिः ततः सवासनमिथ्याज्ञाननाशः प्रारब्धेतरपूर्वकर्मनाशश्च ततः प्रारब्धकर्मणां
भोगात् क्षये सति मिथ्याज्ञानाभावादन्यकर्मान्तराभावेन मोक्षनिष्पत्तिरिति ननु तत्त्वज्ञानं विनापि गंगास्नानकाशीमरण
तुलापुरुषदानादिकर्मणां मोक्षहेतुत्वं श्रूयते न कथं कर्मणां तत्त्वज्ञानोपयोगित्वमुच्यते तस्माच्चरमदुःखनिवृ
त्तिकर्मादिनाशपतावच्छेदकवैजात्यकल्पनाद्व्रीहियववत् ज्ञानकर्मणोर्मुक्तिहेतुत्वे विकल्प इति चेन्न संसारमूलकारण
नादिसवासनमिथ्याज्ञानस्यैव नाशेन सोऽयमिति तस्यात्यन्तिकोच्छेदे अन्वयव्यतिरेकाभ्यामवधारितकारणताकतत्त्वज्ञानमेव
नाश

निष्कामकर्मानुष्ठानात् धर्माधर्मविवर्जयतः ॥

कर्मस्यलेपि कल्प्यते अतएव तमेव विदित्वातिमृत्युमेति नान्यः पन्था विद्यतेऽयनायेति श्रुतिरपि तत्त्वज्ञानाद्रहितामोक्षसा
मग्री नास्तीति प्रतिपादयति अतिमृत्युमेति मृत्युमत्येति मृत्युवशो न भवति देहान्तरं न लभत इत्यर्थः अतिमृत्युपदस्य
मोक्षेवालक्षणा एवं ब्रह्मज्ञानेन मुच्यते प्रयागमरणेन वा अथवा स्नानमात्रेण मत्यां स सन्निधाविति वचनम् त
स्यापवर्गः चिरकालसंचितश्रवणमननादिक्रमेण तन्नेन तत्त्वज्ञानेन मुच्यते प्रयागमरणजन्येन शीघ्रोत्पन्नेन तत्त्व
ज्ञानेन वा मुच्यते एवमथवेत्यत्रापि बोध्यमिति संदेयः नहि कश्चित् क्षणमपि जातु तिष्ठत्यकर्मकृदिति न्यायेन सदैव
धर्मोत्पत्तिसंभवात्तेषां भोगजनकतया सदा भोगसत्त्वे कथं मोक्षः इत्यत आह अनागतेति अनर्जयतः अजनयत इत्यर्थः
धर्माधर्मकारणीभूतसवासनमिथ्याज्ञानाभावादिति भावः ॥

तत्त्वज्ञानात्प्रारब्धेतरकर्मणां तु भोगादेव नाश इति दर्शयति एवं पापेति प्रारब्धेत्यर्थः योगप्रभावेति स्वरूपकथनमि
दम् कर्मभोगेन तज्ज्ञानस्यानपेक्षितत्वात् समाहृत्य परिहृत्य त्यक्तेति यावत् रागद्वेषावितिशेषः स्वभोगो
रागपरिहृत्यदोषभोगे द्वेषपरिहृत्येत्येति भावः तदुक्तम् असक्तोऽद्विषन् भुञ्जानः शरीरादि विगमः त्यज पूर्वकर्म
वृत्तेर्हेतुत्वेनाप्यम् एवम् सर्वशरीराद्यभावेऽपि तस्यापवर्गहेतुत्वम् अत्रेदं तत्त्वम् कर्म च द्विविधं प्रारब्धम् अप्रा
रब्धं च अत्र विद्यमानशरीरारम्भकं कर्म प्रारब्धमित्युच्यते तद्भिन्नम् अपरम् नाभुक्तं क्षीयते कर्म कल्पकोटि
शतैरपीति स्मृतेः प्रारब्धकर्मपरत्वं अन्यथा प्रायश्चित्तादिविधिवैफल्यापत्तेः न च शास्त्रबोधितनाश
कान्यायुक्तकर्मनाशकमेव भोगकार्यतावच्छेदकम् तत्त्वज्ञानस्यापि कर्मनाशकत्वं शास्त्रबोधितम् क्षीयन्ते
चास्य कर्माणि तस्मिन्दृष्टे परावरे इति श्रुतेः ज्ञानाग्निः सर्वकर्माणि भस्मसात्कुरुतेऽर्जुनेत्यादिस्मृतेश्चेदं च

प्रारब्धेतरसर्वोपात्तधर्माधर्मप्रपञ्चे योगप्रभावादिदिदृक्षा समाहृत्य भुञ्जानस्य पूर्वकर्मनिवृत्तेर्वर्तमा
नशरीरादि विगमे च सर्वशरीराभावादेकविंशतिदुःखसम्बन्धोऽनसंभवति कारणाभावात् सोऽयमेकविंशति
प्रभेददुःखहानिर्मोक्षः सोऽपवर्गः ॥०॥ इति प्रमेयाण्युक्तानि ॥

प्रारब्धेतरकर्मपरम् परमज्ञानिनां दत्तात्रेयादीनां भोगश्रवणात् न च प्रायश्चित्तविध्यनुपपत्त्या प्रायश्चित्तनाश्यपु
ण्यपापमात्रनाशकत्वमस्तु भोगस्य तत्त्वज्ञानस्य तु कायव्यूहोत्पत्तिद्वारा कर्मनाशकत्वमिति वाच्यम् कायव्यूहभो
गयोस्तत्त्वज्ञानव्यापारत्वे मानाभावात् तत्त्वज्ञानं विनापि सौभर्यादिः कायव्यूहादिदर्शनात् तस्मादन्यथानुपपत्ति
दर्शितश्रुत्यादिबलात् नाभुक्तमिति स्मृतेः प्रारब्धमात्रपरत्वेन तत्त्वज्ञानिनोऽनिखिलकर्मभोगार्थं कायव्यू
हकल्पनम् प्रामाणिकं अन्यथा कल्पान्तरस्थापि फलजनकप्राचीनकर्मवतः काशीमरणादेः तत्त्वज्ञानात्का
यव्यूहे जातेऽपि तादृशफलानुत्पत्तेरेनकस्य मोक्षाभावप्रसंगात् यच्चिकाशीमरणमपि भवेऽत्तनाभवतीति प्रा
माणिकम् तदा तदपि प्रारब्धवत् तत्त्वज्ञानाद्यकार्यमिति कल्प्यमिति दिक् काशीमरणेति शरीरादिरूपका

गो.
२२
88

प्रमेयपदार्थनिरूप्य संशयपदार्थं निरूपयितुमाह इदानीमिति एकस्मिन्निति इमौ स्थाणुपुरुषाविति निश्चयेतिव्याप्ति =
वारणायैकस्मिन्निति सप्तम्या विशेष्यत्वलाभः स्थाणुर्द्रूमिति निश्चयवारणाय विरुद्धेति निश्चये पुरुष इति निश्च
येऽतिव्याप्तिवारणाय नानेति यथा चैकधर्मिकविरुद्धनानाप्रकारकज्ञानत्वं संशयत्वमिति लक्षणं सिद्धम् अयं स्था
णुर्वा पुरुषो वोभयमास्तीमितीच्छायामतिव्याप्तिवारणाय ज्ञानपदम् अवान्तरभेदानाह स चेति तत्र साधारण
धर्मदर्शनजसंशयं दर्शयति पूर्वकेति साधारणधर्मज्ञानेपि विशेषदर्शनदशायां न संशय इति दर्शयति समम्
तेन विशेषादर्शनमेककोट्यादर्शनम् एवमग्रेपि समानधर्मेति उभयकोटिसहचरितधर्मः विशेषादर्शन

इदानीं संशयो निरूप्यते एकस्मिन्धर्मिणि विरुद्धनानार्थविमर्शः संशयः स च त्रिविधः एको विशेषादर्श
ने सति समानधर्मजः यथा स्थाणुर्वा पुरुषो वेति एकस्मिन्नेव प्रदेशे वर्तिनि द्वयोः स्थाणुत्वनिश्चायकवक्र
कोटरादिके पुरुषत्वनिश्चायके शिरःपाण्यादिके विशेषमपश्यतः स्थाणुपुरुषयोः समानधर्ममुच्चत्वल
क्षणं च पश्यतः पुरुषस्य भवति संशयः किमयं पुरुषः स्थाणुर्वेति द्वितीयस्तु समग्रयोर्विशेषादर्शने सति वि
प्रतिपत्तिजः यथा किमयं शब्दो नित्य उतानित्य इति तथाहि एको ब्रूते शब्दो नित्य अपरो ब्रूतेऽनित्य इति
तयोर्विप्रतिपन्नयोर्मध्यस्थस्य पुंसो विशेषमपश्यतो भवति संशयः असाधारणधर्मजसंशयस्तु तृतीयः यथा ॥

सतेदर्शयति स्थाणुत्वनिश्चायकमित्यादिना समानधर्मदर्शनमाह स्थाणुपुरुषयोरिति किमयमित्यत्र स्थाणु
त्वस्थाणुत्वाभावपुरुषत्वपुरुषत्वाभावरूपचतुःकोटिकसंशयः अयं च स्थाणुर्न वेत्युभयकोटिकः विप्रतिपत्ति
जस्तूभयकोटिक एव भवति कोट्यन्तरोपस्थापकपदाभावात् इति बोध्यम् कोटिर्विशेषणं विप्रतिपत्तिजसं
शयमाह द्वितीय इति रुद्धाप्रतिपत्तिर्यस्माच्छब्दात्सं विप्रतिपत्तिरूपः तज्जन्यो विप्रतिपत्तिजः संशय इत्यर्थः
कोटिद्वयोपस्थितिद्वारा विप्रतिपत्तेर्जनकता एको अपर इत्युपलक्षणम् शब्दो नित्यो न वेति मध्यस्थविप्रतिपत्तेः
संशयजनकत्वात् अपर इत्यत्रापि ब्रूत इति शेषो ज्ञात्वनुषंगः तृतीयमाह असाधारणेति अगृहीतकोटिद्वयसह॰ २८

गंधवत्त्वस्यासाधारण्यं दर्शयति नित्यादनित्याच्चेति व्यावृत्तेनेति तदवच्छिन्नतद्रूपव्यावृत्तेन तथा गृहीतेनेत्यर्थः वस्तुगत्या गंधवत्त्वस्य
नित्यानित्यव्यावृत्तत्वात् संशयानन्तरं प्रयोजनपदार्थमाह येनेति येन प्रयुक्तोपदिशाद्युक्तो यद्विषयकेच्छावानित्यर्थः
एतेन प्रयोजनपदस्य योगार्थो दर्शितः प्रयोज्यते व्यापारे प्रवर्त्यतेऽनेनेति प्रयोजनम् तृतीयार्थश्च ज्ञानजन्येच्छाजन्यत्वम् त
थाच यद्विषयकज्ञानजन्येच्छाजन्या पुरुषप्रवृत्तिस्तत्प्रयोजनम् ज्ञानचेष्टासाधनताद्यविषयकं वाच्यम् तेन नोपायेतिव्याप्तिः
स्वरूपं दर्शयति तच्चेति सुखेति सुखावाप्तिर्दुःखहानिश्चेत्यर्थः सुखदुःखाभावयोरेव मुख्यप्रयोजनत्वम् तदुपायादेर्गौ
णमिति भावः लक्षणं योजयति तदर्थीहीति बलात्कारेण सुखादिव्यतिरेकेऽपि प्रवृत्तिदर्शनादाह स्वस्थस्येति स्व
शस्येति स्ववशस्येत्यर्थः वस्तुतः स्वबलात्कारादस्य लोपितत्कालिकदुःखनिवृत्तिः संभवति बालकोन्मत्तादीनां दुःखसाध
नेकर्मणि सुखजनकत्वभ्रमादेव प्रवृत्तिरित्यवधेयम् दृष्टान्तपदार्थं निरूपयति वादीति संप्रतिपत्तीति संप्रतिपत्तिः संमतिः

नित्यादनित्याच्च व्यावृत्तेन समानासाधारणेन गन्धवत्त्वेन विशेषमपश्यतो भुवि नित्यतानित्यत्वसंशयः तथा हि सकलनि
त्यव्यावृत्तेन गन्धवत्त्वेन योगात् किमनित्या उत सकलानित्यव्यावृत्तेन तेन योगान्नित्येति संशयः येन प्रयुक्तः पुरुषः
प्रवर्तते तत्प्रयोजनम् तच्च सुखदुःखावाप्तिहानी तदर्थी हि प्रवृत्तिः स्वस्थस्य वादिप्रतिवादिनोः संप्रतिपत्तिविषयो
दृष्टान्तः स द्विविधः एकः साधर्म्यदृष्टान्तः यथा धूमवत्त्वस्य हेतोर्महानसमिति द्वितीयस्तु वैधर्म्यदृष्टान्तः यथा

साच साध्यसाधनवत्तया साध्याभावसाधनाभाववत्तया च वा व्याप्ते नैकतरोपादानेनाव्याप्तिः तथा च प्रकृतानुमितिजनकी
भूतज्ञानविषयीभूतव्याप्यव्यापकसंबन्धनिरूपकसंबन्धिवत्त्वेनोभयवाद्यादिसंमतत्वं दृष्टान्तत्वं सर्वस्यैव प्रमेयत्वाच्च ना
दतिव्याप्तेः प्रकृतेति वह्निमान् धूमादित्यत्रायोगोलकस्य दृष्टान्तत्ववारणाय यद्यपदम् आत्मा नित्यो द्रव्यासमवेतद्र
व्यत्वादित्यादौ ह्रदस्य दृष्टान्तत्ववारणायोभयवादीति अत्र मीमांसकमत एव शब्दे हेतुसत्त्वेन नैयायिकमत
इति नातिव्याप्तिः साधर्म्येति अन्वयव्याप्तिनिरूपकसाध्यसाधनवानित्यर्थः वैधर्म्येति साध्याभावसाधनाभा
ववानित्यर्थः अत्र साध्यवैकल्यं साधनवैकल्यमुभयासंमतत्वं चेति त्रयो दोषाः प्रथमस्य साध्यवत्त्व साधनवत्व

सिद्धान्तपदार्थं लक्षयति प्रामाणिकेति प्रामाणिकत्वं प्रमितत्वम् प्रमाविषयत्वमिति यावत् तृतीयार्थः प्रका
रता तथा च प्रामाणिकत्वप्रकारकनिश्चयविषयोऽर्थः प्रामाणिकमिदमिति निश्चयो वा सिद्धान्त इत्यर्थः तादृ
शनिश्चयो वा सिद्धान्त इत्यर्थः तादृशनिश्चयविषयीभूतपदार्थस्यैव सिद्धान्तत्वमिति मताभिप्रायेणाभ्युपग
तोऽर्थ इत्यत्र कं मूले वक्तव्यतस्तु ज्ञानमेव सिद्धान्तरूपमिति निश्चयस्यात्र भ्रमप्रमासाधारणो बोध्यः तेन शब्दादे
र्नित्यत्वानित्यत्वादीनां नोभयमतसिद्धान्तहानिः सर्वपुरुषाणां प्रामाणिकत्वाभ्युपगमः सर्वतन्त्रसिद्धान्तः धर्मिमा
त्रस्य घटादेः सर्वतान्त्रिकैः प्रामाणिकत्वाभ्युपगमादिति भावः धर्मस्य चरत्वादेर्बौद्धादिभिरनङ्गीकारान्मा
त्रपदम् द्वितीय इति अत्र पुरुषाणां निराकृतस्यार्थस्य लक्षणात्वे प्रामाणिकत्वनिश्चयः प्रतितन्त्रसिद्धान्तः यथा
प्रमाऽयोगव्यवच्छेदादिरूपस्य प्रमात्वम् नैयायिकानां तदाहुः स्वतन्त्र एव सिद्धोऽर्थः परतन्त्रैर्निवारितः प्रतितन्त्र

प्रामाणिकत्वेनाभ्युपगतार्थः सिद्धान्तः स चतुर्धा सर्वतन्त्रप्रतितन्त्राधिकरणाभ्युपसिद्धान्तभेदात् तत्र स
र्वतन्त्रसिद्धान्तो यथा धर्मिमात्रसद्भावः द्वितीयो यथा नैयायिकस्य मन इन्द्रियं तद्धि समानतन्त्रे

त्रा यथा न्याये सर्वज्ञस्य प्रमाणतेति मत इति इदं त्वभ्युपगमोदाहरणं बोध्यम् तदाहुः साधितः परतन्त्रे यः स्वतन्त्रे
पि कृतनिश्चयः सह्युपगमो न्याये मनसोऽनुमितिरिति यथेति स्वतन्त्राविरुद्धस्य परतन्त्रे युक्तस्य प्रामाण्योपगमोऽभ्युपग
मसिद्धान्तः तदुक्तमाचार्यैः परतन्त्रोक्तः स्वतन्त्रे चाविरुद्धार्थाभ्युपगम इति उक्तेर्वा णाप्रकारे भावप्रसङ्गे वैशे
षिकमते अभ्युपगमसिद्धान्तसिद्धत्वादिति भावः तथा चात्र प्रतितन्त्राभ्युपगमसिद्धान्तयोर्वैपरीत्येनोदाहर
णप्रदर्शनं ग्रन्थकारस्य भ्रमविजृम्भितमिति ये वदन्ति ते न तस्याभिप्रायं न जानन्ति तथा हि प्रतिशब्दस्य समा
नार्थकतया समानतन्त्रसिद्धान्त एव प्रतितन्त्रसिद्धान्तः अन्तर एवोक्तम् तथा च मन इत्यादिकं तस्योदाहरण
प्रचितमेव एवमभ्युपगमः सर्वपुरुषाणामर्थानां वदुक्तप्रतितन्त्रलक्षणमेवाभ्युपगमलक्षणमिति एवंक्रमेणापि स
र्वतन्त्राभ्युपगमत्वादि सत्त्वस्य पदार्थानां व्याख्यान संभवात् भाष्ये तथैवोदाहरणदर्शनादिति ग्रन्थकाराशयः ॥

तृतीयइति यद्यर्थमतावलम्बस्य विशेषस्य प्रामाणिककरणसिद्धान्तः सर्वज्ञत्वमिति सर्वज्ञानो जीवानो हित्याद्युत्पत्तेः प्राक् शरी
रतया उपादानगोचरापरोक्षज्ञानचिकीर्षादेरभावात् हित्यादौ यदि तद्वायेनाशरीरी सर्वज्ञः कर्त्ता आयाति सोयमधिकर
णसिद्धान्तः चतुर्थइति अभ्युपगमसिद्धान्तः चतुर्थइति अभ्युपगमसिद्धान्तइत्यर्थः ग्रन्थकारमते रातन्नक्षणे प्राचीनम
तोक्तप्रतितन्त्रसिद्धान्तलक्षणमेव जैमिनीयस्येतिमतइतिशेषः यथा तथेति साकूतोक्तिः किंचिदभिप्रायप्रकाशयति ता
वच्छब्दोनगुणइति नकारयुक्त एव पाठः नकारशून्यपाठेन संयावकारलोपादगुणो गुणभिन्नइत्यर्थः अन्यथामी
मांसकमते शब्दस्य गुणत्वाभावादसंगतेः तथाच मीमांसकानां स्वशास्त्रमात्राभ्युपगतस्य शब्दे गुणभेदस्य प्रामा
णिकत्वाभ्युपगमो अभ्युपगमसिद्धान्तइतिभावः तथाच शब्दस्य गुणभिन्नत्वे सिद्धे नित्यः शब्दः श्रावणप्रत्यक्ष

तृतीयो यथा हित्यादिकर्त्तृसिद्धौ कर्त्तुः सर्वज्ञत्वे चतुर्थो यथा जैमिनीयस्य तित्यानित्यानित्यनित्यविचारे
भवतु तावच्छब्दो नगुणः ॥

विषयत्वादिति शब्दत्ववत् इत्यनुमानेन उद्भावितस्य गुणभिन्नत्वस्योपाधेः साधनव्यापकत्वेनानुपाधित्वादुक्तानुमाना
देव शब्दस्य नित्यत्वसिद्धिर्भविष्यति इतिमनसिकृत्योक्तं नित्यानित्येति यत्नो गौरवं नेनोक्तम् अत्र मीमांसकैः शब्दस्य गुण
त्वाभ्युपगमे सर्वतन्त्रसिद्धान्तएवायमिति तर्कभाषाकारोत्र भ्रान्तइति तत्स्यैव संयावकारज्ञानाभावेन भ्रान्तत्वप्रकाश
नाय शब्दस्य द्रव्यत्ववादिनो मीमांसकस्य गुणत्वाभ्युपगमो गउडसिद्धिकाम्पायेनेति वदन् बलभद्रोपि सर्वथैव भ्रान्तएव श
ब्दस्य गुणत्वाभ्युपगमस्य मीमांसकमते सिद्धान्तत्वाभावात् प्रकृतो दोहरणत्वासंभवात् नित्यानित्येन नादेकस्माप्रलापेन
लतापतेश्च तस्मात्संयावपिशुनस्य ग्रन्थकारोत्र भ्रान्त इति वचनं छिन्ननासिकस्य दर्पणदोषोद्भावनतत्स्यमितितो ध्यम्
वात्स्यापन भाष्ये चेदमेवोदाहृतम् ॥

२

अवयवपदार्थं निरूपयति अनुमानवाक्येत्यनेनेत्यावयवत्वं न्यायपदेन प्रकृतपदं साध्यवैशिष्ट्यपरं प्रकृतव्याप्तिपरं प्रकृत
व्याप्तिपरं प्रकृतपदं धर्मवाचकपरं प्रकृतसाध्यहेतुव्याप्तिमत्वाद्यवच्छिन्नपदितपरवाक्यपंचकसमुदाय तम् तानि च वा
क्यानि यथाक्रमं प्रतिज्ञादीनि एकैकस्य पदान्तरस्य वृथानेनातिव्याप्तिः एकसाध्यान्यहेत्वादिघटितपंचवाक्याति
व्याप्तिवारणाय प्रकृतपदानि प्रतिज्ञाद्यवयवपंचकसमुदायस्यैके प्रतिज्ञादिलक्षणास्यन्यायावयवत्वघटितस्या
साध्यापातेः समुदायपदमेकैकावयववेतिव्याप्तिवारणाय एकैकपरशब्दोद्धतभागानुपादानेन तदवयवातिविक्ता
वयवत्वं तु इष्टमितिव्याप्तिवारणाय परशब्दोत्तभागापंचकोपादानम् तथा चैतादृशन्यायरूपस्यानुमानस्यपर
र्थानुमानोपयोगिवाक्यसमुदायस्यैकदेशावयवावयवत्वमिति अवहृतत्वात् अतिशेषः यद्यपीदं प्रतिज्ञादिरूपावयवैकदेशे
पर्वतत्वत्वादिभागेतिव्याप्तम् तथा पर्वतो वह्निमान् सूत्रादिसाध्यवयवावयवपर्युदस्तभागेष्वतिव्याप्तम् तथाथ्यापलक्ष
णेः समुदायलक्षणसमुदायपदं हितान्यायान्तर्गतत्वे सति तादृशवाक्यपंचकान्यतमत्वमवयवत्वं वाच्यम् उदासीनवा

अनुमानवाक्यैकदेशावयववा तेच प्रतिज्ञादयः पंच तथा च न्यायसूत्रे प्रतिज्ञाहेतूदाहरणोपनयनिगम
नान्यवयवा इति तत्र साध्यधर्मविशिष्टधर्मिप्रतिपादकवचनं प्रतिज्ञा यथा पर्वतो वह्निमानिति ॥

क्यातिव्याप्तिवारणाय सत्यन्तम् अवयवैकदेशस्यावयवपञ्चरूपान्तर्गतैकं च नोक्तपंचकान्यतममिति नातिव्या
प्तिरिति भट्टाचार्यशिरोमणिप्रदर्शितराजपथानुसारी सरलः पन्थाः अवयवानामवान्तरभेदप्रदर्शनायाह तेचेति
प्रतिज्ञां लक्षयति साध्येति साध्यरूपो यो धर्मस्तद्विशिष्टो यो धर्मी पक्षस्तत्प्रतिपादकमित्यर्थः अत्राप्युदासीन
वाक्यातिव्याप्तिवारणाय न्यायान्तर्गतत्वे सतीति देयम् उपनयेतिव्याप्तिवारणाय साध्येति संदिग्धसाध्यपरम्
उदाहरणवारणाय धर्मिपदम् पक्षतावच्छेदकावच्छिन्नपरम् उदाहरणाद्धि सोग्निमानिति वा यो न तत्पर्वतो व
ह्निमानिति भवतीति भवति न ह्यारणं धर्मपदं च साध्यतावच्छेदकसंबंधेन वैशिष्ट्यलाभायेतेन रह्निसमवायितपरे
पर्वतो वह्निमानित्यादौ नातिव्याप्तिः तथा चावयवान्तरसन्निधानानुपस्थितपक्षतावच्छेदकावच्छिन्नविषयकसा

हेतुत्वलक्षणपति पंचम्यंतमिति तृतीयांतं चेति वाकारोऽन्नास्यार्थः हेतुत्वप्रतिपादकविभक्तिमत्वेन तात्पर्यम् उद्देश्योपनयादि
व्याप्तिवारणाय तृतीयान्तत्ववारणायापि लिंगेति लिंगमात्रप्रतिपादकमिति भावः तथा च हेतुत्वप्रतिपादकविभक्तिमत्वे सति साध्य
प्रतिपादकन्यायावयवत्वं हेतुत्वम् न्यायेतरप्रयोजने तु पूर्ववद्व्याप्तिरेव मतेऽपि नन्वेवमपि दृढदंडाज्जाते दंडसंयोग
जन्यत्वात् घटे दंडाज्जाते तद्दंडसंयोगजन्यत्वम् यथा पर्वतोऽयं धूमाद्वह्निमान् आर्द्रेन्धनप्रभवत्वात् यद्वह्निमत्
तत्रार्द्रेन्धनप्रभवत्वं यथा महानसमित्यादौ च व्यतिरेकव्याप्त्युदाहरणे निरुक्तहेतुलक्षणातिव्याप्तिरिति चेन्न हेतुत्वं तस्य प्रकृत साध्य
व्याप्तिविशिष्टविशेषणात् उक्तस्थले तु प्रकृतसाध्यं दंडजन्यभिन्नत्वं धूमज्ञानज्ञाप्यवह्निम वह्निमत्वं वा अत्र पंचम्य
र्थहेतुत्वस्य नान्वय इति मानि व्याप्तिरिति वाल्लकंड बोधकतया विशिष्टेऽपि धूमवत्वादिति प्राचीनमताभिप्रायेणाकथ्या
यो धूमादिति तु प्रयोगः क्रमम नन धूमवत्वादिति मतपाठे पंचम्यन्तोदाहरणं लक्षणपति सव्याप्तिक मि
ति उपनयादावतिव्याप्तिवारणाय दृष्टान्तेति यद्यपि तत्प्रयोगस्य न सार्वत्रिकत्वं सम यथा पाधीनत्वात् यो यो धूमवान्स सोऽग्नि
पंचम्यन्तं तृतीयान्तं वा लिंगप्रतिपादकं वचनं हेतुः यथा धूमवत्वादिति सव्याप्तिकं दृष्टान्तवचनमुदाहरणम् यथा यो
यो धूमवान्सोऽग्निमान् यथा महानसमिति ॥

मान् एतावतैव व्याप्तिग्रह इति सिद्धान्तः तथा च धूमयवाहीनि दृष्टान्तवह्निव्यवस्यदृष्टान्तशब्दस्यात्र व्याप्यव्यापकवन्मात्रप
रत्वे सव्याप्तिकपदे न च व्याप्यव्यापकवत्वस्य व्याप्तिनियतत्वे लभ्यते व्याप्यताभिमतवदुद्देश्यक व्यापकताभिमतविधेय
कज्ञानजनकन्यायावयवत्वमुदाहरणत्वमित्यर्थः उद्देश्यतावच्छेदकव्यापकत्वविधेयत्वस्य भासनत्वं च व्याप्तिनियतत्वे
दुद्देश्यभावस्थले तथैव व्युत्पत्तेः यो यो धूमवानिति व्याप्यताभिमतधूमवदुक्तौ नामुद्देश्यत्वे सोऽग्निमानिति वह्नेर्वि
धेयत्वे तत्रोद्देश्यतावच्छेदकधूमव्यापकतावच्छेदकधूमव्यापकतावच्छेदलभ्यते एवं यत्र वह्न्यभावस्तत्र धूमाभाव इ
ति व्यतिरेकव्याप्त्युदाहरणे व्याप्यताभिमतवह्न्यभावो व्यापकताभिमतो धूमाभावो बोध्यः येयोरेव व्याप्तिप्रदर्शने
तात्पर्यमुदाहरणवाक्यस्य तावेव व्याप्यत्वेन व्यापकत्वेनाभिमतौ अतिप्रसंगस्य न्यायावयवत्वेनैव वारणात्
यद्वा व्याप्यपदस्थाने व्याप्यव्यापकाभावान्यतरेति व्यापकपदस्थानेऽपि व्यापकव्याप्याभावान्यतरेति लक्षणप्रवेशप

गौ॰ सू॰
91

उपनयं लक्षयति पक्ष इति लिंगस्य व्याप्तिविशिष्टस्य उपसंहारो वैशिष्ट्यबोधोऽस्त्वादिति चेन्न तथा वैशिष्ट्यस्याधि
करणांशेऽकांक्षितत्वात् पक्षे हेतुत्वस्य प्रमासत्त्वेनापन्नयः तथा च पक्षो विशेष्यक व्याप्तिविशिष्ट वैशिष्ट्यावगाहिज्ञानजनक
न्यायावयवत्वमुपनयत्वं निगमनवारणाय विशेष्यकान्तम् तत्र व्याप्तिविशिष्टस्य पदेन वैशिष्ट्याग्रहः किन्तु पञ्चम्य
र्थहेतुत्वस्यैव ह्यते न च वह्निव्याप्यधूमवान्पर्वतो वह्निमानित्यादिप्रतिज्ञायामतिव्याप्तिरिति वाच्यम् पक्षतावच्छेदकत
र्थहेतुत्वस्यैव पक्षतावच्छेदकस्य विशेष्यता
विशिष्टे पक्षे व्याप्यवैशिष्ट्यावगाहित्वस्यानकत्वात् अत्र च वह्निव्याप्यधूमवान्पर्वत इत्येव पक्षतावच्छेदकस्य विशेष्यता
वच्छेदकतया तथाविधविषयत्वाभावादिति साध्याविषयकत्वेवादिदूषणं देयमिति संक्षेपः अत्र सामा

पक्षे लिंगोपसंहारवचनमुपनयः यथा धूम
वांश्चायमिति तथा चायमिति वा ॥

न्योपनयलक्षणे व्याप्तिपदं व्यभिचारधीविरोधिविषयत्वरूपेणोभयव्याप्तिपरम् उभयव्याप्तिज्ञानेऽपि न व्यभिचारधी
रिति प्राचीनमतस्वरसात् विशेषलक्षणेऽन्वयव्याप्त्युपनयेन व्याप्तिपदमन्वयव्याप्तिपरमिति बोध्यम् यथेति वह्नि
व्याप्यधूमवांश्चायमित्याकारकः पञ्चोपनयो ननु धूमवांश्चायमित्याकारः अनुमित्युपयोगितृतीयलिंगपराम
र्शप्रयोजनकत्वादुपनयस्य तदुक्तम् उपनयप्रयोजनकत्वावसरे चिन्तामणिकारैः तृतीयलिंगपरामर्शस्य
व्याप्तिपक्षधर्मतावगाहिनोऽवयवान्तरालाभादिति कस्यचिन्मतमाह तथा चेति वाशब्दो नास्थ्यापातप्रयोगस्यतत्प्र
कारापेक्षेनोदाहरणप्रकाराणां यत्नत्वधूमत्वादीनामत्र प्रकारता संभवात्सर्वोऽक्तपञ्चोपनयः ॥

निगमनं लक्षयति पक्षइति साध्योपसंहारइति साध्योपसंहारइति समासार्थस्य पूर्वोक्तरीत्या इत्थं च यद्यपि प्रतिज्ञायामविशिष्ट
म् तथाप्यवयवांतरोपस्थापितपक्षसाध्यवैशिष्ट्यावगाहिज्ञानजनकन्यायावयवत्वं निगमनत्वं बोध्यम् उपनयस्थितमिति
त्वेनेनोपस्थापितपक्षे एवनिगमनेनसाध्यवैशिष्ट्यबोधात् प्रतिज्ञायां पक्षस्य च येवांतरोपस्थापितत्वाभावान्नातिव्याप्तिः
एकदेशिमते निगमनवाक्यं दर्शयति तस्मात्तथेति अत्रापिवाशब्दो अनास्थायाम् तथेत्यनेन पूर्वोक्तवह्निव्याप्यधूमवान्
इत्युपस्थापनेऽनन्वयादिदोषादिदूषणं दूष्यम् चिंतामणौ अत्र पंचानामवयववाक्यानां शाब्दबोधप्रकारः संक्षेपेणप्रदर्श्य
तेतत्रविप्रतिपन्नं प्रत्यन्तरे पर्वतेवह्निसाधयेदितिमध्यस्थेनोक्ते प्रतिज्ञावाक्यं विनाहेत्वभिधानत्वपात्प्रथमं प्रतिज्ञारूपावयव
प्रयोगस्तावद्रूपकः यथापर्वतोवह्निमानिति अत्रपर्वतत्वविशिष्टवह्निमदभेदोऽसार्थतिततः कुतोऽस्यवह्निमत्वमित्याकांक्षायां
धूमादितिहेत्ववयवप्रयोगः अत्रधूमस्यवह्निप्रतियदन्नमितिप्रतिवादीन्नवस्याभावाल्लक्षणयाधूमपदेनधूमज्ञानं पंच

पक्षेसाध्योपसंहारोवचनेननिगमनम् यथा तस्मादग्निमानिति तस्मात्तथेतिवा ॥

चम्याचज्ञाप्यत्वमुपस्थाप्यते विभक्त्यर्थं च प्रकृत्यर्थः प्रकारत्वेनान्वेतितेन धूमज्ञाप्यत्वमर्थः तच्च वाक्येकवाक्यतयाप्रतिज्ञा
स्थवह्निपदोपस्थाप्यत्वेतितथाचधूमज्ञानज्ञाप्यवह्निमदभिन्नपर्वतइतिप्रतिज्ञाहेत्वोरेकवाक्यतयाबोधः नवीनास्तु धूम
पदेनलक्षणा किंतु पंचम्याएवज्ञानज्ञाप्यत्वेलक्षणेति वद तिज्ञानविषयत्वततः कथमस्यगमकत्वमित्याकांक्षायां साध्यव्याप्ति
तयमेतायांचदर्शनीयायांप्राथम्याद्याप्तिदर्शनार्थमुदाहरणप्रयोगः योयोधूमवान्सोऽग्निमानिति अत्रवीप्सयाउद्देश्य
तावच्छेदकधूमव्यापकम् वह्नेर्विधेयस्यलभ्यते तथाहि योयइतिवीप्सयामहानसत्वचत्वरत्वादिरूपेणप्रौषतोधूमा
दिकरणव्यक्तिरूपस्याप्यते तासांचसर्वासां यत्पदजन्यबुद्धिविषयाणामेकेनैवतत्पदेनबुद्धिस्थवाचकेनोपस्थावाचु
केनोपस्थाप्यमानतत्राग्निम् तस्मान्वयधूमव्यापकतावह्नेःसिद्धइति अत्रवीप्सापदेनतु तत्पदेपिनानारूपेणयत्पदोपस्थापि
तानांयुगपत्तत्पदोपस्थापनं तात्पर्यात् यथा यद्यत्पापंप्रतिजहिजगन्नाथनम्रस्यतन्मे इतिमालतीमाधवे यत्रतु यत्पदोपस्था
पितानांक्रमेणतत्पदादुपस्थितिस्तात्पर्यम् तत्रतत्पदेपिवीप्सायथादिवाभावसमभूमिपाल इतिरघुवंशे यथावायायास्त्रियः

गौ॰
५२
92

साध्यासाहित्यानभ्यमुर्वीवभूवेतिमाहे यथा महानसं महानसमिति दृष्टान्तवचनेन सर्वत्र यत्र दृष्टान्तो व्याप्यवत्ता व्युत्पत्तिसमय
वन्यस्तत्रैव तदावश्यकम् ततश्च भवतु धूमो वह्निव्याप्यस्तस्य पक्षधर्मत्वं विद्यते वा न वेत्याकांक्षायां वह्निव्याप्यधूमवा
श्चायमित्युपनयप्रयोगो निरूपकतासंबंधेन वह्निसंबंधेन वह्निसंबंधीव्याप्तिमदभिन्नो यो धूमस्तत्तस्योपनयभिन्ना
यं पर्वतत्वगुणसमूहबोधः व्याप्तस्य पक्षधर्मताज्ञानं विनानुमितिः तदज्ञानेनानवयवीन्तत्वादित्युपनयस्यावश्यकत्वं हे
तोपक्षधर्मताज्ञानेऽपि बाधितत्वाद्यवगते नानुमितिरिति यतोऽवगमे सति पन्नभवति तदभावज्ञानसाध्यमिति
व्याप्तिबलादबाधितत्वादिज्ञानस्याप्यनुमितिहेतुत्वमतस्तदर्थं निगमनप्रयोगः तस्माद्वह्निमानिति अत्र तस्मादे
तद्धेतोर्वह्निव्याप्यधूमपरिग्रहः पंचम्यर्थोऽपि पूर्वोक्तरूप एव तथा च धूमज्ञानज्ञाप्यवह्निमदभिन्नोऽयमित्युपस्थिताय
मित्यनेनान्वयः अत्र तस्मादित्येतस्य इतरव्यावृत्तिपरस्य यानान्यस्मादित्यसत्प्रतिपक्षितत्वलाभः वह्निमानित्यस्य चेतरव्या
वृत्त्या न तदभाववानित्यबाधितत्वलाभः अत्र पञ्चावयवरूपावान्तरवाक्यार्थबोधानन्तरं पर्वतवृत्तिवह्निज्ञान
जनकीभूतज्ञानविषयो धूमो वह्निव्याप्यपर्वतवृत्तिरबाधितो असत्प्रतिपक्षितश्चेति महावाक्यार्थबोधो जाय
त इति प्राचीना वदन्ति भट्टाचार्यशिरोमणिभिस्तु नांगीक्रियते उदाहरणनिराकांक्षतया केनाप्यवयवेन स
हानन्वयात् प्रतिज्ञाहेतोरुपनयनिगमनयोर्वा एकवाक्यतासंभवो नान्येषामिति मीमांसकास्तु केचन प्रतिज्ञाहे
तूदाहरणरूपावयवत्रयमात्रवादिनः तदेकदेशिनस्तु उदाहरणाद्यवयवत्रयवादिनः बौद्धास्तु उदाहरणमुपन
यश्चेत्यवयवद्वयवादिनः तन्न प्रतिज्ञाहेत्वोरुपनयनिगमनयोश्चाकांक्षायाः प्रयोजनस्य संक्षेपेण प्रदर्शितत्वात् ॥
अत एव भारते भगवद्व्यासचरणैः पंचावयवयुक्तस्य वाक्यस्य गुणदोषवदिति ग्रन्थगौरवभयाद्विरम्यते

५२

ननु अनुमानवाक्यस्य शाब्दरूपतया कथं तदवयवसंभवो द्रव्यस्यैव सावयवत्वादत आह एतदित्यादि तथा चाग्रिमाणां वाक्य
इव द्रव्ये एवाद्याच्छादितोऽत्र गौणः इति भावः तर्कपदार्थं लक्षयति तर्क इति अनिष्टस्य प्रयोगः प्रसंजनं आहार्यमानसारोपः
आहार्यसत्वेपीच्छावशाज्जायमानं ज्ञानम् अनिष्टं द्विविधम् प्रामाणिकपरित्यागो अप्रामाणिकस्वीकारश्च यथा
पीते जले पिपासा न प्रशमयेत् तदापि पासुना न पीपित द्युतादिवत् अत्र प्रमाणसिद्धस्य पिपासाप्रशमकत्वस्य प
रित्यागोऽनिष्टम् द्वितीयं तु मूले दर्शितम् यद्यत्र घटः स्यात् तदाऽत्राप्रामाणिकस्य घटस्य तदानीं तत्दर्शनविषयत्व
स्य चेटस्वीकारो अनिष्टम् अप्रामाणिकता च परेहवोध्या न चिदं शात्रीयत तयोस्तु तुल्यनिष्टप्रसंगेऽतिव्याप्त
मित्यत आह स चेति आपाद्यापादकयोर्व्याप्तिज्ञानमपि तर्के कारणम् तत्र वस्तुगत्या व्याप्यस्तदारोप्यमात्र
मितिप्रतिपादयितुं सिद्धव्याप्तिकयोरिति लक्षणेन व्याप्यस्याद्येव व्यापकस्यापादकस्यांगीकारे आहार्यारोप

एते प्रतिज्ञादयः पंचानुमानस्यावयवा इव अवयवा न तु समवायिकारणम् शब्दस्याकाशसमवेतत्वात्
तर्को निष्टप्रयोगः स च सिद्धव्याप्तिकयोर्हेत्वोर्हेत्वोर्व्याप्यांगीकारेण व्यापकप्रसंजनं ॥

पकस्यापाद्यस्य प्रसंजनमाहार्यारोपलक्षणं तर्क इत्यर्थः तथा च व्याप्याहार्यभ्रमजन्यव्यापकताहार्यभ्रमस्तर्क
इत्यर्थः आहार्यभ्रममात्रे अतिव्याप्तिवारणाय जन्यान्तम् यत्र नायं पुरुष इति निश्चयसत्वेऽपि शापादोषकराद्भ्रमाद
दयं पुरुष इत्याहार्यारोपस्तत्र तदारोपे अतिव्याप्तिवारणाय प्रथममाहार्यपदं जनतत्वव्याप्याभावत्वतन्त्र हकाले आ
हार्यं न तद्व्याप्यवत्ताज्ञानजन्येष्वदं जन्तमित्यनाहार्यज्ञाने अतिव्याप्तिवारणाय माहार्यपदम् न च म पदे स्वरूपार्थके आहा
र्यज्ञानस्य प्रमारूपत्वाभावात् यद्यपि च इत्यव्याप्यत्वविशेषजन्येनाहार्यज्ञानान्यत्वं च द्रव्यमित्याद्यारोपार्थरोपे
मिदमतिव्याप्तम् न चानिष्टव्यापकस्य प्रसंजनमितिवाच्यम् मुखमिदं वामरस्तु खमित्यादावतिव्याप्तेः एवं निह
कानिष्टमत्वं च द्रव्यमित्यादावपि संभवात् तथाप्यनिष्टप्रसंगेनेच्छाविरोधिप्रयव्यापकस्य प्रसंजनं तदितिवाच्यम्
भवति च परिमितवृविषयानुमानभवन्तियुक्ताः तदा मरीच्यमौत्रादेस्तर्कस्य भोजनादिविषयकेच्छाविघटकत्वे न च

उदाहरन्ति यथेति अत्र घटः पटः अत्राभविष्यदित्यापादकमेतद्देशसंयोगीस्यादित्यर्थः चक्राग्रेहणायेमपक्षस्तीति
विशेषणीयम् तेनैतद्देशासंपृक्तपरमाणुवाक्षोवव्यभिचारः तदा अद्रव्यत्वादित्याद्यापाद्यमेतद्धतिनयेदानीतन
तद्व्विषयः स्यादित्यर्थः नैतद्देशाभेदाद्वनेष्टापत्तिः भूतलमिवेति दृष्टान्तः एतद्भूतलस्य यदा घटवदित्यर्थः तेनैत
द्भूतले एतद्भूतप्रतियोगिकसंयोगाभावान्न दृष्टान्तस्यापादकवैकल्यम् यद्वा एतद्देशावृत्तिसंयोगवान्स्यादि
त्यापादकम् तदा च स्ववृत्तिसंयोगस्यस्वस्मिन्नपि सत्वाद्यथाश्रुतमेव भूतलमिवेति दृष्टान्तः संगच्छते अत्र व्या
प्यस्य योगित्वविशिष्टेन दृष्टावृत्तित्वसंघटे असत्वेप्याहार्यतदोषः व्यापकस्य तादृशाचाद्व्यविषयत्वस्याहा
र्यज्ञानरूपतर्कप्रतिकारणत्वमिति लक्षणसमन्वयः तर्कस्य प्रयोजनं दर्शयति सचोपमिति प्रमाणानामनु
तादीनमनुग्राहकः प्रमाजनने सहकारीत्यर्थः अनियतजिज्ञासावच्छेदेन नियतजिज्ञासाजननमनुग्रहस्तथाचा

यथा यत्र जलोघटोऽभविष्यत्तदा भूतलमिवाद्रक्ष्यत् स चायं तर्कः प्रमाणानामनुग्राहकः तथाहि हयं पर्वतः साग्नि
रनाग्निरिति संदेहानन्तरं यदि कश्चिदभ्युपेते अनग्निरिति तदा तं प्रति यद्ययमनग्निरभविष्यत्तदा धूमाभावि
ष्यदित्यनिष्टप्रसञ्जनं क्रियते स एव प्रसंगस्तर्क उच्यते अयं च प्रवर्तमानस्य धूमलिंगकस्यानुमानस्य वि
षयमग्निमभ्यनुजानाति अनुजानाति अनग्निमत्वप्रतिक्षेपात् अतोऽनुमानस्य भवत्यनुग्राहक इति ॥

र्थः तत्र जलाभावादिप्रत्यक्षप्रमाजनने प्रत्यक्षप्रमाणस्य सहकारी तर्कः अस्य च धानेन दर्शितः अनुमानप्रमाणस्य सहका
रित्वं दर्शयितुमाह तथाहीत्यादिना अत्र संदिग्धपक्षे वार्येन तर्कः प्रवर्तत इति ज्ञापयितुं तर्कविषयीभूतस्य संशयं दर्शयति
अयमित्यादिना एतेन व्यापकारोपस्य कारणं दर्शयति यदि कश्चिदिति अनग्निरभविष्यत्तर्हि धूमोऽपि न भविष्यत् इत्येव
पाठः अनग्निकत्वाद्धूमोऽभविष्यदिति पाठे अनग्निकत्वादित्यस्य रूपकथनमात्रं योयो नाग्निः सोऽधूमो यथा ज
लहृद इति व्याप्तिसारकं वा यदि वह्न्यभाववान्स्यात्तर्हि धूमाभाववान्स्यादित्यर्थः प्रसंजनं क्रियते आहार्यज्ञानं जन्यते
इत्यर्थः इदानीमस्य तर्कस्यानुमानानुग्राहकत्वं दर्शयति अयं चेति प्रवर्तमानस्य वह्न्यनुमितिं प्रति जननयनयुत्य
र्थः धूमलिंगस्य धूमलिंगपरामर्शस्येत्यर्थः विषयमिति अनुमानस्य द्विविषयत्वात् कोऽनुग्राहकः विषयपरिशो

अनिर्धारितविषयतर्कस्य संशयरूपतावादिनो मतं दूषयति । अत्रेति एकेति तथा च सर्वोऽपि संशयलक्षणाक्रान्तत्वात्संश
यत्वमिति भावः न च लक्षणान्तरमेव क्रियतामिति वाच्यम् सूत्रकारेणैव तथा लक्षणाकरणात् अयं च तर्कः पञ्चविध इति प्राचो
नाः तदुक्तम् आत्माश्रयादिभेदेन तर्कः पञ्चविधः स्मृतः इति तथा हि आत्माश्रयः इतरेतराश्रयश्चक्रकमनवस्था व्याघात इति
तत्र व्यक्तिसापेक्षत्वे आत्माश्रयः यथा घटस्य लक्षणं घट इत्यत्र तद्वाक्ये येन सापेक्षत्वं तस्यापि तत्सापेक्षत्वमितरेतराश्रयः यथा
घटत्वलक्षणम् घटत्वस्य तच्चेतरावृत्ति सकलघटवृत्ति परस्परापेक्षत्वादन्योन्याश्रयः यत्र तद्व्यक्तेर्द्वितीयव्यक्तिसापेक्ष
त्वाद्द्वितीयव्यक्तेस्तृतीयव्यक्तिसापेक्षत्वात्तृतीयव्यक्तेः प्रथमव्यक्तिसापेक्षत्वं तत्र चक्रकम् यथा घटत्वलक्षणं घटत्वं नमस्वे
यादिले लक्षणं च घटेतरावृत्तित्वे सति सकलघटवृत्तित्वमिति तृतीयस्य च घटत्वस्य च घटरूपप्रथमव्यक्तिसापेक्षत्वा
दिति चक्रकम् एवं चतुःपञ्चादिस्थलेऽपि चक्रकं बोध्यम् प्रथमद्वितीयमतिरिक्तस्य प्रथमसापेक्षत्वेऽपि चक्रकम् सापे
क्षत्वं च तद्विषयकज्ञानादिरूपत्वम् इदं चात्माश्रयादीनामुदाहरणं ग्रन्थे दर्शितं एवमन्यत्रस्थलेऽपि बोध्यम् यथा च घटं प्रति

अत्र कश्चिदाह तर्कः संशयेऽन्तर्भवतीति तन्न एककोटिविषयत्वात्तर्कस्य ॥

घटस्य हेतुत्वे आत्माश्रयः घटसंयोगस्य घटं प्रति हेतुत्वे तं प्रति घटस्येत्यन्योन्याश्रयः घटेन तत्संयोगो हेतुस्तत्प्रति घटक्रिया हे
तुः तां प्रति च घटो हेतुरिति चक्रकम् एवं क्रमेण सर्वत्र बोध्यम् पूर्वपूर्वस्योत्तरोत्तरसापेक्षत्वमनवस्था यथा च घटत्वं घटक्रियाहे
(तुः तां प्रति च घटो हेतुरिति चक्रकम् एवं) णं घटत्वजातिस्तल्लक्षणं च घटत्वत्वजातिस्तत्र जात्यन्तरं तत्राप्यन्या जातिरिति पर
म्पराकल्पनेऽनवस्थापत्तिरिति न जातेर्जातिवृत्तित्वं इदं च तत्पक्षे अपि न च एवमनवस्था यथा घटोत्पत्तौ घटान्तरं कारणं तत्रा
प्यन्यदित्यादिक्रमेण यत्र कार्यकारणभावादिग्राहकप्रमाणाभावस्तत्रैवेयमनवस्था दोषः अत एव बीजाङ्कुरादीनाम
न्वयव्यतिरेकबलात्कार्यकारणभावे प्रमिते अङ्कुरं प्रति बीजं तत्रापि बीजान्तरमित्यनवस्था स्वीक्रियते कार्यकार
णभावस्य लक्षणत्वात् तदुक्तं प्रामाणिकानवस्थायां न दोषायेति ... यमेवाप्रामाणिकी अनवस्थैव दुष्यते एवमनादिरनवस्थापि
बोध्या यथा घटं प्रति सदृशकारणं तत्राप्यदृष्टं ... पि अनवस्था घटं प्रति घटस्य हेतुत्वं न ॥

गो॰
९४
94

स्ति किं तत्कल्पनीयं यत्र कल्पनायाः मियमनवस्थाविरोधिनीति मूलक्षयकरीत्युच्यते तदुक्तमाचार्यैः मूलक्षयकरीं कल्पना
कवीं प्राहुरनवस्थां हि दूषणमिति इयमेवोद्देश्यप्राप्तौ अनवस्थाकार्यकारणोभयत्वकालीनत्वात् व्याघातो विरोधः यथा यदि
वह्न्यभाववान्स्यात्तदा धूमाभाववान्स्यादित्यत्र वह्न्यभाववान्भवतु धूमाभाववान्मास्त्विति शङ्कायां व्याघातः वह्न्यभावधू
मयोः परस्परविरुद्धयोरेकत्रासंभवात् यथा वा द्वित्वादिकं यदि प्रयत्नजन्यं न स्यात्तदा कार्यं न स्यादित्यत्र प्रयत्नजन्य
त्वमास्तु कार्यत्वमस्तु इति शङ्कायां व्याघातः प्रयत्नजन्यताभावकार्यत्वयोः परस्परविरुद्धयोरेवोपलम्भात् वह्नित्वेन
धूमत्वेन कृतित्वेन हेतुमद्भावाच्च यदि चादृष्टानामन्वयव्यतिरेकहेतुं विनापि कार्यं स्यात्तदा केन तदादृष्टं भोजना
दावर्थं न प्रवर्तेत तिलक्रियाविघातोऽपि नवीनास्त्वेकादशप्रविधस्तर्क इति वदन्ति तत्र पञ्च पूर्वोक्ताः प्रतिबन्दी लाघवं गौ
रवोत्सर्गापवादवैयर्थ्यानि षडिति मिलित्वा एकादश तत्र पूर्वपक्षसिद्धान्तयोः साम्यं प्रतिबन्दी यद्येश्वरश्चेत्तर्हि किं करोति
तदेदानीमपि किं न करोतीति मीमांसकाक्षेपे तत्त्वमपि सहकार्यजनकत्वपक्ष इति नैयायिकानां प्रतिबन्दी सहकारो तदी
चन्नत्रकादिसहकारिनयासमाधानमपि तुल्यम् समानप्रयोजनकत्वे सति कल्पनीयालघ्वपेक्षया कल्प्यमानस्याल्प
त्वं लाघवम् तत्र घटं प्रति हेतुत्वे कल्प्यमाने तत्कपालापेक्षया कपालत्वस्य लाघवाद्वारणं यत्नाल्पकम् यथानेके
श्वरकल्पनापेक्षया एकेश्वरकल्पने लाघवलक्षणाप्रवाल्पपट प्रयोगौरवलक्षणं भवति यथा एकेश्वरकल्पना
पेक्षया नैकेश्वरकल्पने अत्र यथा अन्वयव्याप्त्युदाहरणव्यतिरेकव्याप्त्युदाहरणव्यतिरेकव्याप्त्युदाहरणयोरेक
साध्यसिद्धिफलत्वमुद्भावनयोरपि किं योरेकार्थसिद्धिः फलम् यथोः द्वयोर्मध्ये यल्लाघवं तत्कल्प्यते न तु तद्भिन्नम् यथोर्द्व-
योर्मध्ये यत्र गौरवं तत्र कल्प्यते किं तु तद्भिन्नमिति विनिगमनाविरहेणोद्भयोरपि तुल्यकक्षतया प्रयोगः भव
त्यत्र गौरवं न देवकल्प्यते यत्र लाघवं तत्र कल्प्यते इत्येव किं च स्यात् अत्र किं विनिगमकमिति चेत् उच्यते ईश्व
रस्यैकत्वकल्पनमिष्टानवेऽपि समानप्रयोजनकत्वेऽल्पानल्पयोर्मध्ये अल्पविषयककल्पनत्वात् कन्यायाः नाना
वरापेक्षया एकवरकल्पनवत् अत्र च धर्मशास्त्रप्रमाणं सकृत्प्रदीयते कन्येत्यादिस्मार्त्तानुसारेण ताग्रह
वल्लघुविषयकल्पनायामेव पुरुषस्येच्छा जायते तथा हि तिकर्तिकर्तृरनेकत्वकल्पनमनिष्टानवेऽपि समप्रयो
जनककल्पनयोर्मध्ये अल्पविषयककल्पनत्वात् कन्यायाः नानावरकल्पनवदित्याद्यनुमाना

दनिष्टसाधनतायद्देशहकत्सनायांप्रेक्षावतो देषान्निवृत्तिरितिसुधीभिर्विभावनीयम् भयोदर्शनमुत्सर्गः अस्तुभवन्मतेऽप्रा
निसिद्धः परमात्मातथापितस्यश्रोभावेनयत् किंचित्कार्यकर्तृत्वमेवासंभावितं किंतु नजगत्कर्तृत्वमितिमीमांसका
देपनेयायिकाः आत्मत्वेनैवतावद्रुत्सर्गतः कर्तृत्वसंभावितकर्तृत्वंयथाऽस्मदादयः यत्रयत्रासंभावितकर्तृत्वं ताकर्तृत्वं
त्रात्मत्वाभावः यथाघटवदुत्पन्नयव्यतिरेकव्याप्तिसत्वात् उत्सर्गस्यैकदेशेबाधोऽपवादः यथास्वर्गकामोऽग्निष्टोमेन
यजेतेत्यादिविधिनाउत्सर्गतोऽग्निष्टोमस्यस्वर्गसाधनत्वंबोध्यते तत्रजनकादिषुमुक्तादिनापवादात्स्वर्गजनकत्वाभा
वः कल्प्यते अप्यवात्मत्वेनोत्सर्गतोज्ञानवत्त्वसंभावितमुक्तत्वापवादेनमुक्तात्मनिज्ञानाभावः कल्प्यते प्रश्नोत्तरयोः नि
ष्प्रयोजनतयाऽविशेषोततयाचमौनेवैयर्थ्यम् यथादिग्वादेःसकर्तृकत्वे किंमानमित्युक्तेउत्तरमनुमानमितितत्र किंप्र
माणमितिप्रश्नेऽनध्यवसायः तत्रापिकिमित्युक्तेः ऽनुत्तरमेकेतरकाकदन्तान्वेषणावत् प्रयोजनाभावात्प्रश्नाशया
अनिवृत्तेश्च इयमेवशङ्का पिशाचिकेत्युच्यते अतिप्रसंगाख्योदोषःसंप्रतिकेचित् तत्रप्रतिबन्दीमध्येअन्तर्भा
वात् तथाहि अयंजगत्कर्तापतद्यक्तित्वात्योनवंमनेवंयथाघटइत्यादेरप्यस्थितिकत्वंतदवच्छेदबुद्धिकत्वंतदार
भ्याधीनत्वादेर्योलाघवमप्येन्नर्भूतावेदितव्याः प्रतिवेदीप्रभृतीनामप्यांनमयोऽन्तर्भावइतिप्राचांहृदयम् प
चमात्मा अयादीनामपिव्याघात नियतत्वेऽवान्तरवैलक्षण्यैरेवपृथगुपादानंतथाचतल्लाघवादिष्वसत्वानमितिनवी
नाशयाः ज्योतिःशास्त्रादौतर्कपदेषट्संकेतस्तुतर्कप्रतिपादकदर्शनानांषट्संख्यात्वमूलकः तर्कस्याङ्गानिपंच
यथाआपाद्यापादकयोर्व्याप्तिः विपरीततर्कापराहतिः आपादकविपर्ययेपर्यवसानंआपाद्यस्यानिष्टत्वम् प्र
तिवादीष्टसाधकत्वरूपसनन्नुकूलत्वंचेति एषामङ्गानामेकतमस्याभावेतर्काभासत्वे तच्चतर्काभासोदाहर
णोदर्शयिष्यते तर्काभासीःसमयथाआपाद्यासिद्धिः

आपादकासिद्धिः उभयासिद्धिः मूलशैथिल्यं प्रतितर्कविरोधः इष्टापत्तिः विपर्ययापर्यवसानमिति तत्रापाद्या
सिद्धिर्यथा ईश्वरो यदि जगत्कर्ता स्यात्तदा गगनकमलादेरपि कर्ता स्यादिति आपादकासिद्धिर्यथा ईश्वरो यदि श
रीरी स्यात्तदा जीवः स्यादिति अत्रेश्वरस्य शरीरित्वं नैयायिकैर्नाङ्गीकृतमित्यापादकमसिद्धं उभयासिद्धिर्यथा ईश्व
रो यदि शरीरवान् स्यान्नित्यधर्माधर्मवानपि स्यादित्यापाद्यापादकयोर्व्याप्तिविरहः मूलशैथिल्यं यथा ईश्वरो य
दि कर्ता स्यात्तदा बालकः स्यादिति एतेषु तर्काभासेषु व्याप्तिरूपतर्काङ्गविरहः एवमापादकादिविशेषणासिद्ध
योपि द्रष्टव्याः यथा कांचनमयः पर्वतो यदि कांचनमयवह्न्यभाववान् स्यात्तदा कांचनमयधूमाभाववान् स्यादि(?)
त्र विशेषणस्य व्यर्थत्वादसिद्धिः प्रतितर्कविरोधो यथा ईश्वरो यो यथा ईश्वरो यदि कर्ता स्यात्तदा शरीरी स्यादिति मी
मांसकतर्कोपरि नैयायिकानां प्रतितर्कः ईश्वरो यदि कर्ता न स्यात्तर्हि अन्यादृगेवादृष्टि(?) इति अत्र विपरीततर्कोप्र
तिघातरूपतर्काङ्गाभावात् उभयोरपि तर्काभासत्वम् एतेनापाद्यस्य प्रतितर्कः इष्टापत्तिः यथा ईश्वरो यदि
कर्ता स्यात्तदाप्तिः(?) अत्रापाद्यस्यानिष्टत्वरूपतर्काङ्गाभावः विपर्ययापर्यवसानं यथा ईश्वरो यदि जन्यज्ञानकर्तृत्वा
भयाभाववान् स्यात्तदा जीवः स्यात् कुलालवत् न चायं जीवः तस्माज्जन्यज्ञानकर्तृत्वाभयाववान् इत्यत्र ज्ञानाभाव
कृतौ भयाभावसंभवेन चरितार्थत्वात्र कर्तृत्वाभावरूपविपर्ययपर्यवसानमिति अत्र विपर्ययपर्यवसानरूपतर्काङ्गाभा
वः अननुकूलत्वरूपतर्काभासत्वम् यथा ईश्वरो यदि कर्ता स्यात्तदा शरीरी स्यादित्यत्र पक्षस्यासिद्धत्वे प्रतिवादिनो
ननुकूलत्वात् धर्मिग्राहकमानेन तस्य कर्मान्तरस्यापि सिद्धेः असिद्धत्वे तत्रापादकासिद्धिमध्ये निवेशः एते आपाद
कज्ञानाभाव एव तत्त्वादितिसंक्षेपः ॥

निर्णयपदार्थं लक्षयति निर्णय इति अवधारणात्मकं ज्ञानं निर्णय इत्यर्थः तच्च प्रमाणानां कार्यं परपक्षनिराकरणस्वपक्षसाधन पूर्वकमर्थनिश्चयरूपं यथा पर्वतो वह्निमानेवेति तदुक्तमाचार्यैः विमृश्य पक्षप्रतिपक्षाभ्यामर्थावधारणं निर्णय इति तच्चेति प्रमारूपावधारणमित्यर्थः तेन शङ्काविरहे न तन्मेवमवधारणस्य निर्णयत्वमिति भावः वादं लक्षयति त त्त्वेति यथावधारणेच्छावत इत्यर्थः एतेन जल्पवितण्डयोरतिव्याप्तिः परिहृता तत्र विजिगीषोरेव कथकत्वात् कथालक्षणं वक्ष्यति तस्या वादादयस्त्रयो भेदाः वादश्च तत्त्वनिर्णयार्थिनो गुरुशिष्यसतीर्थ्यादयो वीतरागा एवाधि कारिणो न तु विजिगीषवः अतस्तत्र विजयमात्रफलकानां निग्रहस्थानानामप्रतिभादीनां नोद्भावनमिति दर्श यति स चेति अनिष्टानां तत्त्वज्ञानविरोधिनः ये निग्रहास्तेषामधिकरणं तदुद्भावनयोग्य इत्यर्थः अनिष्टेष्विति क्व चित् पाठः तथा च न्यूनाधिकत्वादिरूपनिग्रहस्थानोद्भावनं वादेऽपि विधीयते अन्यथा तत्त्वनिर्णयासंभवात्

निर्णयोऽवधारणज्ञानम् तच्च प्रमाणफलम् तत्त्वबुभुत्सोः कथा वादः स चाष्टनिग्रहाधिकरणम् ते च न्यू
नाधिकापसिद्धान्ता हेत्वाभासपञ्चकं चेत्यष्टौ निग्रहाः उभयसाधनवती विजिगीषुकथा जल्पः स च यथा
संभवं सर्वनिग्रहाणामधिकरणं परपक्षदूषणेऽपि स्वपक्षस्थापनप्रयोगावसानश्च स्वपक्षस्थापनाहीनो

परं तत्र जयपराजययोरन्यतर इति भावः अनिष्टनिग्रहस्थानानि दर्शयति ते चेति न्यूनाधिकापसिद्धान्ताः पञ्च हेत्वा भासा इत्यष्टौ निग्रहस्थानानीत्यर्थः इदमुपलक्षणम् पुनरुक्तत्वादिकमपि वादे उद्भावनीयमिति यथालक्षणमन्ये दर्श नीया जल्पं लक्षयति उभयेति परपक्षनिराकरणपूर्वकस्वपक्षसाधनवतीत्यर्थः उदेच विशेषणं वितण्डाति व्याप्तिवारणाय वादे इति व्याप्तिवारणाय विजिगीष्विति पदम् स जल्पः सर्वनिग्रहस्थानमप्युद्भावयितुमर्हतीति दर्शय ति स चेति परपक्षदूषणोत्तरमेव स्वपक्षस्थापनमित्याह परपक्षेति अस्य फलं च विजयः अपि केवलं स्वपक्षरक्ष णे परपक्षदूषणे वा न जयः किन्तूभयसत्त्व इति बोध्यम् वितण्डां लक्षयति स्वपक्षेति अत्रापि विजिगीषुकथात्वम् अव र्ने तेन तत्र जल्पातिव्याप्तिवारणाय हीनेति स्वपक्षस्थापनं विना परपक्षदूषणोद्भावनादिना तत्त्वनिर्णयफलिका

स्वपक्षस्थापनाभावे हेतुमाह नास्येति वैतण्डिकेनाप्येकसिद्धान्तमवलम्ब्यैव कथा कार्या अन्यथा शशशृङ्गस्यानित्यत्वे साध्ये कृतकत्वे हेतौ मीमांसकमतसाम्यमिव वैतण्डिके नास्य सिद्धान्ते नैयायिकेन स्वन्यायेनेति पुनः सौगतमतेन सिद्धसाधनमसाधारणवचनं वैतण्डिकाभिमानी मेघराजीयेन अत्र नास्तिकादिमतनियमकपराद्धान्तत्वनिर्णीयस्तार्थं जल्पवितण्डकायां मध्यस्थार्थं कण्टकावरणवत् तथा च न विगृह्य कथां कुर्यादिति तथा च प्रतिनिर्जित्य वादं तत्त्वादिति विषयविधिलोभप्रतिघाद्यर्थं कृतत्वाद् ब्राह्मणाभिमवत्त्वप्रयोजकः कथायाः सामान्यलक्षणमाह कथेति एकवक्तृकपूर्वोत्तरपक्षेति व्याप्तिवारणाय नानेति वहुभिः स्वनिष्ठानानार्थिभिः कृते विचारे ति व्याप्तिवारणाय पूर्वोत्तरपक्षैकेन पूर्वपक्षः क्रियते अन्येन समाधानं क्रियते एवं क्रमेण नानावक्तृकत्वमिति भावः नानाशुकादिकृतानुवादे ति व्याप्तिवारणाय प्रतिपादकेति यद्यपि शुकोदीरितवाक्यं प्रतिपादकं भवत्येव तथापि वादिप्रतिवादिनोर्हेत्वन्तराप्रतिपत्तिजनकत्वमर्थः शुकाद्युदीरितेहृच्छान्तवुद्धेरभावात् सर्वपदाद्येकवाक्यस्योभयवक्तृकत्वाभावात् संभ

नास्य वैतण्डिकस्य स्थाप्यः स्वपक्षोऽस्ति कथा तु नानावक्तृकपूर्वोत्तरपक्षप्रतिपादकवाक्यसंदर्भः उक्तानोपधर्मत्वादिरूपाणामन्येनकेनापि रूपेण हीना अहेतवः ॥

वदतीति संदर्भपदम् नादृशवाक्यानां संदर्भ उक्तरूपेण सम्यग्दृश्यतीति यावत् तथा च समूहस्योभयवक्तृकत्वविवक्षया एवेति भावः समूहस्यात्र यावतां कथाविश्रान्तिस्तावद्वाक्यसमुदायः तेन नैकदेशे ति व्याप्तिः हेत्वाभासपदार्थं लक्षयति उक्तानामिति अनुमानप्रकरणोक्ततिशेषः आदिपदाद्विपक्षासत्त्वप्रभृतीनां संग्रहः एकेनापीति यद्यप्येकेन रूपेण हीनाः केवलान्वयिप्रभृतयः सहेतव एवोक्तास्तथापि यस्य हेतोर्यावद्रूपाणां गमकतानमप्येकेन रूपेण हीनाः केवलान्वयिसाध्यकस्य विपक्षासत्त्वं केवलव्यतिरेकिसाध्यकस्य कतापक्षानि न सत्ता चरमप्येपतिविवक्षितत्वमभिप्रेतं केवलान्वयिसाध्यकस्य विपक्षासत्त्वकेवलव्यतिरेकिसाध्यकस्य सपक्षसत्त्वं न गमकतौपयुक्तमित्युक्तं प्राक् तथा च प्रकृतपक्षकप्रकृतसाध्यकप्रकृतहेतुकानुमित्युपयोगिपक्षधर्मत्वादिरूपशून्यत्वान्यतमत्वं हेत्वाभासत्वं केवलान्वयिसाध्यकेति व्याप्तिवारणाय योगीति विपक्षासत्त्वं तत्साध्यानुमित्यौपयोगित्वात् दोषवारणाय अन्यतमत्वं यत्प्रकृतपक्षादिप्रकृतानुमितिपदार्थः उपयोगित्वं च रूपाणामनुमितिजनकीभूत

हेत्वाभासपदसमुत्पन्नं दर्शयति नेत्यपीति कतिपयेति यथापि पर्वतो वह्निमान् द्रव्यत्वात् तत्र द्रव्यत्वस्य जलत्वादिनाऽसत्
तिपक्षितत्वस्य बाधितस्य पक्षस्य पक्षासत्त्वे विपक्षवृत्तेर्हेत्वाभासस्यानेकमपि रूपं विद्यते तथापि हेत्वन्वयव्यतिरेकाद्यत्वा
दिकं साहचर्यमस्तीति नासंगतिः तथा च हेतुरूपे तत्र रूपपयदर्माथर्म्यपरेनानुपपत्तसत्वादिपंच रूपं परमिति वा यथा
अनेन तयोगार्थकथनेन दुष्टाद्धेतवो वाऽऽभासा इति दर्शितम् हेतोराभासा हेत्वाभासा इति व्युत्पत्त्या तु हेतुदोषा व्य
भिचारादयः एव हेत्वाभासाः तद्युक्तो हेतुर्दुष्ट इति वा यथा तदवान्तरभेदान् दर्शयति तत्रासिद्धेति तत्रासिद्धत्वल
क्षणमाह अत्रेति उदयनेनेत्युक्तमयुक्तमनेनान्वेति असिद्धत्वलक्षणमिति तत्वेनावगतविषयतया परामर्शाभाववत्त्वमसिद्धत्वमि
त्यागतम् इदं च सद्धेतावपि परामर्शाभावदशायामतिव्याप्तमिति चेन्न तदभावाद्यस्मादनिश्चयत्वाव्याप्तिविशिष्टपक्षधर्मता

तेपि कश्चिद्धेतुरूपहेतुयोगाद्धेतुवदवभासमानाद्धेत्वाभासाः तेऽसिद्धविरुद्धानैकान्तिकप्रकरणसमकालात्यया
पदिष्टभेदात्पञ्चैव अत्रोदयनेनाप्यस्य हेतोः पक्षधर्मतयाप्रतीतिः सिद्धिः तदभावोऽसिद्धिरुक्तोऽसिद्धत्वलक्षणम्
तद्युक्तमपि विरुद्धादिष्वपि संभवतीति सांकर्यप्रतीयतेनथापि यथा न सांकर्यं तथा तदुच्यते यो हि यत्र साधनेषु
रनः परिस्फुरति समयेऽस्य दुर्विज्ञेयोऽसावेव दूषणत्वेनोपन्यस्तः कार्यादूषणमिति यावत् ॥ इत्यसतसा: सिद्धेरभा॥

ज्ञानप्रतिबंधकज्ञानविषयत्वे सति व्यभिचारभिन्नत्वमसिद्धत्वम् असिद्धिमान्यो हेतुः सोऽसिद्धः व्याप्त्यभावज्ञानेनापि सति
परामर्शानुदयात् बाधादिवारणाय सत्यन्तं व्यभिचारवारणाय विशेष्यं केचित्तु तदभावः तद्विषयीभूतत्वासिद्धपक्ष
धर्मता इति वदति असिद्धस्यासंकीर्णोदाहरणानाश्रयासिद्धिसत्वे वृक्षपविशेष्यासिद्धि संभवादिति तथा चतदोषरेव
किमसिद्धहेत्वाभासेनेति मनसि कृत्वाऽऽशंकते यद्यपीति सांकर्यदोषान्तरमात्रान्वयिकरणेनासिद्धविरुद्धादीनामेक
मित्यर्थः अत्राभाधेयस्यासिद्धविरुद्धहेतुभयत्र सत्वेप्यसिद्धत्वविरुद्धत्वायुपाधीनां ज्ञानेऽसांकर्यमिति विशेषयितयाऽऽह
यद्दूषणेनम् यथा नानुविशेष्यकेनापि काऽनाबृत्य व्यापारीलीभिन्नत्वेन हि दिति अभिप्रायवान्नाह यथा न सांकर्यमि
ति उच्यते उद्भावनतत्पश्चहेतोर्नानादूषणरूपतोऽपि यथा सांकर्यं न भवति नानादोषवत्तेऽप्रत्ययो न भवति तथाऽऽद्भावने
एकदोषाद्भवनमेव क्रियतेऽनेकं कथायविवसाने सिद्धिरिति भावः तत्रापि नानादोषवत्सेनैकस्यैकमोद्भावने कार्ये

गौ॰ ८६
97

सएवेत्यवकाशिकेत्यमाह नान्यइति ऊनेइत्यपेक्षायामाह तेनैवेति तेनूपत्नी विनइति तइत्यपन्नस्येत्यर्थः तेऽइत्यपन्न
त्यर्थः नइपयोगिनइतिपाठेप्ययमेवार्थः अन्वययामाप्तेति आमिक्षेननिग्रहोपिबोध्यः कुतोह्नामइतिदर्शयति ना
याचसतीति विरोधइत्यस्यविवरणं विपर्ययेति विपर्ययेणः साध्याभावव्याप्तो हेतुर्विरोधइत्यर्थः अनेकांतिकवादीना
मुद्भावनसमयेदर्शयति एवमिति विरुद्धोविरुद्धाविपर्ययव्याप्तइतिपाठेतदात्म्यमेवयेनहेतुनतयोःसाधकत्वानुमाप
कत्वरूपदृष्टज्ञप्तिकारकत्वंबोध्यं तथाभूताइति पुरःस्फूर्तिकाइत्यर्थः अनेकांतिकादयइति तत्रोद्भावनीयाइतिशेषः
व्याप्तीतिपक्षधर्मताविशिष्टेयहेतोस्तद्रूपतद्व्याप्त्यभावेनतद्विषयत्वेनव्याप्तिपक्षधर्मतान्यतराभावेनेत्यर्थः पूर्वोक्ताइति

नान्यः तेनैव पुरःस्फूर्तिकेन इष्टसिद्धेरपि तावत्कथायाः पर्यवसानेज्ञाते तदुपजीविनोऽन्यस्यानुपयोगात् तथा च सति
यत्र विरोधो विपर्ययव्याप्तो दृष्टज्ञप्तिकारकः स विरुद्धो हेत्वाभासः एवं यत्र व्यभिचारादयस्तथाभूतास्तत्रानै
कांतिकादयः ये पुनर्व्याप्तिपक्षधर्मत्वविशिष्टहेतुस्वरूपतदभावेन पूर्वोक्ता असिद्धा इष्टज्ञप्तिकारकास्ते
ऽसिद्धा इति यावत् तथाभूतास्तेऽसिद्धास्त्रिविधाः आश्रयस्वरूपव्याप्यत्वासिद्धभेदात् तत्र पक्षे हेतोराश्रयो
नावगम्यते स आश्रयासिद्धः ॥

पुरःस्फूर्तिका इत्यर्थः यत्रेत्यध्याहार्यम् तथा च तेऽसिद्धा यत्र व्याप्तिपक्षधर्मताभाववत्तया पुरःस्फूर्तिकास्तत्रोद्भावनी
या इत्यर्थः असिद्धादयइतिपाठे सिद्धमध्यपदस्य ग्रहणम् आदिपदेन चेतरयोरिति बोध्यम् इष्टज्ञप्तीत्यस्यादौ तएवे
त्यध्याहारः तएव इष्टज्ञप्तिकारकाः हेतोरसाधकतानुमापका इति यावदित्यस्येति पर्यवसन्नमित्यर्थः यद्वा दृष्टेवा
क्ता इत्यस्य विवरणं दृष्टमिति असिद्धा इत्यस्य विवरणं तिकश्चित् असिद्धस्यावान्तरभेदानाह तथाभूता इति दृ
ष्टज्ञप्तिकारका इत्यर्थः आश्रयासिद्धिं लक्षयति यत्रेति आश्रयः पक्षतावच्छेदकविशिष्टो नावगम्यते पक्षता
वच्छेदकवैशिष्ट्याभावो ज्ञायत इत्यर्थः तथा च यस्य सद्धेतोः पक्षतावच्छेदकाभावः स आश्रयासिद्ध इत्यर्थः ॥ ८६

उदाहरति गगनेति अत्र पक्षे गगनारविंदे पक्षतावच्छेदकस्य गगनीयत्वस्याभावः सरोजेति सरोजत्वरूपजत्वस्येत्यर्थः तेन नपौनरुक्त्यं ग
गनारविंदं गगनीयत्वप्रकारकभ्रमविषयारविंदमाश्रयः पक्षः स च नास्त्येव पक्षतावच्छेदकविशिष्टानभवत्वेपीत्यर्थः अत्र
यालीकप्रतियोगिकाभावस्याप्यलीकतयातिद्धयानुपपत्तेः सिद्धसाधनस्थलेप्येवं हेत्वाभासइति हेत्वाभासांतरासंक
यमसद्दृष्टांतमुदाहरणांतरमाह अयमपीति घटइति अनित्यत्वस्य प्रतियोगित्वेपि पटे पक्षतावच्छेदकघटत्वस्य सत्ता
शंकते नन्विति आश्रयस्य पक्षतावच्छेदकविशिष्टस्य सत्त्वादित्यर्थः ननु तथा सत्यत्र हेत्वाभासांतराभावात्सहेतुरेवा
यमुत्तनेत्याह सिद्धेति सिद्धस्य निश्चितस्य साध्यस्य साधनेयस्माद्धेतोः स सिद्धेतोः स सिद्धसाधन इत्यर्थः तथा च नसिद्धि

यथा गगनारविंदं सुरभि अरविंदत्वात् सरोजारविंदवत् अत्र हि गगनारविंदमाश्रयः स च नास्त्येव अयमप्या
श्रयासिद्धः घटो नित्यः कार्यत्वात् पटवत् नन्वकार्यत्वादिति हेतुर्नाश्रयासिद्धः आश्रयस्य सत्त्वात् सिद्धसा
धनस्तु स्यादेव सिद्धस्य घटानित्यत्वस्य साधनात् मैवम् न हि स्वरूपेण कश्चिदाश्रयो भवत्यनुमानस्य किंतु
संदिग्धत्वेन तथा चोक्तं भाष्यकृता नानुपलब्धे न निर्णीतेर्थे पि तु संदिग्धेर्थे न्यायः प्रवर्तते न च घटे नित्य
त्वसंदेहोस्ति अनित्यत्वस्य निश्चितत्वात् तेन यद्यपि स्वरूपेणाश्रयो विद्यते तथाप्यनित्यत्वसंदेहाभावा
द्वासावाश्रयइति आश्रयासिद्धत्वाद्धेतुः ॥

रूपप्रतिबंधकसद्भावान्नानुमितिरिति भावः तदेवदर्शयति सिद्धस्येति अत्र साध्यनिश्चयसत्वे घटस्य पक्षताभावात्पक्षता
वच्छेदकस्य पक्षत्वविशिष्टवृत्तित्वाभावो विद्यत एव घटवृत्तित्वेपि तस्य पक्षताभावादित्यभिप्रायवान्समाधत्ते मैव
मिति स्वरूपेणाश्रयत्वादिमत्तया आश्रयः पक्ष इत्यर्थः अनुमानस्येति करणव्युत्पत्त्या हेतोरित्यर्थः संदिग्धत्वेनेति
साध्यवत्वतदभावकोटिकसंशयविषयत्वेनेत्यर्थः संदिग्धएवमर्थे इति पाठे यमः साध्यम् इत्यनुपलब्धत्वाम् सिसाधयि
षाविरहविशिष्टसिद्ध्यभाववत्वेनापि बोध्यम् तत्र साधकमाह तथाचेति नानुपलब्धइति याज्ञानात्प्राक् घटे पक्षताभा

गौ॰ टी॰
98

ते प्रवृत्तिरीद ... प्रकाशते

स्वरूपासिद्धेत्यपति स्वरूपेणेति आश्रय इति पक्ष इत्यर्थः सपक्षपक्षैकवृत्तित्वाभाववानित्यर्थः लक्षेलक्षणं योजयति कृतकत्वमिति सामान्यस्य प्रागभावाप्रतियोगितयाकृतकत्वस्य कार्यत्वरूपस्य हेतोस्तत्रवृत्तित्वासंभवादिति भावः भागासिद्धस्य स्वरूपासिद्धस्य येत्रभावं दर्शयति भागासिद्धोपीति हेतोः किंचित्पक्षवृत्तित्वे सति किंचित्पक्षावृत्ति त्वे भागासिद्धत्वं तदेव दर्शयति पक्षीकृतेष्विति भागासिद्धपदस्यार्थमाह अत एवेति भागे पक्षैकदेशे रूपासि

स्वरूपासिद्धस्स उच्यते यो हेतुराश्रयेणावगम्यते यथा सामान्यमनित्यं कृतकत्वादिति कृतकत्वं हेतोराश्र येसामान्येनास्त्येव भागासिद्धोपि स्वरूपासिद्ध एव यथा पृथिव्यादयश्चत्वारः परमाणवो नित्या गन्धवत्वा दिति गन्धवत्वं पक्षीकृतेषु सर्वेषु नास्ति पृथिवीमात्रवृत्तित्वात् अत एव भागे स्वरूपासिद्धत्वम् तथा वि शेषणासिद्धविशेष्यासिद्धासमर्थविशेषणासिद्धासमर्थविशेष्यासिद्धादयः स्वरूपासिद्धभेदाः तत्र वि शेषणासिद्धो यथा शब्दोऽनित्यः द्रव्यत्वे सति अस्पर्शवत्वात् अत्र हि द्रव्यत्वविशिष्टमस्पर्शवत्वं हेतुं अस्पर्शकत्वमात्रे शब्देऽस्ति द्रव्यत्वं नास्ति तस्य गुणत्वाद्विशेषणे द्रव्यत्वे तद्विशिष्टमस्पर्शवत्व हेतोरभावादस्पर्शवत्वहेतोरभावः अतः स्वरूपासिद्धत्वं विशेषणाभावे सति विशिष्टस्याप्यभावा त् यथा दण्डमात्राभावे दण्डविशिष्टपुरुषस्याप्यभावः तेन द्रव्यत्वविशिष्टास्पर्शवत्वहेतोरभावादस्पर्शवत्व हेतोरभावः अतः स्वरूपासिद्धत्वम् ॥

द्धत्वं वृत्तित्वाभाव इत्यर्थः एवं हेतुविशेषणासिद्धप्रभृतीनामप्यत्रैवान्तर्भावं दर्शयति तथेति क्रमेणोदाहरति तत्रेत्यादिना विशेषणविशिष्टस्य हेतोः पक्षवृत्तित्वाभावो विशेषणासिद्धः द्रव्यत्वमस्तीति गुणादौ व्यभिचारवा रणार्थमुपात्तम् असिद्धिं योजयति अत्र हीत्यादिना विशेष्यवत्यपि विशेषणाभावकृतो विशिष्टाभाव इति दर्शयति तच्चेत्यादिना प्रपंचितमिदमभावस्य येन चेत्यस्यालीनत्वनावः तत्र हेतोर्विशेषणेति द ... रूपा

विशेषेति विशेषणस्य पक्षवृत्तित्वमिति विशेष्यस्य तद्वृत्तित्वाभावो विशेष्यासिद्धिः अत्र विशेष्याभावकृतो विशिष्टा
भाव इति दर्शयति न च विशेष्येति स्वरूपमस्तीत्यनेनेतरमतइत्यनुषज्यः असमर्थेति व्यभिचारवारकवि
शेषणाद्यन्त्वेतरसमर्थविशेषणा इत्यर्थः सामर्थ्यमिति व्यभिचारवारकतालक्षणमिति विशेषः अकारणकत्वस्येति
अकारणकभावत्वस्येत्यर्थः अन्यथा प्रागभावे व्यभिचारवार तेन समर्थविशेषणत्वात् प्रागभावप्रतियो
गित्वरूपेवानित्यत्वमात्रं वह्निमान्प्रमेयधूमादित्यादिकमप्यस्योदाहरणं बोध्यं स्वरूपासिद्धतो व्यक्तेति स्वरूपे
ति विशेषणाभावस्यापक्षवृत्तित्वाभावमतावाश्रकत न त्विति गुणत्वस्य पक्षेसत्वपि तद्विशेषणस्य विशेषणा

विशेष्यासिद्धो यथा शब्दो नित्यः अस्पर्शवत्वे सति द्रव्यत्वात् अत्रापि विशिष्टो हेतुः न च विशेष्याभावे विशिष्ट
स्वरूपमस्ति विशिष्टहेतुरपि नास्त्येव असमर्थविशेषणो यथा शब्दो नित्यः गुणत्वे सत्यकारणकत्वादिति
अत्र हि विशेषणस्य न किंचित्सामर्थ्यमस्ति विशेष्यस्याकारणकत्वस्यैव नित्यत्वसाधनसामर्थ्यात् अतो
समर्थविशेषणः स्वरूपासिद्धः विशेषणाभावे विशिष्टस्याप्यभावात् ननु विशेषणाभावात्तेन स्वरूपाद्वै
तावमत्कथं विशेषणाभावः सत्यं अस्त्येव गुणत्वं किन्तु न तद्धेतुविशेषणं तदेव हेतोर्विशेषणं भवति यदन्य
व्यवच्छेदनप्रयोजनवत् गुणत्वं तु निष्प्रयोजनम् अतोऽसमर्थमित्युक्तमेव असमर्थविशेषणो यथा य
थात्रैवमत्ययेन प्रयोगे शब्दो नित्यः अकारणकत्वे सति गुणत्वात् ॥

न विशिष्टाद्विशेषणात् विशिष्टगुणत्वाभावो वर्तते पक्ष एवेत्यभिप्रायवान्समाधत्ते सत्यमिति अन्यानन्तविशेषणासि
त्याशंकायामाह तदेवेति अन्येति हेतोरन्यस्या व्यभिचारस्य व्यवच्छेदेन व्याहृत्या प्रयोजनवत्त्वमित्यर्थः अत्रामेदेर
तायाघात्येनवानितिवत् तथा चाव्याप्यव्यावृत्तिरूपप्रयोजनवत् व्यभिचारवारकमेव विशेषणमिति भावः इद
चैकदेशिमतमास्थित्योक्तम् वस्तुतस्तु समर्थविशेषणासमर्थविशेष्ययोर्व्याप्यत्वासिद्धमध्ये न्तभावः वक्ष्यमा

असमर्थत्वादिना साध्याव्यभिचारिविशेषणवान् हे
तुरसमर्थविशेष्यः ॥

तन लक्षणायोगात् विशिष्टस्य पक्षावृत्तितया प्रकृते
लक्षणायोगात् अर्थविशेषणादेर्व्याप्यत्वासिद्धि
त्वेनैव तान्त्रिकाणां व्यवहारात् व्यर्थविशेष्यं लक्षयति

९९

लक्षणस्फुटीकरोति अत्रेत्यादिना विशेषणासमकारकत्वेतन्मात्रस्येत्यर्थः विशेष्यवारणाय मात्रपदं मात्रसे
वेत्येवकारः संपातायातो निरर्थकः अथवा विशेष्यमसमर्थमेवेत्यर्थि मेणावोजनीयः समर्थस्यादिति व्या
प्तिपदत्यर्थमेतान्नूपसामर्थ्यं च ताद्विमर्थः नन्वकारणत्वविशिष्टगगनत्वस्य हेतोः एकत्वेहृतित्वान्नूप
सिद्धताकथमसमत आह स्वरूपेति विशेष्याभावइति ननु विशेष्याभाववत्त्वं कथं विशेषणस्यपक्षवृत्तित्वा
दिति चेन्नैवम् हेतोव्यभिचारवारक सैवप्रते विशेष्यता गगनस्य च ताहृशत्वाभावेन प्रकृते विशेष्यत्वाभावात्
तथा च गगनत्वस्य गगनस्य प्रत्ते घृतित्वे पि विशेष्यतत्त्वविशिष्टगगनत्वाभावः एतद्विचतपवेत्यभिप्रायवान् न त्वेवमतवि
गत्वाभावो वायव्यं इत्यभिप्रायः व्याप्यत्वासिद्धेर्लक्षयति व्याप्यतेत्यादिना यत्रेति पञ्चमी वाच्छिन्नत्यर्थः तेन धूमस्य नाहि
त्यादौ नाव्याप्तिः अन्यथा गगनकमीन्यत्वविशिष्टसत्तायाद्रव्यत्वस्य तया विशिष्टसत्तायाश्च केवलसत्तानतिरेका

अत्र तु विशेषणमात्रमौचनित्यत्वसाधनेसमर्थत्वात् विशेषसमर्थम् स्वरूपासिद्धस्तु विशेष्याभावे पिवि
शिष्टाभावात् विशिष्टस्य हेतुत्वेनोपादानात् शेषंपूर्ववत् व्याप्यत्वासिद्धस्तु यत्र व्याप्तिर्नावगम्यते सद्वि
विधः एकः साध्येनासहचरितः अपरस्तु सोपाधिकसाध्यः तत्र प्रथमो यथा यत्सत्तत् क्षणिकं यथा घनः स

इत्याप्तिः सत्र व्याप्तिरिति साध्यतावच्छेदकावच्छिन्ननिरूपिता व्याप्तिरित्यर्थः तेन पर्वतः कांचनमयवह्निमान् धूमादित्या
दिमादौ धूमस्य व्याप्यत्वेपि हेतोर्नाव्याप्तिः तथा च साध्यतावच्छेदकावच्छिन्ननिरूपितव्याप्यतानवच्छेदकधर्माव
च्छिन्नो व्याप्यत्वासिद्ध इति पर्यवसितम् तद्विभागमाह सद्विविधइति साध्येनेति असहचरितो सामानाधिकरण्यं
एतेनानौपाधिकसंबंधरूपाया व्याप्तेः सामानाधिकरण्यरूपविशेष्यविरहाद्विशिष्टाभावो दर्शितः सोपाधिके
ति उपाधिनासहवर्तते इति सोपाधिकः सोपाधिकः सोपाधिकस्य साध्यसंबंधः साध्येन सह सामानाधिकरण्यमि
ति अत्राप्यनौपाधिकत्वरूपविशेषणाभावकृतो विशिष्टव्याप्त्यभाव इति बोध्यं यत्सदिति वौद्धमतेनैव प्रयोगो

क्षणिकत्वं साध्यमिति नैयायिकमते पततप्रसिद्धिश्चरमशब्दे बोध्या सत्वहेतुरिति अत्र हेतुतावच्छेदकं यत्सत्त्वं तत
त्साध्यनिरूपितव्याप्त्यनवच्छेदकमिति भवति व्याप्यत्वासिद्धिः अत्र साध्यासहचरितत्वस्य साध्यानधिकरण
वृत्तित्वमर्थमभिप्रेदमदात् यदि च साध्याधिकरणावृत्तित्वमर्थस्तदा वह्निमान् ह्रदत्वादित्यादिकमुदाह्रियेत
यथा सते चरमशब्दस्याप्युपात्तशब्दनाशनाश्यतया न क्षणिकत्वं तन्मते गगनकमलवानित्यादिवत्साध्याप्र
सिद्धेरेवोदाहरणमिदम् निकर्षस्तु शब्दग्रंथे दर्शितः साध्याप्रसिद्धिदोषस्तु पक्षताविघटक तथा चाश्रयासिद्धि
मध्यन्नभूते नः यत्तु मोवर्द्धनेनोक्तं यत्र हि क्षणिकत्वमसहचारः अप्रसिद्धोत्वयार्थकं तेव नि चेत्र अस्य विरु

अहिंसाव्यादिः पक्षस्तस्य क्षणिकत्वे साध्ये सत्त्वं हेतुः न चास्य हेतोः क्षणिकत्वेन व्याप्तौ प्रमाणमस्ति इदानी
मुपाधिसहितो व्याप्यत्वासिद्धः स ह स्यात् यथा स्यात् मैत्रीतनयत्वात् अत्र हि मैत्रीतनयत्वेन
श्यामत्वं साध्यं न च मैत्रीतनयत्वं श्यामत्वे प्रयोजकं किंतु शाकाद्याहारपरिणाम एव च प्रयोजकं सोपाधिस्तु
च्यते अतो मैत्रीतनयत्वं श्यामत्वेन सह व्यभिचारात् शाकाद्याहारपरिणाम उपाधिः यथा धूमे आर्द्रेन्धनसंयोगः अ
तोत्रोपाधिसत्त्वे यथा वा आस्तिकनास्तीतिव्याप्यत्वासिद्धो यमेतन यथ्वादितिहेतुः नयपरोपि व्याप्यत्वासिद्धः
यथा क्रत्वन्तर्वर्तिनी हिंसा धर्मसाधनं हिंसात्वात् अत्रापि हिंसात्वं न धर्मप्रयोजकं किंतु निषिद्धत्वमुपा

दौदाहरणं न वोपलक्षकत्वादिति तन्मंदपकारीयभावानवधूलम् न चास्येनित्यक्षणिकत्वनिरूपितव्याप्तेरेतद्धे
तोदाहरणं न वोपलक्षकत्वादिति भावः साहचर्यव्याप्तिश्चरमशब्दे प्रसिद्धेतिभावः अन्यथा नाहर्ष्याप्तेः सिद्धि
व्याप्तिसंभवयित्वे प्रमाणं नास्तीति भावः तद्धेतु व्याप्यत्वासिद्धमुदाहरति इदानीमित्यादिना न चेत्यादि फक्किकाभ्यां अथ व्याख्या
नावसरे व्याख्यातं आस्तिकनास्तीति उपाधिमेव पेयत्वनोपाधिकसंबंधरूपव्याप्तेरसंभवादिति भावः श्रुति
वृद्धयेउदाहरणान्तरमप्यस्य दर्शयति क्रत्विति पक्षीयपशुहिंसेत्यर्थः अथ धर्मसाधनमित्यत्राथमेद

गो॰
१००
100

निषिद्धत्वे पि उपाधिलक्षणमस्तीति दर्शयितुं व्युत्पिपादयिषोराशंकां दर्शयति नन्विति साधनाव्यापकेति व्याख्यातमिद
मनुमानप्रकरणे तत्रेति व्याप्तकाशंकेयम् तेन निषिद्धत्वे कथमुपाधिलक्षणं नास्तीति न पर्यनुयोगः यद्वा यमभिप्रा
यः अथ मेत्याविनित्यकर्म कर्माकरणान्निषिद्धकर्मकरणान्निषिद्धकरणाच्च भवति तथाच स्मृतिः विहितस्याननुष्ठा
नान्निषिद्धस्य च सेवनात् अनिग्रहाच्चेन्द्रियाणां नरः पतनमृच्छति पतनं पापं तत्र च नित्यकर्माकरणे धर्मसाधनत्वे
ति हेतिनिषिद्धत्वमिति साध्याव्यापकत्वान्न निषिद्धत्वमुपाधिरिति भावः निषिद्धत्वस्य तु साध्याव्यापकत्वे पि साधनावच्छि
न्नसाध्याव्यापकत्वं विद्यत एव यथा शाकपाकजत्वस्येत्यभिप्रायेण समाधत्ते मैवमिति साध्यस्येत्यादि साधनावच्छिन्न

ननु साध्याव्यापकत्वे सति साधनाव्यापको यः स उपाधिरिति उपाधिलक्षणं तच्च निषिद्धत्वे नास्ति तत्कथं निषिद्धत्वमु
पाधिरिति मैवम् निषिद्धत्वे उपाधिलक्षणस्य विद्यमानत्वात् तथाहि साध्यस्याधर्मस्याव्यापकं निषिद्धत्वं यत्र
यत्राधर्मजनकत्वं तत्र तत्र निषिद्धस्य विद्यमानत्वात् न च यत्र यत्र हिंसात्वं तत्र तत्रावश्यं निषिद्धत्वं क्रतुगहिंसा
यां निषिद्धत्वस्य व्यभिचारात् अत्र क्रतुगहिंसायामधर्मसाधनत्वश्रुतेरन्यत्र निषिद्धत्वमिति तदेवं त्रिविधो
पाधिरसिद्धो दर्शितः संप्रति विरुद्धः कथ्यते साध्यविपर्ययव्याप्तो हेतुर्विरुद्धः यथा शब्दो नित्यः कृतकत्वात् अ
त्र हि नित्यत्वे साध्ये तद्विपर्ययेणानित्यत्वेन कृतकत्वं व्याप्तं यद्यत्कृतकं तत्तदनित्यमेव साध्यविपर्य

येत्यस्याहार्थं यत्रेति यत्र यत्राधर्मजनकहिंसात्वमित्यर्थः साधनाव्यापकत्वं दर्शयति न चेति क्रतुगहिंसा
यां व्यभिचारं स्फुटीकरोति अत्रेति यज्ञीयपशुहिंसायां हिंसात्वं वर्तते ऽधर्मजनकत्वं नास्ति अग्नीषोमीयपशु
मालभेतेत्यादिश्रुतेः तस्माद्यज्ञे वधोऽवध इति श्रुतेश्च अवधो वधकार्याकारी अधर्माजनक इत्यर्थः ननु तदा
न हिंस्यात्सर्वा भूतानीति श्रुतेः का गतिरिति चेत्तत्राह अन्यत्रेति तथा चास्याः सामान्यश्रुतेर्विशेषश्रुतिदर्श
नाद्यज्ञीयेतरत्वं कल्प्यत इति भावः विरुद्धं लक्षयति साध्येति साध्याभावव्याप्य इत्यर्थः साध्याकरणमिति विरु
द्धत्वमिति तल्लक्षणे तन्न संयोगाद्द्रव्यत्वादित्यादौ साध्याभावव्याप्यत्वे पि द्रव्यत्वसमानाधिकरणाप्तिः लक्षणयोज

अनैकान्तिकं लक्षयति साध्यसंशयेति साध्यसंदेहजनकीभूतज्ञानविषयत्वमर्थः भवति हि साधारणधर्मवद्धर्मिज्ञ
नादसाधारणधर्मवद्धर्मिज्ञानाद्वा संशय इति नन्वेवं साधारणासाधारणरूपस्यानैकान्तिकस्य नेनुसाध्वो नित्या
दिविप्रतिपत्तेरपि संशयहेतुत्वात्तद्विषये नित्यत्वादौ लक्षणमिदमतिव्याप्तमतो लक्षणान्तरमाह सव्यभिचार इति
सव्यभिचारलक्षणमग्रे वक्ष्यति अनैकान्तिकं विभजते सद्विविध इति साधारणं लक्षयति पक्षसपक्षेति अत्र सपक्ष
विपक्षवृत्तित्वात् साध्यतदभावसाहचर्यलाभः पक्षवृत्तित्वेन च पक्षनिष्ठसाध्यसंदेहजनकज्ञानविषयत्वं लभ्यते
तथा च पक्षनिष्ठसाध्यसंदेहजनकज्ञानविषयत्वे सति साध्यतदभावसहचरितत्वं लक्षणमिति पर्वतामत्वादित्यसिद्धेः

साध्यसंशयहेतुरनैकान्तिकः सव्यभिचार इति वा सद्विविधः साधारणोऽनैकान्तिकश्चेति तत्र प्रथमः पक्ष
सपक्षविपक्षवृत्तिः यथा शब्दो नित्यः प्रमेयत्वात् अत्र हि प्रमेयत्वं हेतुः स च पक्षे शब्दे सपक्षे च नित्ये विपक्षे
चानित्ये वर्तते सर्वस्य प्रमेयत्वात् ॥

नित्यव्याप्तिवारणाय सत्यन्तम् असाधारणोऽतिव्याप्तिवारणाय विशेष्यम् संदेहजनककोटिस्मरणाविषयतयोपकैकस्मि
न्नतिव्याप्तेः साध्यतदभावेति द्वयोपादानमिति केचिद्व्याचक्षते वस्तुतस्तु प्राचीनमते यथाश्रुतमेव सम्यक्पक्षपू
मतद्वयोर्वैकल्पिकोपादानात् लक्षणद्वयतात्पर्यम् पक्षविपक्षव्यावृत्तित्वे पक्षविपक्षेऽपि नेतु साधारणत्वमि
त्यर्थः असिद्धविरुद्धयोरतिव्याप्तिवारणाय लक्षणद्वये विशेषणद्वयम् नवीनमतेन मार्गपानिष्फिकारणादिति तन्मे
वसाधारणानैकान्तिकत्वं नच विरुद्धादावतिव्याप्तिः तेषामुभयरूपतायाः पूर्वमादेदितत्वादिति न तेषु निष्प्रावकः क्व
चित्तत्वेव पाठः पक्षसपक्षविपक्षवृत्तित्वस्य सर्वस्य प्रमेयत्वादित्यर्थः ॥

गो. असाधारणं लक्षयति सपक्षेति सपक्षविपक्षादिति पाठे समाहारद्वंद्वः व्वलक्षणापर्यवसितं सपक्षविपक्षव्यावृत्तत्व
९९ पक्षातिरिक्तसाध्यतदभावाधिकरणावृत्तित्वम् आकाशादेरप्यसाधारणमेव तन्मते तेषां सलक्ष्यते तेन द्वितीयं पक्ष
101 मात्रेति एकलक्षणापरत्वे पक्षमात्रेत्यनेनैव सामंजस्ये पक्षेमादिवैयर्थ्यापत्तेः अत्र गात्रपदसपक्षाद्व्यावृत्तिलाभः इद
चयद्यप्यतिरेकिणि सद्धेतावतिव्यापकम् यथा पृथिवी इतरेभ्यो भिद्यते गंधवत्वादिति तथापि सति सपक्षे तद्या
वृत्तित्वं विवक्षितमिति प्राचः पक्षवृत्तित्वे सति साध्यव्यापकाभावप्रतियोगित्वमिति चिंतामणिकाराः एवं ल

असाधारणानैकान्तिकं लक्षयति सपक्षविपक्षव्यावृत्तः पक्षमात्रवृत्तिः यथा भूर्नित्या गंधवत्वादिति अ
त्र हि गंधवत्वं हेतुः सपक्षान्नित्यादाकाशादेर्विपक्षाच्चानित्याज्जलादेर्व्यावृत्तः गंधवत्वस्य पृथिवीमात्रवृत्तित्वा
त् ॥

त्वात् स्यासाधकत्वेन द्वितीयलक्षणस्यसत्वं दर्शयति गंधवत्वस्येति अत्र प्राचीनमतानुसारादेवानैकान्तिकल
द्विविधत्वं ग्रंथकारेणादर्शितं चिंतामणिकारादिमतेन तु त्रिविधोऽनैकान्तिकः तत्रानुपसंहारी तृतीयः तल्लक्षणं तु
केवलान्वयिधर्मावच्छिन्नपक्षतावत्त्वम् प्रमेयं वह्निमद्धूमादित्यादिः प्रमेयत्वेन पक्षतायां पक्षातिरिक्ताप्रसिद्धेः त
त्र साध्यहेत्वोरुपसंहारासंभवात् अवृत्तिहेतुकत्वमनैकान्तिकत्वमनुपसंहारित्वम् यथाकाशमनित्यं शब्दवत्वात् अय
प्राचीनमतेऽसाधारणमध्ये लभ्यते अनेन रूपेण ज्ञानस्याप्यनुमितिप्रतिबंधकत्वाद्दुष्टत्वम् अन्यथाऽसिद्ध
मध्ये सर्वदेवाभासानामन्तर्भावापत्तेः अस्ति द्विः सर्वव्यापकत्वादिति नवीनाशयः ॥ ९९

ननु सव्यभिचारत्वमनैकान्तिकसामान्यलक्षणं तत्र साध्याभाववद्वृत्तित्वं व्यभिचारः स च पक्षमात्रवृत्तावसाधारणेन सम्भवतीति कथं
तस्यानैकान्तिकत्वमित्यत आह सव्यभिचारस्त्विति उभयसाधारणाद्विशेषः सम्भवतीति स्वं च केवलव्यतिरेकिणि सद्धेतौ सपक्षा
संभवात् तद्वृत्तित्वाभावेपि न व्यभिचार इति ज्ञापनाय विपक्ष इति चकारात् संभवतीति लभ्यते न च केवलान्वयि सद्धेतोर्विपक्षाप्रसि
द्धत्वेपि न व्याप्तिभङ्ग इति द्योतनाय विपक्षाद्व्यावृत्तिरेव नैवकारेण सपक्षवृत्तित्वविशिष्टस्य हेतोर्विपक्षवृत्तित्वाभाव एव व्या
प्तिर्न तु केवलं विपक्षवृत्तित्वाभाव इति सूच्यते नियमो व्याप्तिरित्यर्थः अत्रानौपाधिकत्वं च यत्र पाया व्याप्तिर्विपक्षवृत्तित्वाभा
वकथनेनानौपाधिकत्वोपलाभः सोपाधित्वे साध्यव्यापकाभाववद्वृत्तित्वेन साध्याभाववद्रूपविपक्षवृत्तित्वस्यावश्यकत्वा
त् तद्व्यावृत्तत्वे तु भवत्येवानौपाधिकत्वे सपक्षवृत्तित्वकथनेन च साध्यसामानाधिकरण्यलाभ इति भावः ननु केवल
विपक्षव्यावृत्तत्वमेव व्याप्तिरस्तु किं सपक्षवृत्तित्वेनेत्यत आह गमकेति गमकस्य साधकस्य हेतोर्गमकत्वात् साध्यसाधकत्वा
दित्यर्थः गमकत्वादिति पाठे साध्यानुमितिकारणीभूतज्ञानविषयत्वादित्यर्थः अयमाशयः केवलविपक्षाद्व्यावृत्तित्वज्ञानानु
मितिः आकाशादौ तद्धेतौ विपक्षवृत्तित्वग्रहाभावादनुमित्यनुत्पत्तेः न वा केवलसपक्षवृत्तित्वग्रहात् प्रमेयत्वादौ तद्ग्र
हेपि व्यभिचारग्रहदशायामनुमित्यनुदयात् तस्माद्विशिष्टज्ञानस्य

सव्यभिचारस्तु लक्ष्यते संभवति सपक्षे च हेतोः पक्षसपक्षवृत्तित्वे सति विपक्षाद्व्यावृत्तिरेव नियमो गमकाङ्गत्वात्
तस्य तन्नियमाभावो व्यभिचारः विपरीतव्याप्तेश्चैवं स च द्वेधा संभवति सपक्षविपक्षयोर्वृत्तौ ताभ्यां व्यावृत्तौ च ॥

वानुमितिकारणत्वमिति विशिष्टस्यैव व्याप्तित्वमिति एतादृश्या व्याप्तेरभावः प्रकृतव्यभिचारपदार्थः स च विशिष्टाभावरूपोऽ
साधारणस्य विद्यत एव विपक्षाद्व्यावृत्तिमत्वेपि सपक्षवृत्तित्वरूपविशेषणाभावकृतस्य सपक्षव्यावृत्तित्वाभावस्यानपाया
दिति दर्शयति तस्येति प्रकृतस्यासाधारणस्येत्यर्थः तस्य तन्नियमाभावः पूर्वोक्तव्याप्त्यभावः तद्रूपो व्यभिचारस्तिष्ठत्ये
वं प्रत्याहारेण योजनीयं साध्यविपरीतव्याप्तेश्चैव साध्याभावव्याप्यस्य विरुद्धस्यैवेत्यर्थः तस्यापि विरुद्धस्य सपक्ष
वृत्तित्वविपक्षव्यावृत्तित्वोभयाभावकृतविशिष्टनियमाभावो व्यभिचारस्तद्वत्रापि सपक्षव्यावृत्तिरूपविशे
षणाभावकृतविशिष्टनियमाभाव एवं विशिष्टनियमाभावलोपो साध्ये विशिवः कोविहृने व्याभावाव क्व
विद्धि शेषणायामाभावात्तु न दर्शयति ताभ्यामिति सपक्षविपक्षाभ्यां व्यावृत्तौ सपक्षवृत्तित्वरूपविशेषणाभावा

गौ.
१२
102

प्रकरणसमेऽव्याप्तिरिति यस्येति प्रतिपक्षभूतं साध्याभावसाधकीभूतं लिङ्गं यामपूर्वं विषयः इत्यर्थः तथा च समव
न साध्याभावसाधकहेतुबलप्रयासपूर्वा समानकालीनत्वप्रकरणसमत्वमित्यर्थः अप्रसिद्धसंज्ञाभ
दर्शयति सपक्षेति अनित्यधर्मेति सोऽयमित्यादिप्रत्यभिज्ञानाविषयत्वादित्यर्थः तेनानुपलभ्यमा
नत्वादित्यर्थः आत्मादिवदिति दृष्टान्तो बोध्यः अयं च स्थापनाहेतुः अत्र सत्प्रतिपक्षं दर्शयितुमाह अत्र चेति विपरीतेति
साध्याभावसाधकमित्यर्थः नित्यधर्मेति उत्पन्नो विनष्ट इत्यादिप्रमायाविषयत्वमित्यर्थः नित्यत्वेनानुपलभ्यमा
नत्वादित्यर्थः घटादिवदिति दृष्टान्तो बोध्यः लक्षणस्य समबलपदप्रयोजनं दर्शयितुमाह यत्त्विति हेतुदोषवत्त्वा
अनुपस्थितत्वमतुल्यबलत्वम् तत्रोपजीवकस्थले तुल्यबलत्वमुदाहरन्नाह तथाहीत्यादिना उपजीव्यमपेक्षणीयम् उ

यस्य प्रतिपक्षभूतं हेत्वन्तरमस्ति स प्रकरणसमः सपक्षे सत्प्रतिपक्षत्वमुच्यते तद्यथा शब्दो नित्यः अनित्यधर्मा
नुपलब्धेरिति अत्र च विपरीतार्थसाधकसमानबलमनुमानान्तरं प्रतिपक्षत्वमुच्यते यथा शब्दोऽनित्यः नि
त्यधर्मानुपलब्धेरिति यत्र त्वन्यतरस्य बलं न स प्रतिपक्षः तथाहि विपरीतसाधकानुमानं त्रिविधं
भवति उपजीव्यमुपजीवकमनुभयं च तत्राद्यं बाधकं बलवत्त्वात् यथा परमाणवोऽनित्याः स्पर्शवत्त्वात् घ
टवत् अयं हेतुः परमाणुनित्यत्वसाधकस्यापि परमाणुसाधकानुमानस्य न प्रतिपक्षः तदुपजीवकत्वेन
बाध्यत्वात् किं तस्य परमाणुसाधकानुमानबाधकमेवोपजीव्यत्वात् तच्च धर्मिग्राहकत्वात् अणु
परिमाणतारतम्यं क्वचिद्विश्रान्तं परिमाणतारतम्यत्वात् महत्परिमाणतारतम्यवत् पृथिवीत्वपरमो

पजीवकं तस्मादेतम् अनुभयं तदुभयभिन्नम् नोपजीव्यं न चोपजीवकमित्यर्थः तयोपजीवकयोर्न तुल्यव
लत्वमाह तत्रेत्यादिना बाधकत्वे हेतुर्बलवत्त्वादिति उपजीव्यानुमानं दर्शयितुं प्रथमम् उपजीवकं दर्शयति
यथेत्यादिना अत्र स्पर्शवत्त्वादिति पाठे परमाणुत्वरूपेण मतमोपियतस्थ्यत्वर्भावइति बाध्यम् तेन तत
त्र व्यभिचारः अनुष्णाभातिक परमाणुनामेव पक्षता अत्रोपजीव्यानुमानेन साधकस्य सत्प्रतिपक्षत्वमाह अस्येत्या
दिना बाधकत्वे हेतुरुपजीव्यत्वादिति तत्रापि हेतुः तच्च धर्मीति धर्मिग्राहकानुमानं दर्शयति पृथिवीत्वा

१२

अश्रयस्याभावादिति परमाणोरनित्यत्वानुमापकस्य हेतोराश्रयस्य परमाणोर्लाभाद्युक्तानुमानेन ज्ञानादर्शोपजीव्यत्वेनाश्रयज्ञा
नाधीनानित्यत्वसाधकापेक्षणीयत्वमित्यर्थः तदेवोपपादयति नहीति तथा चानित्यत्वानुमानस्य परमाणुसाधकानुमाना
नपेक्षणे आश्रयासिद्धिः अपेक्षणे च तेनैव तस्यानित्यतायामपि सिद्धवाधनमिति तत्साधकस्य हेतोर्न बलत्वमेवेति भावः अ
नेनेति अनित्यत्वानुमानेनेत्यर्थः अनवज्ञातप्रामाण्यमित्यर्थः संवादप्रामाण्यानुमानात् अन्यथा तद प्रामाण्यप्रसक्तेरिति
सत्वानुमानस्येत्यर्थः परमाण्वसिद्ध्याश्रयासिद्धिरिति भावः उपसंहरति तस्मादिति पूर्वोक्तबलवत्त्वादित्यर्थः उपजी
व्यपरमाणुसाधकानुमानेन बाधकमेव द्वितीयहेतोः साध्याभावप्रमाजनकमेवेत्यर्थः एवकारेण सत्प्रतिपक्षतानिरासः
उपजीवकमनित्यत्वानुमानं दुर्बलतादोषवत्तयोपस्थितत्वादित्यर्थः बाध्यप्रमितपक्षवृत्तिसाध्याभावप्रतियोगिसाध्यवत्त्वे
त्यर्थः तृतीयमिति उपजीव्योपजीवकभिन्नमित्यर्थः ननु पर्वतो वह्निमान् धूमात् वह्न्यभाववान् पाषाणमयत्वादित्यत्र
कथमस्योपजीव्यत्वम् आश्रयलाभात् नहि प्रमाणेनानवगतमनेन धर्मिणि परमाण्वादावनित्यत्वानुमान
मिदं सम्भवति अनेन परमाणुग्राहकस्य प्रमाणस्य प्रामाण्यमप्यनुज्ञातम् अन्यथाऽस्योदयासम्भवात् तस्मा
दुपजीव्यं बाधकमेव अजीवकं तु दुर्बलत्वाद्बाध्यमेव यथेदमेवानित्यत्वानुमानं तृतीयत्वप्रतिपक्षः
समबलत्वात् यस्य बलवत्त्वम् तत्त्वादिप्रमाणेन पक्षसाध्याभावः परिच्छिन्नः स कालात्ययापदिष्टः सप्रबाधि
तादिग्रहदशायामपि उपजीव्योपजीवकभिन्नत्वेन यासत्प्रतिपक्षतास्यादित्याशङ्कायां हेतुमाह समबलेति तथा
च त्रैक हेतौ दोषोपस्थितिदशायां समबलताभावस्तत्र द्वयकल्पेपि न सत्प्रतिपक्षतेति भावः इदं तु बोध्यम् सत्प्रति
पक्षस्य दशाविशेषे पाषाणमयत्वादेरपि न पक्षस्थितिदशायां धूमस्यापि सत्प्रतिपक्षितत्वात् अत एवोक्तं हेत्वाभासे
साधारणसत्प्रतिपक्षयोर्दशाविशेषे आभासत्वमिति कालात्ययापदिष्टलक्षणमाह यस्येति यत्प्रति पक्षस्य लक्ष्य
साध्याभावसाधकस्यानुमानरूपतानापेक्षिता किं तु साध्याभावसाधकयत्किंचित्प्रमाणमेवाथ तदर्शयति
प्रत्यक्षादीत्यनेन कश्चित्पक्षे सत्प्रतिपक्षताणेचेतिपाठः तत्र बलवत्त्वम् अप्रामाण्यज्ञानानास्कन्दितत्वं प्रमावोध्य
पर्वतो वह्न्यभाववानिति वाध्यस्तेपि ज्ञानमप्रमेत्यप्रामाण्यज्ञानं तस्येत्यनुमिति उदयात् बलवत्प्रमाणविरोधेन

हयोस्तुल्यत्वमेव लक्षणयोजयति तस्यैवेति के
उदाहरति यथेति अत्र कृतकत्वादित्यत्र व्याप्तिमत्के पदार्थत्वादितिहेतुर्थसाहयो ... अपरोधाति तस्याभावइति इदं च चरमशब्देन
गो. तत्प्रत्यक्षेणत्यपेक्षायामाह त्वगिन्द्रियेणेति श्रुत्वा ति वृक्षेय उदाहरणान्तरमाह अप्रत्यभिज्ञापक्षे पक्षलाक्षणिकत्वाभावग्र
९३ हणीकत्वप्रसिद्धिरस्तीतिमते अन्यथा लाक्षणिकत्वस्याप्रसिद्ध्या तदभाववस्य दासंभव्य प्रत्यभिज्ञापक्षे ... तिलायकं ग्रहणत्व
103 णीकत्वप्रसिद्धिरस्तीतिमते अन्यथा लाक्षणिकत्वस्याप्रसिद्ध्यातदभावग्रहासंभव ... लौकिकपराभावाद्विशेषतोविशिलायकं ग्रहणत्व
हेतुत्यतस्त्राह सपक्षायमिति ननु सपक्षेत्यत्र तत्कालसत्वं यत्रुपायास्तत्वायाः सन्निकर्षाभावा ... तज्जन्यस्मृति
पेक्षायामाह पूर्वानुभवेति तथा च तद्देशे उपनीतभानरूपतेतिभावः भेस्काले ... पूर्वापरौकालौ यस्यासौ स्थिरपदा
परम् सविषयकमात्रस्यैवप्रत्नामतिनमतामिप्रायकं वा प्रकृतोपयोगपर्यमाह पूर्वापरौ कालौ यस्यासौ स्थिरपदा
यथाऽग्निरस्तुः कृतलवत अत्र कृतकत्वं हेतुस्तु सचयत साध्यमनुस्तुत्वं तस्याभावः प्रत्यक्षेणावपरिच्छिन्नः
त्वगिन्द्रियेणाग्ने रुष्णत्वपरिच्छेदात तथापरोपिकालात्यथा पदिष्टः यथा यस्य लाक्षणिकत्वमाध्येप्रागुक्तेस
तद्धेतुः तस्यापियत्साध्यं लाक्षणिकत्वं तस्याभावोऽलाक्षणिकत्वं प्रत्यभिज्ञालक्षणेन प्रत्यक्षेणापरिच्छिन्नस सपक्षायं
घटोमयाएवमुपलब्धइति प्रत्यभिज्ञया पूर्वानुभवजनितसंस्कारसहकृतेन्द्रियेणग्रभवया पूर्वापरकालकलनया
घटस्यस्थापित्वपरिच्छेदादिति एतेअसिद्धादयः पंचहेत्वाभासा यथायथं पदत्वमं त्वादिरूपहीनत्वाद्धेतवः
स्वसाध्यंनसाधयंति येहिलक्षणास्केवलव्यतिरेकिहेतोस्त्रयोदोषाश्रुतिः आत्मसंभवा स्तेपत्रैवान्तर्भवन्ति
नत्वपंचभ्योधिकाः तथाहि ॥ प्रोस्यमतयात्सकलनेविषयीकरणायसाः साप्पूर्वापरकालकल
नातयेत्यर्थः पूर्वकालवृत्याभिन्नोत्तरकालवृत्तिपदार्थविषयिणीति यावत् स्यापितेति अतकदा ... वृत्तित्वपर्यः तथा
चघटोनेकक्षणस्थायीत्यवबुद्धिरित्यानरकालिकोमानसोबोधइतिभावः तेनानेकक्षणावस्थायित्वस्यलाक्षणिकत्वाभासानां
प्रयोजनमपिदर्शयति एतइति आप्यातमादौ स्वसाध्यमिति एतेनासाधकतासाधनद्वाराहेत्वाभासानानत्वनिर्णा ९३
योविजयोवाप्रयोजनमितिदर्शितम् असाधकतासाधनं च वन्हिर्धूमासाधकस्तद्व्यभिचारित्वादित्यादिरीत्यावाच्यत
लक्षणात्मककेवलव्यतिरेकिहेतुदोषाणामितेष्वेवान्तर्भावोनाधिक्यमितिदर्शयति येहीति ॥

व्याप्यत्वासिद्ध इति साधारणानैकान्तिकोऽपि व्याप्त्यभावं दर्शयति विपक्षादिति इदं च संभवति सपक्षवृत्त्यादिना साधारणेऽप्युक्तव्या
प्त्यभावप्रदर्शनमत्र नौपाधिकसंबंधरूपव्याप्त्यभावं दर्शयति सोपाधीति गोलक्षणस्येति गोलक्षणाख्ये नाभिमतस्य साध्यः एवमग्रेऽपि प
शुत्वादेर्वास्तवगोलक्षणत्वाभावात् सोपाधिकत्वं दर्शयति गोत्व इति साधनीय इति शेषः प्रयोजके समनियतत्वमित्यर्थः तद्व्याप्तिरिति
प्राक् प्रतिपादिते तथा चायं गोः पशुत्वादिमत्त्व सास्नादिमत्त्वमुपाधिरिति भावः शावलेयत्वस्येति शावल्याश्रयस्य शावलेयः तदन्यथा बाले
याद्युपन्नीय तत्राव्यवृत्तित्वाद्भागासिद्धमित्यर्थः एकेति एकशफत्वमेकावरत्वं तत्र व्याप्याद्वृत्तिः गोर्द्विशफमेव भवति यदेतेन विरुद्धत्वमेकश
फत्वस्येति एवं विरुद्धमपि बोध्यम् इदं तु वर्ण्यम् लक्षणादेर्दोषोपन्यासदशायामतिव्याप्त्यादिव्यवहारः हेतुदोषोपन्यासकाले तु व्यभिचारादि
प्राह प्रयोग इति छलपदार्थं लक्षयति अभिप्रायान्तरेणेति वक्तृतात्पर्यविषयशब्दार्थमात्रदूषणं छलमित्यर्थः यत्र तात्पर्यविषयीभूतमुक्तया

अनित्यानित्योऽप्यतासिद्धः विपक्षाद्व्यावृत्त्यभावात्सोपाधिकत्वाच्च यथा गोलक्षणस्य पशुत्वस्य गोत्वे सास्नादिमत्त्वं प्रयोजकं न पशुत्वं
तथाऽव्याप्तिर्भागासिद्धः यथा गोलक्षणस्य शावलेयत्वस्य एवमसंभवोऽपि स्वरूपासिद्धः यथा गोलक्षणस्य एकशफत्वस्येति अभि
प्रायान्तरेण प्रयुक्तस्यार्थान्तरं प्रकल्प्य दूषणाभिधानं छलम् यथा नवकंबलोऽयं माणवक इति वाक्ये नूतनाभिप्रायेण प्रयुक्तस्या
र्थान्तरमाशंक्य कश्चिद्दूषयति नास्य नव कंबलाः सन्ति दरिद्रत्वात् ॥ ॥

मतं च विकल्प्य दूष्यते तत्रानिष्टारणायमात्रपदम् यथा आढ्योऽयं नवकंबलोपविष्टत्वादिति प्रयुक्ते कश्चिद्दूषयति न च पदं चेन्नूतनपरं मत
परकीयत्वं तत्र केवलोपविष्टेऽसिद्धव्यभिचारः संख्यापरं चेत्तदा एककंबलोपविष्टत्वमसिद्धमित्यादिस्थले तात्पर्याविषयकपदार्थदूषणे
पि न छलत्वमिति बोध्यम् यत्रानुक्तेऽपि नयेदमुक्तमित्युच्यते तत्र न छलं किंतु तस्याननुभाषणाख्यनिग्रहस्थानम
त्यर्थं तु भावः छलं त्रिविधम् वाक्छलं सामान्यछलमुपचारछलं चेति तत्रैकशक्त्यार्थान्तरपर्यवसायिशब्दस्य कल्पितार्थान्तरलक्षणा वाक्छलत
त्र द्विविधे कल्पितार्थान्तरस्य शक्यलक्ष्यभेदात् तत्रैकशक्यार्थतात्पर्यकस्य शब्दस्य तदशक्यार्थं लक्ष्य दूषणोदाहरणं दर्शयति यथेति अत्र
नवशब्दस्य नूतनरूपशक्यार्थतात्पर्यकस्य कल्पिते शक्यार्थतात्पर्यकथानात् शक्यान्तरकल्पनेन शक्यान्तरे तात्पर्यविषयत्वकल्पनम् एव
मग्रेऽपि इदं च नानार्थकशब्दस्थल एव संभवति ॥

॥ ॥ ॥

प्र॰ ९४ 104 शिवमपीति केवलगतमिति शेषः तेनास्य केवलदयमपि न विभाव्यत इत्यर्थः तादृशस्यैव दशकस्य कल्पनिकलक्षणार्थदूषणरूपद्वितीयवाक्छलमु
दाहरणं तत्पीतो गुण इत्यत्र पीतपदस्य शक्यार्थरूपतात्पर्यस्य लक्ष्यार्थरूपत्वमारोप्य कस्यादूषयति पीतस्य द्रव्यत्वमेव न गुणत्वमिति एकस्मात्
तात्पर्यकस्य संसर्गान्तरकल्पनया दूषणं सामान्यछलं यथा ब्राह्मणो विद्येति संभवाऽयकस्यवाक्यस्य तियमपरोऽप्रकल्प्यादूषयति न युक्तमे
तत् सर्वो ब्राह्मणमपि ब्राह्मणानां दर्शनादिति लाक्षणिकार्थतात्पर्यकस्य शक्यसार्थान्तरकल्पनया दूषणमुपचारछलं तदपि द्विविधं कल्पितार्थान्त
रस्य शक्यलक्ष्यभेदात् यथा गंगायां घोष इत्यत्र लक्ष्यार्थतीरतात्पर्यके मुख्यार्थदूषणं कथं जले घोष इति प्रथमस्य द्वितीयं तु केवलादिणिका
यां नरमत्स्यादिपतया दूषणं कथं वा गंगासंबंधिनि तत्स्थाने घोषवासः संभवतीति छलस्य प्रयोजनमाह इदंवेति छलोद्भावनाद्विजयः प्रयो
जनमिति भावः जातिपदार्थं लक्षयति असदुत्तरमिति असत्वं तु जात्युत्तरस्य स्वासाधकतासाधारण्येन परासाधकतासाधकतया स्वव्याघा
तकत्वात् तथा च स्वव्याघातकमुत्तरं जातिलक्षणं पर्यवतीति हेत्वाभासातोपरकीयहेतावेवासाधकतासाधकत्वेन सदुत्तरत्वमेव सत्प्रतिपक्ष
स्य चात्र प्रकरणसमजातिरूपतया लक्ष्यत्वमेव तदवान्तरभेदाः कतीत्याकांक्षायामाह सा चोत्कर्षेति यद्यपि सूत्रे साधर्म्यसमादिप्रक्रमेणैवा
नोत्कर्षसमादिप्रक्रमेणेति तथैव वक्तुं युज्यते तथाप्युत्कर्षसमजातेर्लक्षयितुमिष्टत्वात्तत्क्रमेणैव कथनम् अन्यथा साधर्म्यसमादिरुक्तो

नत्वस्य हि तमपि संभाव्यते उक्तोऽस्य नवेति सच वादीच्छलवादितया जीयते असदुत्तरं जातिः स चोत्कर्ष
समादिभेदेन वहुविस्तरभयान्नेह कृत्स्नोच्यते ॥ ॥ ॥

नासौ लक्षणं विनाऽपत्कर्षसमजातेर्लक्षणकरणे संदर्भविरोधापत्ते बहुविधेति चतुर्विंशतिभावः तास्वयथा साधर्म्यसमा उत्कर्षसमा वाण्यसमा
ऽवर्ण्यसमा विकल्पसमा साध्यसमा प्राप्तिसमा ऽप्राप्तिसमा प्रसंगसमा प्रतिदृष्टान्तसमा ऽनुत्पत्तिसमा संशयसमा प्रकरणसमा ऽहेतुसमा ऽर्थापत्ति
समा ऽविशेषसमा उपपत्तिसमा उपलब्धिसमा ऽनुपलब्धिसमा ऽनित्यसमा नित्यसमा कार्यसमा इति चतुर्विंशतिजातयः सूत्रोक्ताः आसां संक्षेपेणोदाहरणमात्रं प्रदर्श्यते
साधर्म्येणाध्यापनाद्धेतुदूषकमुत्तरं साधर्म्यसमा यथा आत्मा सक्रियो हेतुगुणवत्त्वात् लोष्टवत् क्रियाहेतुगुणश्चात्र शरीरादिक्रियाजनक
वायुसंयोगादिरेवेति स्थापनायामुत्तरम् यदि सक्रियसाधर्म्यात्सक्रियस्तदा विभुतद्रूपान्निष्क्रियसाधर्म्यान्निष्क्रिय एव किन्न स्यात् न चात्र किंचिद्विनिगम
कमस्तीति साधर्म्यसमा जातिरिति वैधर्म्येण दूषकमुत्तरं वैधर्म्यसमा यथा तत्रैव क्रियावतो लोष्टस्य साधर्म्यात् क्रियावानात्मा तदा द्वि
भुत्वरूपतद्वैधर्म्यान्निष्क्रिय एव किन्न स्यात् न हि तस्मात्क्रियावता भवितव्यम् तद्वैधर्म्यान्निष्क्रियेणाभवितव्यमित्यत्र किंचिद्विनिगमक ॥ ॥ ९४
मस्तितदिदं वैधर्म्यसमा जातिः ॥ ॥

उत्कर्षसमजातिलक्षयतिंये यत्कारस्तत्वेस्यादिना अव्याप्तेनेसाध्यमिथान प्रमहुतरतासिद्धं चे व्याप्तेनेसकारस्यपाठे वायुक्तसाध्ययुक्तेनेत्य
र्थः एवमग्रेपि साध्यइति साध्यतेः तु मीयते साध्यमस्मिन्निति व्युत्पत्त्या साध्यपदेत्यर्थः तथाच वायुत्वदृष्टान्तसाधर्म्यात्तद्वायवमिमवय
साध्यनमुत्कर्षसमजातिरित्यर्थः तेनेवति कृतकत्वेनहेतुना साधर्म्येणेत्यर्थः तद्दोरेव घटवादेवमर्थः सावयवः स्यादिति यदसाध्यस्याहृद
वदनित्यत्वेसिध्यति सावयवत्वेनसिध्यतात्तत्र नियामकाभावादितिभावः अपकर्षसमालक्षयति दृष्टान्तगतेति अव्यापकस्येति पूर्ववदमृडः
नतत्वार्थेवायुत्वदृष्टान्तसाधर्म्येणापत्तवाद्यभिमतधर्मालक्षस्याभावसाधनमपकर्षसमजातिरितिपर्यवसन्नम् तेनेवति कृतकत्वेनेत्यर्थः
अप्रावरणेन नस्यादिति श्रवणेन्द्रियजन्यप्रत्यक्षविषयेण नस्यादित्यर्थः वर्ण्यसमस्थापनीयस्य दृष्टान्तधर्मस्य पदे साधनेवर्ण्यसायथापूर्वोक्तानु
सानेलोष्टगतोनोदनोत्संयोगादिरूपः क्रियाहेतुगुणोस्तीति भवतु तस्य क्रियावत्त्वे आत्मनस्तु तदक्रियावत्त्वेन तद्धनोत्संयोगादवमपि

नत्राव्याप्तेन दृष्टान्तधर्मेण साध्ये व्यापकत्वस्य धर्मस्यापादनमुत्कर्षसमजातिः यथा शब्दोनित्यः कृतकत्वाद्घटवदिति प्रयुक्ते कश्चि
दाह यदि कृतकत्वेन हेतुना घटवत्शब्दोऽनित्यः स्यात्तर्हि तेनैव तद्वदेव शब्दः सावयवः स्यात् दृष्टान्तगतेन धर्मेणाव्यापकस्या
पादनमपकर्षसमजातिः यथापूर्वस्मिन्नेवानुमाने कश्चिदाह यदि कृतकत्वेन हेतुना शब्दोनित्यो न स्यात् तर्हि तेनैव हेतुनाश
ब्दोघटवच्छ्रावणो न स्यात् नहि घटोपि श्रावण इति ॥

स्यात् नतद्धत्वमिति नक्रियावत्त्वम् तद्वत्सक्रियत्वे तत्तु नोदनादिमत्त्वमित्यत्र नियामकाभावादिति वर्ण्यसमजातिः साध्यहेत्वोर्द्वयोरपिप
वोतुल्यतासाधनमवर्ण्यसमजातिः यथात्रैवानुमाने लोष्टादिगतनोदनादिरूपक्रियाहेतुगुणवत्त्वमात्मनि सिद्धं नास्ति तथाच तस्य
नयाऽसिद्धेन क्रियाहेतुगुणेन क्रियावत्त्वं साध्यते तथा सिद्धेन क्रियावत्त्वेन क्रियाहेतुगुणवत्त्वं किमिति न साध्यते नियामकाभावादित्यव
र्ण्यसमजातिः दृष्टान्ते विकल्पप्रदर्शनाद्दार्ष्टान्तिकविकल्पने विकल्पसमजातिः यथात्रैवानुमाने क्रियाहेतुगुणयुक्तं किंचिद्विभुर्भवति
यथा लोष्टादिकं किंचिल्लघु भवति यथा वायुः एवं क्रियाहेतुगुणयुक्तं किंचित् क्रियावत्सास्ति यथा लोष्टादिकं किंचिदक्रियं यथा आत्म
नित्यत्वोके विकल्पो भवति अयंतु न भवतीत्यत्र नियामकं वाच्यमिति दृष्टान्तस्य पक्षतुल्यताकथनं साध्यसमजातिः साध्यशब्दोत्र पक्षवाची
यथात्रैव यदि यथा लोष्टस्तथात्मेति तर्हि यथात्मा तथा लोष्ट इत्यागतं तथाच यथात्मनि क्रियावत्त्वं साध्यते लोष्टेपि तर्हि तत्साधनीयं नो
तेनहिं यथा लोष्टस्त ॥

यात्मेति न वाच्यम् लोष्टसहशस्यात्मा सहशो न लोष्टस्य तत्र नियामकाभावादिति साध्यसमा जातिः प्राप्त्याप्राप्तसमवस्थाने प्राप्तिसमा जातिः
प्राप्तिश्च हेतोः साध्यसामानाधिकरण्यम् यथा तत्रैव क्रियाहेतुगुणवत्वं यदि साध्यसामानाधिकेवाच्यम् यथा चोभयोरपि सिद्धत्वाविशेषा
त्क्रियाहेतुगुणवत्वेनैव किमिति क्रियावत्वसाधने क्रियावत्वेन क्रियाहेतुगुणवत्वं किं न साध्यते नियामकाभावादिति प्राप्तिसमा जातिः
अप्राप्त्या प्रत्यवस्थानमप्राप्तिसमा जातिः यथा तत्रैव हेत्वीक्तदोषादसामान्यस्य हेतोः साध्यसाधकत्वे वाच्यम् तथा चाप्राप्तत्वाविशेषात्सर्वं
सर्वं साधयेदित्ययमेव हेतुः साध्याभावं किमिति न साधयेत् साध्यमेव साधयेदित्यत्र नियामकाभावादित्यप्राप्तिसमा जातिः साधनपरं
पराप्रश्नः प्रसंगसमा जातिः यथा क्रियावत्वे क्रियाहेतुगुणवत्वं साधनं तत्र किं साधनं तद्धि साधनं विना कस्यचित्सिद्धिरस्ति एवं तत्रापि
किं साधनमित्यनवस्थापाता इति प्रसंगसमा जातिः दृष्टान्तेनेतरेण साध्याभावसाधनं प्रतिदृष्टान्तसमा जातिः यथा तत्रैव लोष्टान्तेन क्रियावत्वे सा
धिते क्रियाहेतुगुणयुक्तमाकाशं निष्क्रियं दृष्टमिति तद्दृष्टान्तेनात्मनो निष्क्रियत्वमेव किं न तस्मात् लोष्टदृष्टान्तेन सक्रियत्वमाकाशदृष्टान्तेन निष्क्रि
यत्वमित्यत्र नियामकाभावादिति दृष्टान्तसमा जातिः अनुत्पत्त्या प्रत्यवस्थानमनुत्पत्तिसमा जातिः यथा शब्दोऽनित्यः प्रयत्नानुविधायित्वात्
घटवदित्युक्ते कश्चिदाह प्रयत्नानुविधायित्वं यद्यनित्यत्वे प्रमाणं तदा शब्दस्योत्पत्तेः पूर्वं तदभावान्नित्यत्वे नित्यत्वेन तदा नुमन्यएवेमनुत्पत्ति
समा जातिः उभयसाधारणधर्मप्रदर्शनपूर्वं साध्यसंशयोद्भावनं संशयसमा जातिः यथा पूर्वानुमाने शब्दस्यानित्येन घटेन सह प्रयत्नानुवि
धायित्वरूपे साधर्म्ये यथा नित्येन सामान्येन शब्दत्वेन सामान्यसह श्रावणप्रत्यक्षविषयत्वं साधर्म्यमस्तीत्युभयसाधर्म्यदर्शनादुभयज्ञानं दृष्ट्वा
संशयः एकपरिशेषे नियामकाभावादिति संशयसमा जातिः वादुक्तहेतोः साध्यविपरीतसाधके हेत्वन्तरोद्भावने प्रकरणसमा जातिः स
त्प्रतिपक्षोदाहरणं वाच्यमिति प्रकरणसमा जातिः कालत्रयेऽपि हेतुतासंभवेनाहेतुत्वकथनमहेतुसमा जातिः प्रयत्नानुविधायित्वं
शब्दस्य पूर्वकालवृत्ति चेत्तदा शब्दानित्यत्वरूपसाध्यस्य तदानीमभावात्कस्य साधकम् अथ यदि पश्चात्कालवृत्ति तदा पूर्वकाले सा
धनाभावात्कस्य साध्ये शब्दानित्यत्वम् यदि च सहैककालवृत्ति तदा किं कस्य साध्यमिति नियामकाभावाद्धेतुरहेतुतामसमर्थहेतु
समा जातिः अर्थापत्तिपुरस्कारेण साध्याभावोद्भावनमर्थापत्तिसमा जातिः यथा पूर्वोक्तानुमाने शब्दस्यानित्यसाधर्म्यादनित्यत्वं यदि
तदार्थापत्त्या सिद्धं नित्यसाधर्म्यान्नित्यत्वमपि अस्ति च शब्दस्य नित्यसाधर्म्यममूर्तत्वमित्येकावधारणे निया ॥

॥ ॥ ॥ ॥

मकाभावादित्यर्थापत्तिसमा जातिः सर्वाविशेषप्रसंगोद्भावनमविशेषसमा जातिः यथा तत्रैव यत्नानुविधायित्वेना-
नित्यघटसाधर्म्येण शब्दस्यानित्यत्वे प्रमेयत्वादिरूपेण तर्हि सर्वं वानित्यं स्यादिति सर्वाविशेषप्रसंगः तदुक्तं साधर्म्य-
णानित्यत्वमायातीति यदुक्तं तन्नेत्यत्र नियामकाभावादित्यविशेषसमा जातिः उभयसाधनोपपत्तिकथनमुपपत्तिस-
मा जातिः यथा तत्रैव यदि चानित्यतासाधनं प्रयत्नानन्तरीयकत्वमुपपद्यते इति शब्दस्यानित्यत्वं तदा नित्यत्वसाधनम-
स्पर्शत्वमुपपद्यते इति नित्यत्वं किं न स्यादित्युपपत्तिसमा जातिः वाद्युपदर्शितसाधनाभावेपि साध्यस्योपलब्धिस-
मा जातिः यथा तत्रैव प्रयत्नं विनापि वायुनोदनवशाच्छाखाभंजजन्यस्य मटिति शब्दस्योपलब्धेः प्रयत्नानुविधायित्वं शब्दे
नास्तीत्युपलब्धिसमा जातिः वादिनानुपलब्धिवशात्कस्यचित्पदार्थस्यानंगीकारेनुपलब्धिवद्वाद्यभिमतस्यापि किंचि-
त्पदार्थस्याभावसाधनमनुपलब्धिसमा जातिः यथोच्चारणात्पूर्वं शब्दस्य विद्यमानस्याप्यावरणवशान्नोपलब्धिः यथा
जलादेर्विद्यमानस्याप्यावरणवशादनुपलब्धिस्तद्वत् एतन्मतं वादिना दूष्यते यथावरणवशाच्छब्दो नोपलभ्यते तदा ज-
लाद्यावरणादिकमिव प्राक्शब्दावरणमप्युपलभ्येतेत्यत्रोत्तरं यदि भवद्भिरनुपलब्धितश्चावरणवशाच्छब्दो नोपल-
भ्यते तदानुपलब्धेरप्यनुपलब्ध्याभावसिद्धेस्तस्मादावरकाभावासिद्धावावरकसिद्धिरित्यनुपलब्धिसमा जातिः अ-
नित्यदृष्टान्तसाधर्म्यात्सर्वानित्यत्वप्रसंगोद्भावनमनित्यसमा जातिः यथा तत्रैव शब्दानित्यतानुमाने यदि कश्चिदनित्ये-
न घटेन सादृश्याच्छब्दोऽनित्य उच्यते तदा घटेन केनचिद्धर्मेण सर्वस्यैव तत्सादृश्यात्सर्वस्यानित्यत्वप्रसंग इत्यनित्यसमा
जातिः धर्मस्य नित्यत्वानित्यत्वविकल्पाद्धर्मिणोऽनित्यत्वसाधने नित्यत्वसाधनं नित्यसमा जातिः यथा शब्दस्य
यदनित्यत्वं भवद्भिरुच्यते तन्नित्यमनित्यं वा यदि नित्यं तदा धर्मवृत्तेरेव तस्य सदा तत्त्वाच्छब्दस्यापि तथात्वमागतम्
अथ तदनित्यं तदा शब्दे कदाचिदनित्यत्वस्याभावो स्तीति नित्यत्वप्राप्तमुभयथापि शब्दस्य नित्यत्वमेवेति नित्यसमा
जातिः वाद्युक्तहेतुरन्यकार्यस्यापि संभवाभिधानं कार्यसमा जातिः यथा तत्रैव प्रयत्नानुविधायित्वमुभयथापि संभ-
वति प्रयत्नात् घटादिवत्स्वरूपोत्पत्तौ जलादिवदावरकनिवृत्तौ वोभयथापि प्रयत्नानुविधानदर्शनात्
तथा च तस्यावरकनिवृत्तिरूपप्रयत्नकार्यस्य संभवात्त्रानियतत्वमिति कार्यसमा जातिः आसामसदुत्तरजातीनामस-
दुत्तरेणोद्भावनादिप्रकाराः ग्रन्थगौरवभयान्न प्रदर्शिताः परिशिष्टपंचमतन्त्रमतत्व[illegible]यादावभियुक्तैरनुसंधेया इति ॥

गो०
१०६
106

निग्रहस्थानपदार्थं लक्षयति पराजयहेतुरिति यत्खलु वादिपराजयलक्षणं पराजयव्यवहारजनकीभूतनिश्चयवि
षयत्वं वा निग्रहस्थानत्वं इदं च यद्यपि छलादावप्यस्ति तथापि तेषामर्थान्तरादिरूपनिग्रहस्थानमध्येऽन्तर्भावाद
दोषः छलादिना ज्ञानसंयोगितात्पृथगुपादानं हेत्वाभासवत् तत्रावान्तरभेदजिज्ञासायां बालबुद्धव्युत्पत्त्युपयोगि
यत्किंचिदवान्तरभेदं निर्दिशति तच्च न्यूनेति बहुविधमिति द्वाविंशतिप्रकारमित्यर्थः तथाहि सूत्रं प्रतिज्ञाहा
निः प्रतिज्ञान्तरं प्रतिज्ञाविरोधः प्रतिज्ञासंन्यासो हेत्वन्तरमर्थान्तरं निरर्थकमविज्ञातार्थमपार्थकमप्राप्तकालं न्यूनमधिकं पुनरु
क्तमननुभाषणमज्ञानमप्रतिभा विक्षेपो मतानुज्ञा पर्यनुयोज्योपेक्षणं निरनुयोज्यानुयोगोऽपसिद्धान्तो हेत्वाभा
साश्च निग्रहस्थानानीति तत्र स्वप्रतिज्ञातार्थविरुद्धाभ्युपगमः प्रतिज्ञाहानिः यथा शब्दोऽनित्यः ऐन्द्रियकत्वात् घट

पराजयहेतुर्निग्रहस्थानम् तच्च न्यूनाधिकापसिद्धान्तार्थान्तराप्रतिभामतानुज्ञाविरोधादिभेदाद्बहुविधम
पि विस्तरभयान्नेह कृत्स्नमुच्यते ॥

वदितुः कोऽपि प्रतिवादी प्रत्यवतिष्ठते ऐन्द्रियकं सामान्यं नित्यं दृष्टमिति तद्वच्छब्दो नित्य एव किं न स्यादिति तत्र वाद्युज
र्यदि ऐन्द्रियकत्वात्सामान्यं नित्यं तदोऽपि नित्योऽस्त्विति एतेन साध्यसाधकस्य दृष्टान्तस्य नित्यत्वमङ्गीकुर्वता पक्षस्या
नित्यत्वप्रतिज्ञां जहातीति इयं च पञ्चधा भवति पक्षत्यागः साध्यत्यागः हेतुत्यागः दृष्टान्तत्यागः तद्विशेषणत्यागश्च
यथा शब्दोऽनित्यः प्रमेयत्वगुणत्वादित्यत्र साध्यशब्द इति प्रत्यभिज्ञाबलात्परेण बाधे उद्भाविते अस्तु तर्हि घटोऽनित्य इ
ति पक्षपरित्यागः पूर्वोक्तदोषात् नित्य एव शब्द इति स्वीकारे साध्यपरित्यागः शब्दोऽनित्यो द्रव्यत्वादित्युक्ते परेण
स्वरूपासिद्धोऽयमिति दूषिते कृतकत्वादिति पुनर्हेतुप्रयोगे हेतुत्यागः दृष्टान्तत्यागोऽप्येवमुदाहर्तव्यः इत्यात्मकः शब्दो
नित्यत्वस्याश्रयासिद्धेरुद्भावने अस्तु तर्हि शब्दो नित्य इति पक्षविशेषणत्यागः एवं साध्यविशेषणत्यागादिरपि वाच्यः
पूर्वोक्तप्रतिज्ञायां हेतुं विनाऽपि तत्र विशेषणान्तरदानं प्रतिज्ञान्तरम् तच्च द्विविधं पक्षविशेषणदानात् साध्यविशेषणा १०६

नेवर्णोत्रूपेतिपक्षविशेषणादानम् अन्यथा यथाऽऽदित्यादिकं गुणाजन्यं कार्यत्वादित्यत्राहष्टजन्यत्वेन सिद्धसाधनोऽग्ना
वनेस्वविषयकेतिगुणादानम् प्रतिज्ञाहेत्वोर्विरोधः यथा द्रव्यं गुणाभिन्नं रूपादितः स्वयं प्रतिज्ञातार्थापनयः प्र
तिज्ञासंन्यासः यथाऽनित्यः शब्दः ऐन्द्रियकत्वादित्युक्ते परेण सामान्ये व्यभिचारमुद्भाव्य दूषिते स्वोक्तमपनयति के
नोच्यतेऽनित्यः शब्द इति अत्रापनयश्च द्विविधो भवति क एवमाहेत्येकः परमतानुवादोऽयं मयोक्तो नहि इति द्वितीयः
स्वयमुक्तेऽपि तथैवोक्तमिति तृतीयः परोक्ते मयेदमेवोक्तमिति चतुर्थः उक्तहेतौ दूषिते तद्विशेषणान्तरोपा
दानं हेत्वन्तरम् यथा शब्दोऽनित्यः प्रत्यक्षत्वादित्यत्र सामान्ये व्यभिचारमुद्भाव्य दूषिते जातिमत्त्वे सतीति विशेष
णादानम् प्रकृतानुपयुक्तार्थकथनमर्थान्तरम् यथाऽनित्यः शब्दोऽस्पर्शवत्त्वादिति हेतुः हेतुपदं च हिनो
तेस्तुनि प्रत्यये कृदन्तं यदंच तु ...न्तमित्यादि अवाचकवर्णप्रयोगो निरर्थकम् यथाऽनित्यः शब्दः कच
टतपानां जबगडदशत्वात् झभञघढधषवदिति अथवा यत्रासाधुत्वं तन्निरर्थकम् यथा शब्दमनित्यादि वादिना वारत्रय
मुक्तमपि यत्प्रतिवादिना सदस्यैरपि न बुध्यते तदविज्ञातार्थम् तच्च श्लिष्टान्वयम् सिद्धार्थकत्वरितत्वादनेकमिमा
दिरूपम् स्वासामर्थ्यसंवरणार्थं प्रयुक्तमिति परस्परानन्वितार्थपदसमूहोऽपार्थकम् यथा शब्दः शब्दत्वं घटः
यद्वो वाऽनित्यमनित्यमनित्यं च प्रत्ययेत्याक्षिप्यादि अवयवानां व्युत्क्रमेण कथनमप्राप्तकालम् यथा शब्दत्वाद्
द्वोऽनित्य इत्यादि स्वसिद्धान्ततानामवयवानां मध्ये यत्किंचिदेकस्यावचनं न्यूनम् अनिर्वितानुपयुक्तमभिन्नस्या
सिद्धप्रयोजनस्य पुनःकथनमधिकं हेतूदाहरणाधिक्यमिति वा यथाऽनित्यः शब्दः श्रावणत्वात् प्राप्तता
हेत्वादि एवमुदाहरणद्वयेऽपि वाच्यम् अनुवादं विना शब्दार्थयोः पुनःकथनं पुनरुक्तं यथाऽनित्यः शब्द इति।
शाब्दपुनरुक्तम् नित्यः शब्दोऽनित्यः प्रतियोगी वेत्यर्थपुनरुक्तम्
ननुवादोऽननुभा ॥ वादिना त्रिरुक्तस्य सदस्यैर्विज्ञातार्थवाक्यस्या

१०७ 107

षणम् इदं पंचविधं भवति यत्तदित्यादिसर्वनाम्नानुवादः विपरीतानुवादः अननुवादं विना दूषणाववने स्तोभो वेति मदस्येन्नीत
स्ववादिनान्विहृतस्य वाक्यार्थस्यावबोधोऽज्ञानम् अनूदितेवादिवाक्ये विज्ञातेपि तदर्थमुत्तरास्फूर्तिवशात्तूष्णींभावोऽप्रतिभा वि
लंबासहकार्यांतरव्यासंगमुत्पाद्य कथाविच्छेदो विक्षेपः यथा इदं मे कार्यं नितत्कृत्वाऽवशिष्टं कथयिष्यामीति स्वप
क्षे तद्दोषाभ्युपगमात् परपक्षे दोषप्रसंजनं मतानुज्ञा यथा त्वं चोर इत्युक्ते त्वं चोर इत्यादिकम् वादिनो निग्रहस्थाने
सत्येपि प्रतिवादिना तदनुद्भावने पर्यनुयोज्योपेक्षणम् इदं च कपराजयकृति प्रष्टोसदस्यैर्वाच्यम् ननु वादिनोद्भावनस्य
दोषस्य स्वयमुद्भावनानौचित्यात् भावात् निग्रहे निग्रहाद्भावने निरनुयोज्यानुयोगः छलजात्यादिरेतन्मध्ये च लभ्य
वः एकं सिद्धांतमाश्रित्य कथाप्रवृत्तौ तद्विरुद्धसिद्धांतमवलंब्यान्तरवाक्यं अपसिद्धान्तः यथा इदं कृत्स्नमजं जगदेकप्र
कृतिविकारत्वात् एकस्मात् सिद्ध प्रकृतिकशरावादिवदिति साधनमनमत्र्यमतप्रयुक्ते का प्रकृतिः को विकार इति प्र
तिवादिना पृष्टे यस्मिन्नवस्थिते धर्मिणि एकधर्मे निवृत्ते धर्मान्तरमुत्पद्यते सा प्रकृतिः यो धर्मो निवर्त्तते उत्पद्यते
च स विकार इत्युत्तरमपसिद्धान्तः नन्वसतः उत्पत्तिर्नास्ति किन्तु आविर्भावतिरोभावमात्रं कार्यकारणयोर
भेदः कारणरूपेण सूक्ष्मतया अवस्थानं तिरोभावः कार्यरूपेण स्थूलतया अवस्थानमाविर्भाव इति सत्कार्यवादि
मते प्रकृतिविकारयोर्भेदाभावादनुपपन्नं नश्यति उत्पद्यते च असतः कार्यतावादे त्वपसिद्धान्त इति हेत्वाभासलक्षणं तु प्रा
गुक्तम् एतानि च सर्वाण्येव संभवन्ति वितंडयोरुद्भावनीयानि कथाविच्छेदकत्वात् वादकथायां तु
एषां वाद्बर्विधं केषांचित् संभवः केषांचिदनुद्भावनीयत्वं केषांचिदुद्भावनीयत्वं केषांचित् कथाविच्छेदकत्वात्
तत्र प्रतिज्ञाहानिः प्रतिज्ञासंन्यासः निरर्थकं अविज्ञातार्थकं अपार्थकं अर्थान्तरं चेति षट्कं वादे न संभव यद्यपि भ्रान्त्या प्रतिज्ञा
हान्यादिकं संभाव्यते तथापि स्वाभाविकगोपनार्थानां सर्वेषामसंभावनेति सांप्रदायिकाः तथा प्रतिज्ञान्तरहेत्वन्तर
मरणज्ञानमप्रतिभा विक्षेपो मतानुज्ञापर्यनुयोज्योपेक्षणानि सप्तकं वादे संभवदपि नोद्भावनीयम् विजयमात्रैकफ
लकत्वात् तथा प्रतिज्ञाविरोधोऽप्राप्तकालं न्यूनमधिकं पुनरुक्तमननुभाषणमपसिद्धान्तः एतत्सप्तकं वादे उद्भावनी

गौ.
१८
108

सोऽक्रान्तो लक्षणानि निर्देशयति तत्रेत्यादिना अस्यानुपदर्शितस्यालक्षणानामभेदेषः सिद्धान्तादिति अपध्वंसः अपसिद्धान्तः स्वसिद्धान्त
कथने स्वप्रतिकूलस्येति स्वदोषस्येत्यर्थः प्रतिज्ञाविरोधं लक्षयति इष्टार्थस्येति स्वयमुक्तप्रतिज्ञाहेत्वादेरित्यर्थः भङ्गो मिथो विरोधः विरो
धयतीति प्रतिज्ञाविरोध इत्यर्थः ननु पूर्वं षोडशपदार्थनिरूपणं प्रतिज्ञातं तत्र केषांचित् प्रमाणादीनामशेषविशेषवतो निरूपणं कृतं केषां
चिच्छलजातिनिग्रहस्थानानामवान्तरभेदबाहुल्येऽपि किंचिद्विशेषस्यैव निरूपणं कृतमिति ग्रन्थस्य न्यूनत्वमाशङ्क्य प्रयोजनमत्र प्र
वृत्तिपेक्षायामाह इहेति अस्मन्नात्रुपयुक्तानामिति बालकस्य शास्त्रप्रवेशेऽनपेक्षितानामित्यर्थः तेषां वितण्डाजल्पयोरेवापेक्षितत्वात् वि
द्यार्थिनस्तु गुरुणा सतीर्थ्यैर्वा सह वादकथायामेवाधिकारेण बालस्य तु असमर्थमेवास्य ग्रन्थस्य कृतत्वादिति भावः एतदेव दर्शयति

तत्र यद्विवक्षितार्थात् किंचिन्न्यूनं तन्न्यूनम् यद्विवक्षितार्थात् किंचिदधिकं तदधिकम् सिद्धान्तादपध्वंसोऽपसिद्धान्तः प्र
कृतेनानभिसंबद्धार्थवचनमर्थान्तरम् उत्तराप्रतिस्फूर्तिरप्रतिभा पराभिमतस्यार्थस्य स्वप्रतिकूलस्य स्वयमेवाभ्यनु
ज्ञानं स्वीकारो मतानुज्ञा इष्टार्थस्य भङ्गो विरोधः इहास्मन्नानुपयुक्तानां स्वरूपभेदेन प्रतिपादनमनतिप्रयोजनतानोवाल
तरां न दोषाय एतावतैव व्युत्पत्तिसिद्धेः इति श्रीकेशवमिश्रविरचिता तर्कभाषा समाप्ता ॥

एतावतैवेत्यादिनेति शिवम् हेधीरास्तर्कभाषायां न कर्तव्यावहेलना शास्त्रार्थाः सर्व एवास्यां सत्त्रवद्विद्यते यतः तावत्तेयास्तर्कभाषा
बालकैरद्य तरन्ति वानरैर्लङ्घितोऽप्यवनगाधः किं महोदधिः अमेषामपि संविलोक्य विदुषीः सम्यग्विभाव्याकरे मात्सर्यमनसो विहा
यकेयं व्याख्या मदीयामपि भावार्थप्रतिसंदधाति हृदये कोयो हि धीरीयदिस्यादेवात्र नदाविनिर्मितविद्योऽस्याख्यो ममायमश्रमः
पिपादयिषया बालानां शिक्षार्थमिह कास्सयो गौरीकान्तेन धीरेण कृता भावार्थदीपिका ॥ इति श्रीमहोपाध्यायगौरीका
न्तसार्वभौमभट्टाचार्यविरचिता तर्कभाषाभावार्थदीपिका समाप्ता । शुभम् लिखितं केवलराम वीरवल्ल ॥ संवत् १८९९ १८